कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥श्रीगणेशाय नमः॥ जटाजूटलसद्गंगजलभूषितमस्तकः। पुनातु गिरिजाप्रेमपात्रमेकमनेकधा॥१॥
उपजीव्योपजीवकभावसंगतस्योपमाननिरूपणानंतरं शाब्दं निरूपयन् शिष्यावधानाय प्रतिजानीते।
अथेति। अत्र ज्ञायमानपदस्य शाब्दप्रमाणतया पदे उपमानोपजीवकत्वाभावात्। फलयोः स्वरू-
पफलयोश्च संगतिर्बोध्या। तस्याश्च फलनिष्ठत्वे स्वाश्रयकरणत्वात्मकपरंपरासंबंधेन करणनि-
ष्ठत्वात् करणयोरानंतर्याभिधाननियामकत्वमवसेयं। तथाहि। शक्तिपरिच्छित्तिरेवोपमितिः त-
स्याश्च सर्वस्या एव शाब्दबोधजनकत्वेन फलयोरुपजीव्योपजीवकत्वसंभवः। एवं स्वरूपफलयोरपि अ-
तिदेशवाक्यार्थरूपे ज्ञाने उपमानप्रमाणस्योपमितिद्वारा शाब्दबोधोपजीव्यत्वान्तरति। केचित्तु।
ज्ञायमानं पदं करणमित्यस्य शक्तत्वेन ज्ञायमानमित्यर्थात्। सविशेषणे हि विधिनिषेधौ विशेष-
णमुपसंक्रामतः सति विशेष्ये बाध इति न्यायेन स्वर्गी ध्वस्त इतिवत् विशेषणीभूतशक्तिज्ञा-
नमादायोपमानोपजीवकत्वसंभवेन स्वरूपतोपजीवकत्वमपि संगतिरित्याहुः। पदज्ञानस्य शाब्द-
नवीन प्रमाणत्वांगीकर्तृमते तु उपमितेः शक्तशक्तिपदविषयत्वेनातिदेशवाक्यार्थज्ञानात्मकोपमा

Accession No:- ~~351~~ M831
Title: - सिद्धांतमञ्जरी दीपिका
Subject:- न्याय
Auther: - शशिकंठ राम दिक्षित
पत्रे - 154

KKSU LIBRARY
RAMTEK
441 106
M-831
Dist Nagpur

①

Checked 2012

१

नप्रमाणस्योपमित्यात्मकशब्दप्रमाणे उपजीव्यत्वेन स्वरूपतः उपजीवकत्वमक्षुण्णमेवेति दूषणं। ननु अ
तिदेशवाक्यरूपशब्दप्रमाणस्यापि अतिदेशवाक्यार्थज्ञानरूपोपमानोपजीव्यत्वादुपमानमेवादौ निरूपि
तं। ननु शब्द इत्यत्र किं विनिगमकमिति चेत्। न। प्रमाणतावच्छेदकधर्मावच्छिन्नोपजीव्यतानिरूपितोप
जीवकताया एवात्र संगतित्वात्। प्रमाणतावच्छेदकधर्मश्चेन्द्रियत्वादिः। अवच्छिन्नत्वं व्यापकत्वं। एवं
चोपमानस्य संकेतमात्रग्राहकतया सर्वस्यैवोपमानस्य शब्दप्रमाणोपजीव्यत्वं। शब्दप्रमाणस्य तु न स
र्वस्यातिदेशवाक्यार्थज्ञानात्मकोपमानोपजीव्यत्वं। घटमानयेतिशब्दे तदभावात्। न च ज्ञायमानप
दत्वेन शब्दत्वावच्छिन्नं प्रति हेतुतया घटमानयेतिशब्दनिरूपितशाब्दत्वावच्छिन्नकार्यतायाः
उपमाने सत्त्वादुक्तदोषतादवस्थ्यमिति वाच्यं। प्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नाया
उपजीवकताया विवक्षितत्वात्। प्रमाणविभाजकोपाधिश्च साक्षात्कारकरणत्वादिः। अव
च्छिन्नत्वं चात्र स्वरूपसंबंधविशेषः। इत्थं च शाब्दत्वादेरूपमितिकरणत्वानियतत्वात्। अ
तिदेशवाक्यार्थज्ञानत्वादेरेव तथात्वेन तस्य प्रमाणतावच्छेदकशाब्दप्रमाणत्व[illegible]व्यापको।

१

②

त्वमपेक्ष्य शाब्दत्वस्य लघुतया तन्निवेश एव स[illegible]म्यगिति वाच्यं। सादृश्यज्ञानोपमानत्ववादिमतेऽतिदेशवा
क्यार्थस्मृतिरूपव्यापाराभावेनैवानतिप्रसंगे निश्चयत्वप्रवेशे प्रयोजनविरहादिति विभाव्यते तथापि
व्यवहारादिनापि शक्तिग्रहात् शाब्दबोधोदयेन व्यभिचारात् शब्दप्रमाणेऽप्युपमानोपजीवकत्वव्या
घातः क्वचिदुपजीवकत्वस्य च शाब्दप्रमाणवदुपमानप्रमाणेऽपि सत्वाद्बिंगमतादवस्थ्यादिति न किं नि ४
चिदेतत्। नव्यास्तु। स्वतंत्रेच्छस्य नियोगपर्यनुयोगानर्हत्वादिति न्यायपरत्वविनिगमकः। न तु सं
गतिरिति लस्यास्त्वन्यत्वेपि न क्षतिरिति दिक्॥ निरूप्यत इति। लक्षणस्वरूपप्रामाण्यादिप्रकार
कवर्त्तमाननिरूपणविषयः शाब्द इत्यर्थः। तत्र शाब्दे निरूपणीये। शाब्देति। अत्र शाब्दप्रमिति
करणत्वं लक्षणं। प्रमाणशब्दवाच्यत्वं च लक्ष्यतावच्छेदकं। प्रमितिकरणमात्रत्वे [illegible] प्रत्यक्षा
दावतिप्रसक्तं। अतः शाब्देति। ननु शाब्दत्वं शब्दजन्यत्वं तथा च शब्दजन्यप्रमाकरणत्वं
लक्षणं पर्यवसितं। तच्च विषयविधया शब्दजन्यप्रत्यक्षप्रमितिकरणे श्रोत्रेन्द्रियेऽतिव्या
प्तमित्यत आह। शाब्दत्वं चेति। तथा च शाब्दत्वरूपजात्यवच्छिन्नप्रमितिकरणत्वं न तत्रेति

पजीव्यतानिरूपितोपजीवकतानवछेदकत्वादुक्तदोषाभावात्। केचित्तु अयं कीदृग्गवय इति प्रश्नानंतरं चि
त्रलेखादिना तादृशपिंडदर्शनं तत्रातिदेशवाक्यं विनापि मानसरूपातिदेशवाक्यार्थज्ञानात्सिद्धोप
मानोदयेन व्यभिचारात् शब्दो नोपमाने उपजीव्य इति तु उपमाने शब्दोपजीवकत्वाभावात् नाविनिगम
इति वदंति। तदसत्। शाब्द्याकांक्षा शाब्देनैव पूर्यत इति न्यायात् तत्रापीदृग्गवय इत्याभिप्राये
शाब्दकल्पनाया आवश्यकत्वात्। शाब्दी आकांक्षा शाब्दबोधगोचरेच्छा शाब्देनैव विषयसिद्धिद्वारा निवर्त्य
त इति लदर्शि[illegible]त्। यदा च यदा प्रष्टुर्ज्ञानमात्रेच्छा न तु शाब्दबोधे तत्र शाब्दकल्पनाया नवकाशः।
तत्र शाब्दगोचरेच्छाया अभावेन तादृशन्यायस्यानवतारात्। न चातिदेशवाक्यार्थशाब्दत्वेनैवोप
मितिकरणतया शाब्दकल्पनमावश्यकं। पदजन्यपदार्थोपस्थितेरेव शाब्दबोधेहेतुत्वात्। शाब्दी शाब्दबोधो
पयोगिनी। [illegible] आकांक्षा अन्वयप्रतियोग्युपस्थितिरूपा। शाब्देनैव पूर्यते संपाद्यत इत्यर्थात्। तादृ
शन्यायस्याप्यवतारश्[illegible]ति वाच्यं। अतिदेशवाक्यार्थसीद्द[illegible]त्वेनोपमितिकरणत्वे मानाभावात्।
परित्यज्य च नितांतव्यभिचारकं रूपं गृह्यमानैर्व्यभिचारेण कारणत्वकल्पनानुदयात्। न च निश्चय

नातिव्याप्तिरिति भावः। केचित्तु। अतीतानागतशब्दानुसंधानादपि शाब्दोदयात्। शब्दो न करणं किंतु
शाब्दज्ञानं। इत्थं च शाब्दजन्यप्रमाकरणत्वस्य लक्षणत्वे ऽसंभवः। शाब्दज्ञानजन्यप्रमाकरणत्वस्य लक्ष
णत्वे तु विषयविधया शाब्दज्ञानजन्यप्रत्यक्षप्रमाकरणे मनस्यतिव्याप्तिरत आह। शाब्दत्वं चेती
त्याकूतः। शाब्दत्वस्य प्रत्यक्षाद्यन्यत्वरूपत्वे गौरवादाह। शाब्दत्वं चेतीत्यपि कश्चित्। ननु लक्षणलक्ष
तावच्छेदकयोरैक्यमित्यत आह। जन्येति। केचित्तु। न शाब्दात् घटं प्रत्येमीत्येवानुभवो न तु शाब्दात्प्रत्येमीति
आत्मविशेषगुणानां विषयविनिर्मोकेन भानासंभवात्त्वनुगमात्। तथा च शब्दजन्यघटादिविषयक
ज्ञानत्वमेव तद्विषयो न त्वतिरिक्तशाब्दत्वजातिरित्यत आह। जन्यपदधीतीत्याकूतः। तदसत्। शाब्दलिं
गकघटानुमितेरपि शाब्दजन्यघटविषयकज्ञानत्वेन तद्दशायामपि शाब्दयामीति प्रतीत्यापत्तेः। शा
ब्दत्वे जातिस्वीकारस्यावश्यकत्वात्। तदस्वीकारमादायैव दीपलक्षणप्रणयनेन तदव्यापकशाब्द
त्वस्येत्यभिमानं व्यासंगादित्यवधेयं। जन्यपदधीजन्यत्वव्यभिचारिणी अनुभवत्वव्याप्या
च या जातिः प्रत्यक्षत्वादिमत्त्वशून्यत्वे सति पदविषयकत्वाव्यभिचारिणी या जातिरुपमितित्वं
तच्छून्यधीत्वमिति लक्षणार्थः। अतिव्याप्तिं वारयति। तत्रेति। प्रत्यक्षानुमितिस्मृतिष्वित्यर्थः।

ति

ताहृशीनांजन्यपदधीजन्यत्वव्यभिचारि अनुभवत्वाव्यापिकानां सत्वादिति। तथा च तच्छून्यत्वाभावान्नैव्याप्ति
रिति भावः। स्मृतित्वस्य जातित्वं अनुभवसामग्रीप्रतिबध्यतावछेदकत्वेन। ननु प्रत्यक्षादावेति व्याप्तिवारणाय
जातिशून्यत्वे सतीत्यास्तां। यदि च शाब्दे पि ज्ञानत्वादिजातिसत्वाद संभव इति विभाव्यते तदानुभवत्वाव्यापकजा
तिशून्यत्वे सतीत्येवास्तु रत्यत आह। जातिशून्यत्वमिति। जातिशून्यत्वमात्रमित्यर्थः। अनुभवत्वेति। अनुभ
वत्वाव्यापकजातिशून्यत्वमित्यर्थः। अनुभवत्वादीनामिति। आदिना ज्ञानत्वगुणत्वादिपरिग्रहः। तथा चे
दृशजातीनां सत्वात् जातिशून्यत्वं न वक्तव्यमिति भावः। अत्र यद्यपि ज्ञानत्वादीनामित्येव वक्तुमुचितं तथा
पि तदव्यापकेत्यत्र तत्पदेनानुभवत्वपरामर्शाय अनुभवत्वादीनामित्युक्तं। तदव्यापकेति। अनुभवत्वा
व्यापकेत्यर्थः। अनुभवत्वाव्यापकेत्यस्य व्यावृत्तिमाह। जन्येति। तथा सति। ताहृगिति। जन्यपदधीज
न्यत्वव्यभिचारीत्यर्थः। ननु अनुभवत्वस्य वारणाय अनुभवत्वान्यत्वमेवोपादीयतामित्यत आह। आ
दीनामिति। आदिना ज्ञानत्वपरिग्रहः। अनुभवत्वाव्यापकत्वं अनुभवनिष्ठभेदप्रतियोगिताव
छेदकत्वं तेनानुभवत्वादिव्युदासः। ननु अनुभवत्वव्यापकत्वमेव किं नोपादीयते कृतमव्यापकत्व
घटितत्वेनेति चेन्न। व्यापकसामानाधिकरण्यादिरूपव्याप्तत्वनिवेशे गौरवात्। एवम

त्व

नुभवत्वस्यापिस्वव्याप्यत्वाच्च वारणाय भेदघटितस्वव्याप्यत्वस्यावश्यं वाच्यतयातिगौरवाच्च। मन्मते अनुभवनि
ष्ठभेदप्रतियोगितावच्छेदकं स्यानुभवत्वस्य तत्वेनानुपपत्त्यभावात्। स्वरूपनावति व्याप्तिवारणाय चरमधीपदस्यानु
भवपरत्वं विना ऽनिर्वाहाच्चेति। पदजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वमिति कृते ऽस
भवः। ज्ञायमानपदस्य करणत्वासंभवेन शाब्दत्वस्यापि पदाजन्यत्वव्यभिचारित्वादतः पदधीति। इ
त्थं च जन्यपदव्यावृत्तिमाह। पदधीति। नन्वनुमितित्वस्यापि तादृशस्यासत्वात् कथमतिव्याप्तिरित्यत आ
ह। अनुमितित्वस्येति। भगवदिति। अनुमितित्वस्येश्वरीयपदधीजन्यत्वव्याप्यत्वेनात्मत्वादि
जातिरेव तथा तच्छून्यत्वं चानुमितावपीसति व्याप्तिः। जन्यपदोपादाने चानुमितित्वस्यापि तथात्वे
न [illegible] त्वशून्यत्वाभावान्नक्षतिरितिभावः। अतः अतिव्याप्त्यादिति। समुदितमिति। ज
न्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वमित्यर्थः। अत्र च जन्यत्वव्य
भिचारीति धीजन्यत्वव्यभिचारीति जन्यधीजन्यत्वव्यभिचारीति। जन्यजन्यत्वव्यभिचा
रीति वा नोक्तं। अनुमितित्वस्य जन्यत्वज्ञानजन्यत्वजन्यव्याप्तिज्ञानजन्यत्वव्याप्यत्वात्तथा

भिचारिजातिशून्यत्वस्यानुमितावपि सत्वादतिव्याप्तेः। जन्यपदजन्यत्वव्यभिचारिजातिशून्यत्वमात्रोक्तौ शा
ब्दत्वस्यापि तथात्वेनासंभवापत्तिरिति विशेष्यमुपादेयमेव। ननु जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वा
व्यापकजातिशून्यत्वमेव तल्लक्षणमस्तु [redacted] कृतं विशेष्यदलेनेत्यत आह। उपमितावितिः।
उपमितेः पदविषयकातिदेशवाक्यार्थज्ञानजन्यत्वनियमेन जन्यपदधीजन्यत्वव्यभिचारिप्रत्यक्षत्वादि
जातिशून्यत्वादिति भावः। शून्यांतं पदविषयकत्वाव्यभिचारिजातिशून्यत्वमित्यर्थः॥ पदविषयकशाब्दबो
धे पदस्यापि भानात् पदविषयकत्वसमानाधिकरण शाब्दत्वशून्यत्वाभावादसंभवइति समानाधिकर
णेति विहायाव्यभिचारीति। ननु सर्वत्र शाब्दबोधे पदस्य भाने बाधकाभावाच्छाब्दत्वस्यापि पदविष
यकत्वाव्यभिचारित्वमेवेति चेन्न। वृत्त्या पदजन्यपदार्थोपस्थितितात्पर्यज्ञानादेरेव शाब्दबोधे हेतुत
या शाब्दस्य सर्वत्र भाने मानाभावात्। यत्र भिन्नविषयकानुमितिसामग्रीकाले घटमानयेति शाब्देच्छाब
लाच्छाब्दबोधः। तत्र शब्दविषयकशाब्देच्छायत्तामितीच्छाविरहविशिष्टानुमितिसामग्र्याः प्रतिबंध
कत्वेन शब्दशाब्दानुपपत्तेश्च। घटशाब्देच्छाया अपि तत्रोत्तेजकत्वे तत्तदिच्छाभावकूटनिवेशेनातिगौर
वात्। मिथो विशेषणविशेष्यभावे विनिगमनाविरहेणानंतकार्यकारणभावकल्पनापत्तेश्चेति। शा

शाब्दाविषयत्वं शाब्दस्यैवोक्तत्वा शाब्दत्वस्य पदविषयत्वस्याप्यभिचारित्वाभावेनासंभवाख्यानादितिन
किंचिदेतत् । ज्ञाताविति । ज्ञाप्यादावित्यर्थः । तत्र ज्ञाप्यत्वाभावादिति भावः । मणिकृतस्तु । प्रयो
गहेतुभूतार्थतत्त्वज्ञानजन्यः शाब्दः प्रमाणमिति शाब्दलक्षणं । प्रयोगो वाक्यं तद्धेतुभूतं यदर्थतत्त्वज्ञानं
तज्जन्यशाब्दत्वं प्रमाणशाब्दत्वमित्यर्थः । वाक्यार्थभ्रममादाय वक्तिनाप्तिं च तीलादौ वयोगेऽतिव्या
प्तिवारणाय तत्त्वपदं । तथापि पदार्थतत्त्वज्ञानमादायायोग्येऽतिव्याप्तेः प्रयोगहेतुभूतेति । इयं
चार्थपदस्य वाक्यार्थपरत्वपर्यवसानान्न पदार्थतत्त्वज्ञानमादायातिप्रसंगः । तथा हि । हेतुपद
समभिव्याहृतभूतपदस्य भूप्राह्याविति धात्वनुसारादितरनैरपेक्ष्यव्युत्पन्नतया सजातीयनै
रपेक्ष्यस्यात्र विवक्षितत्वात्तत्प्रयोगप्रतिपाद्यज्ञानं प्रयोगे कर्त्तव्ये प्रयोगप्रतिपाद्यज्ञानां
तरं नापेक्षते । तादृशार्थतत्त्वज्ञानजन्यत्वं लब्धं । नहि वाक्यार्थज्ञानवत्पदार्थज्ञानमपि अ
र्थज्ञानमनपेक्ष्य प्रयोगहेतुः वाक्यार्थज्ञानात्मकार्थतत्त्वज्ञानस्यैवापेक्षणीयत्वादिति । अत्र
च प्रयोगो वाक्यं । तथा च तत्कालीनतत्पुरुषीयस्वजन्यज्ञानाविषयविषयकत्वं यत्प्रमात्मकं ज्ञानं

प्रकृतवाक्ये जननीये स्व[illegible]स्मिन् जननीये प्रयोगप्रतिपाद्यज्ञानां[illegible]तरं तत्कालीनतत्पुरुषीयस्वजन्यज्ञान
विषयविषयकज्ञानानंतरं नापेक्षते। तादृशार्थतत्त्वज्ञानजन्यत्वमर्थः। वाक्यार्थज्ञानेन वाक्ये जननी
येस्वपूर्ववृत्तिपदार्थज्ञानस्यापेक्षणात् [illegible] संभवापत्तिः। अन्यथा तस्याहेतुत्वापत्तेरिति
स्वोत्तरोत्पन्नत्वमपि स्वजन्यज्ञानविषयविषयकज्ञानांतरे विशेषणीयं। तथा च तत्कालीनतत्पुरुषी
यस्वजन्यज्ञानविषय[illegible]विषयकयत्प्रकृतवाक्यार्थप्रमात्मकज्ञानं स्व[illegible]स्मिन् जननीये [illegible]तत्कालीन
तत्पुरुषीय[illegible]स्वजन्यज्ञानविषयविषयकप्रमांतरं नापेक्षते तादृशप्रकृतवाक्यार्थज्ञान ज्ञानांतरं
जन्यशाब्दत्वं तत्कालीनतत्पुरुषीयप्रमाणशाब्दत्वमिति फलितं। अत्र स्वोत्तरोत्पन्नेत्यत्र स्वपदमर्थत
त्वज्ञानपरं। स्वपदांतराणि। प्रकृतवाक्यपराणि। पदार्थतत्त्वज्ञाने न च वाक्ये जननीये स्वोत्तरोत्पन्न
प्रकृतवाक्यजन्यज्ञानविषयविषयकस्य वाक्यार्थज्ञानस्यापेक्षणात् पदार्थतत्त्वज्ञानजन्यत्वे
मादायाधार्यो ज्येति व्याप्तिरिति। स्वसंस्कारादावतिव्याप्तेर्लक्षणे शाब्दपदं। प्रमाणमात्रस्य लक्ष्यत्वे
प्रत्यक्षादावव्याप्तेर्लक्ष्येपि शाब्दपदमनुसंजनीयमिति। ननु तत्कालीनतत्पुरुषीयस्वजन्यज्ञा कृत्स

५

(10)

ज्ञानांतरमित्य
र्थः २

नविषयविषयकं यत्प्रमात्मकं ज्ञानं स्वविस्यनूजननीपेतत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषय
विषयकं प्रमांतरं नापेक्षते। तादृशप्रमाजन्यशाब्दसंतत्कालीनतत्पुरुषीयप्रमाणशब्दत्वमितिफ
लितं। प्रमात्वंच यावद्भ्रमासिन्नत्वं नातः आंशिकप्रमामादायातिप्रसंगः। इत्थंच वह्निनासिंचती
त्यादौ पदार्थतत्त्वज्ञानस्य स्वसमानजातीयवाक्यार्थज्ञानांतरापेक्षत्वात्तदादायातिव्याप्त्यभा
वेपि कंठाभिघाते वाक्यरूपे पक्षसाधनताप्रमामादायातिप्रसंगः वह्निकरणकसेकानुकूलकृ
तिमान् इति प्रकृतवाक्यजन्यज्ञानविषयकरणताघटकीभूताभावादिविषयत्वेनपक्षेसाध
नताज्ञानस्यापि प्रकृतवाक्यजन्यज्ञानविषयविषयकार्थतत्त्वज्ञानत्वात्। तेनच वाक्ये जनपि
त्वे सजातीयज्ञानांतरानपेक्षणादिति। एवं शाब्दोद्भ्यमिति वाक्यस्यापि तादृशवाक्यजन्य
ज्ञानविषयतया तादृशवाक्यजन्यज्ञानविषयविषयकवाक्यरूपे पक्षे साधनताप्रमामादाय
शाब्दोद्भ्रममित्ययोग्यवाक्येतिव्याप्तिः। अपि च पयःकरणकसेकानुकूलकृतिमान् गुणस्यद्रय
मिसांशिकप्रमात्मकसमूहालंबनजन्ये पयसा सिंचतीति योग्ये वाक्ये। [illegible] व्याप्तिः। तादृश

तर्कप्रकाश

६

स३

वाक्यार्थज्ञानस्य भ्रमभिन्नत्वाभावात् । ईश्वरीयवाक्यार्थज्ञानस्य च स्वसमानजातीयास्मदीयवाक्यार्थज्ञा
नापेक्षितया न दशायां लक्षणागमनात् । अन्यथा तदीयपदार्थतत्त्वज्ञानमादायायोग्येति प्रसक्तेर्दुर्वा
रत्वादिति रूपमेतदिति चेन्नैवं । यादृशार्थतत्त्वज्ञानं स्वसमानजातीयज्ञानान्तरानपेक्षं सत् प्रयोगहेतुः
लो ४ तज्जन्यत्वमिति न लक्षणार्थः । किंतु प्रयोगहेतुभूतं यदर्थतत्त्वज्ञानं प्रकृतवाक्यार्थविषयकं तत्त्वज्ञानं त
ज्जन्यत्वं लक्षणं । तथा च तत्कालीनतत्पुरुषीयस्वजन्यज्ञानं यघत्संसर्गकयघत्प्रकारकत्वावधि य
घद्विशेष्यताकं तत्तत्संसर्गकतत्तत्प्रकारकतत्तद्विशेष्यताकभ्रमाभिन्नज्ञानजन्यशाब्दत्वं तत्कालीनतत्पु
रुषीयशाब्दप्रमाणत्वमिति पर्यवसितोऽर्थः । वन्हिना सिंचतीत्यादौ वन्हिकरणकसेकानुकूलकृतिमा
निति बोधोदयेन तद्विषयाविषयकज्ञानस्य भ्रमत्वान्न तत्रातिव्याप्तिः । एवं शाब्दोद्व्यमित्याद्यावपि ।
भ्रमात्मकसमूहालंबनजन्ये पयसा सिंचतीत्यादौ तु ईश्वरीयप्रमामादाय लक्षणसंगतिः । एवम
न्यत्रापि सूक्ष्मकोदीरितवाक्ययोर्निभ्रोशादावपीति । न च पत्रे वन्हिना सिंचति पयसा सिंचतीत्यादिवा
क्याभ्यां वन्हिकरणकसेकानुकूलकृतिमान् पयःकरणकसेकानुकूलकृतिमानितिसमूहा कस

६

लंबनशाब्दबोधः तत्र पयसा सिंचतीति वाक्येऽव्याप्तिः तद्वाक्यजन्यं ज्ञानं यद्विशेष्यताकं तत्तद्विशेष्यताकं स्व-
प्रमित्यन्तज्ञानाप्रसिद्धेरिति वाच्यं। यद्विशेष्यताकत्वांशे स्वजन्यतावत्तद्विशेष्यताकत्वांशे भ्रमभिन्न-
ज्ञानत्वस्य विवक्षितत्वा[illegible]साधुः। इदं च बुबोधयिषापूर्वकवाक्यावच्छिन्नं प्रतिवाक्यार्थज्ञानं हेतु-
रिति संप्रदायमतेन वस्तुतस्तु बोधयिषाया अन्यथासिद्धतया तस्य कारणत्वासंभवेन तदुपेक्ष्य
शाब्दप्रमितिकरणं शाब्द इति पूर्वघटितमेव लक्षणमत्र कृतमिति ध्येयं। प्रत्यक्षातिरिक्तप्रमा-
णसत्त्वे मानाभाव इति शाब्दस्याप्रमाणतया व्यर्थ एष प्रकृतनिर्वचनेनेति चार्वाकमतं दूषयन्
शाब्दस्य प्रमाणत्वं साधयति। सोऽयं शाब्द इति। शाब्दप्रमितिकरणं शाब्द इत्यर्थः। तद्वत्त्वेति। शाब्द-
शृणोमीत्यनुभवविशेष इत्यर्थः। दुरपह्नव इति तादृशप्रत्यक्षस्यान्यविषयकत्वे बाधाच्छब्दवि-
षयकत्व एव पर्यवसानेन शाब्दत्वसिद्धिः प्रतीतेस्त इत्यस्याध्येपदार्थमात्रोपे[illegible] इति भा-
वः। ननु न वयं शाब्द एव नास्तीति ब्रूमोऽपि तु तस्यातिरिक्तशाब्दप्रमितिकरणत्वे मानं नास्ती-
त्यत आह तज्जनकत्वमपीति। तस्य शाब्दस्य जनकत्वमपि शाब्दप्रमितिकरणत्वमपीत्यर्थः।

13

वस्तुतस्तुसोयंशाब्दइतिपाठः शाब्दयामीतिप्रतीतिसिद्धः शाब्दबोधइत्यर्थः।तज्जनकत्वमपी [redacted]
शाब्देनाहत्यशाब्दप्रमितिकरणत्वमपीत्यर्थः।तदुपपन्नमिति तत्र हेतुमाह।आ
गोपालेति।प्रतीतेरिति।वाक्यादमुमर्थंप्रत्येमीतिज्ञानस्यप्रत्यक्षविषयकत्वात्तत्त्वेनप्रत्य
क्षातिरिक्तप्रमितिस्वीकारस्तत्करणत्वस्वीकारस्यावश्यकत्वमितिभावः।ननुवस्तुशाब्दस्यप्रमा
णत्वंआस्तांचज्ञानस्यप्रत्यक्षातिरिक्तत्वंतथाप्यनुमित्यात्मकत्वमेवतज्ज्ञानस्यास्तुतोव्यर्थएवकृ
तन्निरूपणेनेत्यतआह।केवलमिति।अनुमानविधया अनुमानत्वेनान्यथावेतिशाब्दविषयोऽयमर्थः।न न६
नतुतस्यप्रत्यक्षातिरिक्तप्रमितिजनकत्वमेवनास्तीतिविवादइतिभावः।विप्रतिपद्यन्तइति।विप्रतिप
त्तिश्चशाब्दः अनुमितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नजन्यतानिरूपितप्रमाणविभाजको
पाधिनियतधर्मावच्छिन्नजनकताश्रयोनवेत्याकारिका।अत्रविधिकोटिर्नैयायिकानां निषेधकोटि
वैशेषिकाणां।विधिकोटिप्रसिद्धिः प्रत्यक्षप्रमाणे इंद्रियस्यैवचप्रत्यक्षप्रमाणतयाप्रत्यक्षंप्रतिइंद्रियत्वे
नहेतुतयातादृशजनकताश्रयत्वात्।निषेधकोटिप्रसिद्धिश्चघटादावेवसुलभा।अत्रापि उसा
प्यनवारणायानुमितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नत्वेननिवेशः।प्रत्यक्षेपि

षयस्य हेतुतया शब्दस्यापि साक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकताशालित्वात्प्रमाणविभाजकोपाधिनि
यतधर्मावच्छिन्नत्वे निवेशः। अनुमितिभिन्नशाब्दाविषयकप्रमितिकरणं नवेति प्रत्यक्षानुमित्यन्यतरत्व
व्याप्यानुभवनिष्ठजन्यतासामान्यकेन वेत्याकारको वा। प्रत्यक्षमिति। अनुमितिभिन्नशाब्दाविषयकप्रमि
तिकरणमित्यर्थः। अतो न सिद्धसिद्धिव्याघातः। नत्वनुमानं नेत्यु प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभव
निष्ठजन्यतासामान्यकं। अतो न शब्दलिंगकानुमानमादाय बाधः। नन्विदं घटानयनादिरूपार्थवि
षयकं सादिसनुमाने स्यादत आह शब्दस्येति। अर्थाव्याप्यत्वात्। स्वजन्यप्रतिपत्तिविषयार्थनिरू
पितव्याप्त्यभाववत्वादित्यर्थः। अव्याप्यत्वमेव दर्शयति। न हीति। तदर्थवित्त्याद्याकाराकारावृत्तित्वात्।
तथाचाव्यभिचारितसामानाधिकरण्यरूपव्याप्तिः शब्देन संभवति। साध्यहेतोर्वैयधिकरण्यादिति
भावः। ननु घटमानयेति पदानि तात्पर्यविषयं स्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिम
पद३ त्कदंबकत्वादित्यत्र न वैयधिकरण्यं। न चैरमतज्ञाने वानयामिति ज्ञानाज्ञातिज्ञप्रवृत्त्यापत्तिवार
णाय पुरोवर्त्ति विशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्यैव प्रवर्त्तकतया [redacted]
न तत्सिद्धिरिति वाच्यं। लाघवात्प्रवृत्तिविषये इष्टतावच्छेदकवैशिष्ट्यावगाहिज्ञान

= न प्रवर्त्तकज्ञानसिद्धिरित्यर्थः १ = विषयीभूतेति संसर्गविशेषणं स्मारितेति पदार्थविशेषणं = ४

त्वेनैव प्रवर्त्तकतया लाघवस्य ज्ञानपदस्य प्रमापरत्वेन प्रमात्वघटकतया प्रकृते तस्याप्यक्षुण्णत्वात् । न चानुमिते र्यपि पक्षतावच्छेदकप्रकारकत्वनियमेन स्मारितपदार्थत्वेनैव रजतादि विधीयेत । न तु रजतत्वादिना प्रमेयत्वादिना लाघवात् ज्ञानस्य प्रवर्त्तकत्ववारणाय रजतत्वादिप्रकारकज्ञानस्यैव प्रवर्त्तकत्वादिति वाच्यं । एवं रजतत्वादिना रजतादेरुपस्थितत्वात् इतरबाधबलात् तेन रूपेणानुमितौ भानसंभवात् । अत एव सकर्त्तृकत्वानुमाने लाघवोपनीतमेकत्वादिकमपि भासते लाघवज्ञानेतरबाधातिरिक्तस्य एव च व्यापकतानवच्छेदकरूपेण भानानभ्युपगमादिति । यद्वा एते पदार्थाः स्व[illegible]स्वविषयमिथः संसर्गवन्तः आकांक्षादिमत्पदस्मारितत्वादित्यनुमानेन विशिष्य रजतत्वादेः पक्षतावच्छेदकत्वम् तासिद्धिः । न च नदीजलत्वसंसर्गपरतयोच्चरिते अहो विमलं जलं नद्याः कच्छे महिषश्चरतीति वाक्ये अप्रामाण्ये नदीकच्छपदार्थयोर्व्यभिचारः तात्पर्यगर्भत्वाभ्यासत्वादिति वाच्यं । तात्पर्यगर्भ~~त्वस्य~~परस्परनिरूपिताकांक्षादिमत्त्वाभावेनैवाव्यभिचारित्वात् । ननु तथापि हेतुतावच्छेदकावच्छिन्ने हेतुमत्ताज्ञानश्च पक्षे नानुमितिहेतुतया पत्र योग्यतासंशयस्तत्त्रयो

दृम
८

(16)

ग्यतागर्भहेतुमत्तानिश्चयाभावादन्वयाबोधप्रसंगः। न च योग्यतासंशयस्य बोधसंशयपर्यवसन्नत्वात्सा
ध्यसंदेहस्यानुमित्यनुगुणतया पक्षताघटकसंशयातिरिक्तसंशयान्यत्वमेव हेतुमत्तानिश्चयत्वमि
ति वाच्यं गौरवात्। साध्याप्यसाध्यवान्नवेति संशयादनुमित्यापत्तेश्चेति चेन्नाय भ्रयमात्रो बोध्य
मो वोभयथापि। वह्निव्याप्यस्य तत्राभि हेतुतावच्छेदकसंदेहेऽपि नैयायिकैरनुमितेरभ्युपगमात्। व्या
प्यवत्तानिश्चयत्वेनैवानुमितिहेतुत्वं तस्य च योग्यतारूपहेतुविशेषणसंदेहेऽपि संभवान्न काप्यनु
पपत्तिरत आह। इत्यलं चेति। ननु व्याप्तिभ्रमादेवानुमितिरस्तु न च भ्रमात्मकपरामर्शजन्यत्वा
दनुमितेर्भ्रमत्वापत्तिरिति वाच्यं। विषयबाधस्यैव भ्रमत्वे नियामकत्वेन दोषाभावात्तदुपेत
आह इत्यपि चेतीत्यपि कश्चित्। आप्तीति। पदनिष्ठव्याप्तिज्ञानस्य ज्ञानानामित्यर्थः। नमेति। न
हीत्यर्थः। अयं व्याप्तिज्ञानकौलीनैरस्त्येव शाब्दप्रयोगोऽस्त्यनुभवः तस्यानुमितेः। नन्वियं व्याप्तिज्ञा अ ५
नजन्यापि लक्षणैवानुमितिः न च तत्रानुमितित्वसत्त्वे मानाभावः तथा च विषये शाब्दसाम
ग्र्याः प्रबलत्वात्तत्रानुमितिं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं एवं मतान्तरं
शाब्दाभिन्नानुमितिस्वीकारेण तन्मते तदप्रतिबंधकत्वात्। एवं भिन्ने विषये अनुमितिसाम

17

न्यर्क॰ टी॰
२

नी २

न्याशाब्दसामग्र्याश्च प्रतिबंधकताद्वयकल्पने गौरवं मन्मते अनुमितिसामग्रीप्रतिबंधकत्वेनैवोपपत्तेर
तश्चाहे प्रतिबंधिकेति। अननुमितत्वमिति। नच व्याप्तिज्ञानादिघटितसामग्रीप्रतिबंधकत्वेन
न्यानुमितित्वाभावएव तद्विषयइति वाच्यं। व्याप्त्याद्यप्रतिसंधानेपि तत्र अनुभवसिद्धत्वात्।
असाध्यासत्त्वमिति। यद्यपि नोपमितत्वमित्यपि वक्तुमुचितं तथाप्युपमितेः शक्तिमात्रविषयक
तया घटादिविषयकज्ञानस्य ततो[illegible]संभवेन तन्निराकरणस्याप्रयोजकत्वात्। नोपमितत्वमि
[illegible]तिशेषइत्यपि वक्तुमुचितं। तथा च शाब्दजन्यत्वेन अनुमितित्वाभावेन विलक्षणप्रमि
त्यंतरस्वीकारस्यावश्यकत्वात् तत्करणस्य प्रमाणांतरत्वमावश्यकमिति भावः। प्रकृतमिति। नैय्या
यिकशाब्दजन्यशाब्दबोधविषयइत्यर्थः। अनुधावतो नानार्थत्वेन शाब्दत्वविशिष्टेनाकृतत्वात् अत
एवात्मा वारे द्रष्टव्यः श्रोतव्य इत्यादिश्रुतिरप्युपपद्यते। इदं च घटकर्मत्वानयनादि नैय्यायिकरे
त्य इति। वैशेषिकस्य शाब्दो चौरापितत्वे लिंगविधयैव तदुपकत्वात्। नैय्यायिकैरन्यइत्यु
क्तं नैय्यायिकानां शाब्दे पृथैवोच्चारणाच्छाब्दतात्पर्यज्ञानसंवधात्। शाब्दबोधप्रात्रो

रूम
२

18

क्य

त्वविति भावः ॥ जरन्मीमांसकास्तु लौकिकवाक्यस्थले शाब्दबोधात्पूर्वं प्रकृतवाक्यार्थगोचरस्य यथार्थज्ञा
नवत्त्वरूपाप्तोक्तत्वानुमितिसामग्रीसत्त्वेनाप्तोक्तत्वानुमितिसामग्रीसत्त्वेनाप्तोक्तत्वानुमि
तिसंभवात् वाक्यार्थज्ञानस्यावश्यकत्वात् तदुत्तरं च वेदस्थले तु तच्छाब्दसामग्रीतः शाब्दो सत्त्वेः लौ
किकः शाब्दोनुवादकः अनुवादकत्वस्य गृहीतग्राह्यनुभवमात्रजनकत्वरूपत्वात् स्व समानाधि
करणस्याव्यवहितपूर्ववृत्तिस्वसमानाकारनिश्चयविषयविषयकतद्विशेष्यकतत्प्रकारकानु
भवमात्रजनकत्वरूपत्वंतियावत्तस्य पदमनुभवपरं वेदस्य त्वपौरुषेयत्वेनाप्तोक्तत्वानु
मानासंभवादननुवादकत्वात्प्रामाण्यं अनधिगतार्थानुभवकरणत्वस्यैव प्रामाण्यरूपत्वात् तत्र
गृहीतग्राहीतरानुभवकरणत्वं स्वसमानाधिकरणस्याव्यवहितपूर्ववृत्तिस्वसमाना[illegible]कारनि
श्चयविषयविषयकेतरतद्विशेष्यकतत्प्रकारकानुभवकरणत्वमिति यावत् स्वसमानाकारत्वं
च स्वस्मिन्यादृशी तद्विशेष्यकत्वावच्छिन्नतत्प्रकारिता तादृशी तद्विशेष्यकत्वावच्छिन्नतत्प्रकारिता
शालित्वमित्याहुः तदसत् व्याप्तिस्फूर्तिविलंबेनाप्तोक्तत्वानुमितिसामग्र्यभावेन प्रथममेव
शाब्दबोधादननुवादकत्वेन प्रमाणत्वात् ॥ ननु लौकिकवाक्येऽदृष्टमात्रोक्तं न वेति संशये शाब्दबो

स्व

दि

(19)

१०

ष्यानुदयात्॥ यत्संशयव्यतिरेकनिश्चयौ यत्र प्रतिबंधकौ तन्निश्चयस्तत्र हेतुः अनुमितौ व्याप्तेरिवेति निय
मेनाप्रोक्तत्वनिश्चयस्य हेतुत्वाच्छाब्दबोधात्पूर्वं तस्यावश्यकतेति चेन्न तत्कार्यतावच्छेदकं हि शाब्दत्वं वा
लौकिकवाक्यजन्यशाब्दत्वं वा लौकिकत्वेन ज्ञातवाक्यजन्यशाब्दत्वं वा नाद्यः वेदे तदभावात् न द्वितीयः आप्तो
क्तत्वानिश्चयेऽपि वेदानुसारेण प्रमानमन्वादिवाक्येऽपौरुषेयत्वाभिमानिनो गौडमीमांसकस्य शाब्दबोधोद
येन व्यभिचारात् नापि तृतीयः लौकिकत्वेनाज्ञाततल्लौकिकवाक्यस्थले कूपराद्धे सामान्यसामग्रीतए
तल्लौकिकत्वेन ज्ञातवाक्यादपि शाब्दबोधसत्त्वसंभवे तस्याकारणत्वात् न च परसंशये सादिनियमेन त
द्धेतुत्वमिति वाच्यं। तत्संशयेऽपि वाक्यार्थबोधोत्पत्तेः तत्संशयस्याप्रतिबंधकत्वात् अव्यभिचारसं
शयव्यतिरेकनिश्चयप्रतिबंधकत्वेऽव्याप्तिज्ञानेऽव्यभिचारेणाप्रयोजकत्वेन च तादृशनियमाभावाच्च। ए
तेन शब्दसामान्ये आप्तोक्तत्वशंकानिरासे हेतुः स च लौकिके आप्तोक्तत्वानुमानाद्वेदेऽपौ
रुषेयत्वानुमानात् न चापौरुषेयत्वनिश्चयदशायामेव वेदस्यानुभावकत्वे दोषवस्तुरूपाप्रणी कर
तपदस्मारितत्वरूपहेतुज्ञानसत्त्वे न पदार्थसंसर्गसिद्धिसंभवाद्वेदस्याप्यनुवादकतापत्ते
रिति वाच्यं। व्याप्तिस्मारितलिंगत्वेन तद्विलंबादिति परास्तं। अनाप्तोक्तत्वसंशयस्य अप्रति

रुष्म

त१ १०

(20)

वंधकत्वान्नयोग्यतासंशयवदिति दिक् । प्राभाकरास्तु क्वचिद्भ्रमः क्वचित्प्रमेति नियमानिर्वाहाय शाब्दप्रमात्वा
वच्छिन्नं प्रति किंचित्कारणमुपेयं तच्च योग्यता । अन्वयप्रयोजकरूपवत्त्वरूपयोग्यतायाः करकाभिप्रायप्र
युक्तपयसा सिंचतीत्यसयोग्यवाक्येपि सत्त्वात् । अथ दोषाभाव एव तथास्तु दोषाश्च भ्रमप्रमादविप्रलि
प्साकरणापाटवरूपाः वक्तृनिष्ठाः भ्रमश्चोच्चारणीयवाक्यार्थगोचरो भ्रमः प्रमादोऽनवधानता सा
च वाक्यार्थज्ञानस्वरूपयोग्यस्य वक्तुरुच्चारणीयवाक्यार्थनिश्चयव्यतिरेकः । रुच्चीयवाक्यार्थनिश्च
यव्यतिरेकवारणाय पक्षान्तर्निवेशः । अन्यथाप्रतीतस्यार्थस्यान्यथा प्रतिपिपादयिषा प्रतारणा सैव
च विप्रलिप्सा । इच्छाविषयीभूतवर्णानुकूलकंठताल्वाभिघातानुत्पादकत्वेनापरवर्णानुकूल
कंठताल्वाद्यभिघातः करणापाटवं करणं कंठाभिघातः तस्यापाटवमसामर्थ्यं इच्छाविषयीभूतवर्णानि
नुकूलत्वमिति यावदिति चेन्न । भ्रांतप्रतारकवा क्ये संवादेन प्रमाणे प्रतारणारूपदोषसत्त्वे
न व्यभिचारात् । अन्यथाप्रतीतस्याविद्यमानार्थस्यान्यथाप्रतिपिपादयिषायाएव वा प्रतारणा
त्वेनोक्तदोषाभावेपि सर्वसाधारणदोषस्यैवाभावेन तत्तदभावस्य प्रत्येकं कारणत्वे भ्रमस्थलेप
न्यदोषाभावसत्त्वात्प्रमापत्तिः । अभावकूटस्य ~~क~~कारणत्वे गौरवाद्विसंवादिभ्रमकवाक्यादपि प्रमा

(21)

पत्तेश्च तस्माद्यथार्थतात्पर्यकत्वमेव लोकवेदसाधारणं शाब्दप्रमाप्रयोजकं यथार्थतात्पर्यकत्वं च यथार्थवाक्या
र्थप्रतीतीच्छयोच्चरितत्वं एकपदार्थवदपरपदार्थप्रतीतीच्छयोच्चरितत्वमिति यावत्। उच्चरितत्वं चानुसं
धीयमानत्वं तेन तन्मते वर्णानां नित्यैकरूपत्वेऽपि नासंभवः। न वा मौनिश्लोकेऽव्याप्तिः। वेदे तु पूर्वपूर्वा
ध्यापकेच्छायाः प्रायसंगतिः। नूतनपठ्यमानवेदस्तु पंडितपठ्यमानवेदादभिन्न एव वेदस्यानित्यत्वोल
नित्यानुमेयवेदे तु तदर्थज्ञापकत्वेन ज्ञानमन्यैव साम प्रीतिर्न व्यभिचारः। शुकवाक्येऽपि शिक्षकवा
क्यमादायोपपत्तिः। वर्णानां तन्मते नित्यैकरूपत्वात्। न चैवं वचरासंपन्नं शुकबालादिवाक्येनासंभा
व इति वाच्यं। तस्याप्रमाणत्वात्। व्यवहारस्तु प्रसक्तादसंसर्गाग्रहाद्वेति। केचित्तु शुकबालादि
भिन्नलौकिकवाक्ये यथार्थवाक्यार्थप्रतीतीच्छयोच्चरितत्वं वेदे वेदत्वादिं शुकबालवाक्ये बा
धितार्थकत्वं नानैव शाब्दप्रमाप्रयोजकमेव शक्तिमत्त्वे न च तेषां साधारणत्वमिति नाननुगमः। न च
सर्वत्राबाधितार्थकत्वमेव प्रयोजकमस्त्विति वाच्यं। यत्रान्यघटनाभिप्रायेण गेहे घटोऽस्तीत्युक्ते
घटांतरं इष्टा तमानयति तत्रान्यपरत्वेनाप्रमाणेऽपि प्रामाण्यापत्तेः। तदुक्तं। यत्परः शब्दः स श
ब्दार्थीयत इती साकुरितिदिक्। तच्च ज्ञातमुपयुज्यते ज्ञायमानकरणे ज्ञानोपयोगित्वे सति व्यभि

चारिवैलक्षण्यं ज्ञाता । व्याप्तिपक्षधर्मताशक्तिश्चेति । तज्ज्ञानं हेतुः ज्ञातमुपयुज्यते शाब्दबोधनिरूपितज्ञान
निष्ठकारणतायां विषयतासंबंधेनावच्छेदकं शाब्दबोधनिरूपितज्ञानावच्छिन्नकारणताश्रयस्य शाब्दस्य
शाब्दबोधजननीयेऽनुपयोगित्वे सति सहकारित्वे सति व्यभिचारिवैलक्षण्यादिति तदर्थः । सामा
न्यमुखी च व्याप्तिः यद्धर्मज्ञाननिरूपितज्ञानावच्छिन्नकारणताश्रयस्य यद्धर्मज्ञाने जननीये सहकारि
त्वे सति व्यभिचारिविलक्षणं भवति तत्तद्धर्मज्ञाननिरूपितज्ञाननिष्ठकारणतायां विषयितासंबं
धेनावच्छेदकं भवति यथा व्याप्तिः शब्दशक्तिश्चेति । अत्र श्रोत्रेन्द्रियसंनिकर्षे व्यभिचा
रवारणाय ज्ञायमानकरणमिति । शाब्दबोधं प्रति ज्ञायमानकरणस्य शब्दस्य स्वप्रत्यक्षे जननी
येऽनुपयोगित्वे निशब्दनिष्ठश्रोत्रसमवाये व्यभिचारवारणाय ज्ञानोपयोगीति । तथा च यद्धर्मज्ञा
नं प्रति यत्तज्ज्ञायमानं करणं तत्तज्ज्ञाने जननीये तत्सहकारीत्यर्थान्न दोषः । न च सल्लिंग
परामर्शे व्यभिचारः ज्ञायमाने तस्य ज्ञानाविशेषे यथा सल्लिंगपरामर्शस्य ज्ञानावि
शिष्टज्ञायमानकरणासहकारित्वात् । यस्मिन् सति यदभावात् कार्याभावः तस्यैव तत्
सहकारित्वेन यद्विशिष्टस्यासहकारित्वात् तथा च तद्धर्मज्ञाननिरूपितकरणतावच्छे

23

न्य-दी.
१२

नै२

दवज्ञानविशिष्टकरणस्य ज्ञायमानत्वघटितधर्मावच्छिन्नकरणताकज्ञाने जननीये सहकारित्वमर्थः पर्यव
स्यति। परामृश्यमाणलिंगत्वेनैवानुमितिकरणतया परामर्शविशिष्टकरणत्वेन परामर्शाभावासं
भवान्नव्यभिचारः। कदोन्निमानक दसादिसादौ परामृश्यमाणलिंगसत्वेपि व्याप्त्यभावेन प्रमानु
त५ मिति[illegible]भावात् व्याप्तिवदिति दृष्टांतसंगतिः व्याप्तिपक्षधर्मता[illegible]वल्लिंगत्वेन प्रमानुमि
तिकरणत्वात् ज्ञायमानशब्दसत्वे शब्दसमवायाभावासंपत्येनैवतादृशसहकारित्वस्य संब
समवायेऽभावेपि आद्यक्षणे धूमत्वसामान्यलक्षणाजन्यपरामर्शविशिष्टधूमसत्वेपि
धूमनिष्ठ[illegible]रूपाभावेन धूमव्याद्दषानुदयात् परामृश्यमाणधूमस्य प्रसक्ते जननीयस
हकारिस्फुरते धूमनिष्ठरूपादेर्व्यभिचारवारणाय ज्ञानेपयोगी सत्र ज्ञायमानत्वघटितधर्मा
वच्छिन्नकरणताकज्ञानपदस्यातिवेशः। अत्रेदं चिंत्यं परामृश्यमाणलिंगसत्वेपि सल्लिंगप द्
रामर्शाभावासंभवात् कथं सल्लिंगपरामर्शे व्यभिचारनिरासः। नच यज्ज्ञानं प्रस्तुपयोगि
ता तज्ज्ञानकरणतावच्छेदकज्ञानविशिष्टकरणे सहकारित्वं विवक्षितं। तत्परामृश्यमाण

रुम
१२

प्रमितिजनकव्याप्तत्वे ५

लिंगत्वेन प्रमानुमितिहेतुत्वेन सल्लिंगपरामर्शस्य प्रमानुमितिं प्रत्येवोपयोगितया प्रमानुमितिकरणतावच्छे
दकत्वस्य परामर्शविशिष्टलिंगत्वे सत्परामर्शाभावासंभव इति वाच्यं। तथा सति व्याप्तिवदिति दृष्टान्ता
संगतेः व्याप्तिपक्षधर्मतावल्लिंगत्वेन प्रमानुमितिं प्रत्येवोपयोगितया सत्परामर्शविशिष्टलिंगत्व
स्य व्याप्यभावासंभवेन तादृशसंसर्गादित्वस्य व्याप्त्यावृत्त्यापादिति। आत्ममनःसंयोगबाधाप्र
त्वादिवारणाय व्यभिचारित्ववैलक्षण्यत्वादिति। तच्च प्रमितिजनकज्ञानजनकसामग्र्यप्रविष्टत्व
मिति यावत्। न च सर्वेषां भ्रमाभावेन प्रमितिजनकज्ञानजनकसामग्र्येवाप्रसिद्धा प्रमिति
पदेन भ्रमभिन्नत्वविवक्षणे च तन्मते भ्रमाप्रसिद्ध्या प्रसिद्धिरिति वाच्यं। स्मृत्यपि पूरण
प्रकारतानवच्छिन्नविशेष्यताशून्यत्वस्य च तस्य प्रमितिपदेन विवक्षणात्। तादृशी च स्मृति
सामग्र्येव प्रसिद्धा। अथानुभवस्य स्मृतिपूरणतया सल्लिंगपरामर्शस्याप्रमितेनैव वारणेऽपि
न विशिष्टपूरणसहकारित्वे सत्त्वज्ञानविशिष्टे सत्त्वस्य वैयर्थ्यमिति चेन्न। पूरणतातिरिक्त
वि॰३ ज्ञानजनकताश्रयकारणकलापस्यैव ज्ञानजनकसामग्रीपदेन विवक्षितत्वात्। अन्ये
पास्वाप्रयुक्त। लिंगज्ञानानुमितिस्थानाभिषिक्तसाध्यस्मृतिमादाय स्मृतिसामान्यप्रा

=स्वंव्याप्ति=१ =पदवान्व्याप्तिरितासाधारिका=१

१३ दृश्यस्य आभावप्यसत्त्वेन दृष्टान्तासिद्ध्यापत्तेः। अखंडाभावघटक सोपासिद्धिवार ग्रत्येपि करणतातिरिक्ते स्वस्य
न यवैयर्थ्य~~मितिस्ये~~न रसलुमात्रस्यैव स्वात्मकक्रूरलिंगकानुमितिस्थानाभिषिक्तसाध्यस्मृतिजनकत
याऽप्रासिद्धिवारक [illegible] त्वाच्च जनकताकरणतोभयसाधारणजनकत्वात् तस्यैव तस्याभावात् विशेष्यैव
निवेशोऽकरणतादिकजनकतात्वस्यैव प्रवेशाः। न तु करणतातिरिक्तजनकतात्वेन प्रवेश इति य
र्थलगां क्रायाऽनं वक्तसाच्च। इद्बोधकत्वाव्यावर्त्ताच लक्षितजनकता निवेशनीयानातः उद्बोधक
तया जनकतामादायासिद्धिः। प्रागभावस्य तत्त्वात् घटत्वस्येनाहेतुसाध्यत्वप्रमानुमितिप्रागभाववेव्य
भिचार इति दिक्। केचित्तु। दृष्टपदं [illegible] विषयवैशिष्ट्यावगाहितानमेव प्रकृते प्रमितिराकार्थ
ति७ इत्याहुः। अथ वोज्ञायमानकरणदृष्टान्ताधेयत्वसंसर्गतम्यार्थः। तथा च यत्र यत्र ज्ञानीयज्ञायमान
करणनिष्ठत्वे सति यत्र ज्ञानोपयोगित्वे सति व्यभिचारित्वे लक्षणं भवति तत्र तत्र ज्ञाननिरूपि
तज्ञाननिष्ठकारणतायां विषयदितासंबंधेनावच्छेदकत्वं भवतीति व्याख्यार्थः। सल्लिंगपराम
र्शस्तु ज्ञायमानकरणत्वमाधिनिष्ठः। अथास्मल्लिंगकानुमितिं प्रति ज्ञायमानकरणे आत्ममिते
स्यवृत्ते स्तदवारणं मितिश्चेन्न। तज्ज्ञाना नाधिकरणत्वस्य ज्ञायमानकरणे निवेशात् अत एव

प्रागभावस्य तच्छिन्नत्वेन हेतुत्वेपि न प्रमानुमितिप्रागभावे व्यभिचारः धूमनिष्ठानौपाधिकत्वादिनार
णायज्ञानोपकोमित्वेसतीति । बाधाभावादिवारणाय व्यभिचारित्ववैलक्षण्यत्वादिति । तदर्थस्या
पनारस्यावत्तत्वं भ्रमजनकभिन्नत्वमिति यावत् । वस्तुमात्रस्यैव लिंगनिष्ठा भ्रमजनकतयोक्ता
यमानलिंगत्वातिरिक्तरूपेण भ्रमजनकभिन्नत्वं विवक्षणीयं न च तन्मते तदप्रसिद्धिः विसंवादि
प्रवृत्त्यादिजनकज्ञानमात्रस्यैव तन्मते तथात्वात् । न चाबाधितत्वादितथा बाधस्याविपरीतादि
श्चयस्य सत्त्वे ज्ञानमात्राभावेन तदभावस्य ज्ञानमात्रप्रयोजकत्वात् इति । ननु तन्मतेऽग्र
हीतासंसर्गकग्रहणस्मरणात्मकज्ञानद्वयस्यैव भ्रमत्तयाविसंवादिप्रवृत्तिजनकत्वेपि तस्य च निर्धर्मिता
वच्छेदकत्वयाबाधाभावाभावस्य न तत्र हेतुत्वमिति द्रष्टव्यमेतत् । अत्र केचित्तु विसंवादिप्रवृत्तिजन
कत्वेन ज्ञानस्य प्रवेशः । अपि तु स्मृतित्वेन तथात्वे स्मृतिजनकतावच्छेदकावच्छिन्नान्यत्वादिति त
दर्थः । जनकताचो द्वौ घटकता व्यावर्त्तनीतेन नातिद्विरिति । असंसर्गाग्रहविशिष्टज्ञानद्वयेऽन्वय
व्यतिरेकाभ्यां बाधस्य विरोधित्वमिष्यते तदेवेसापि कश्चिदिति दिक् । तच्च तत्स्वरूपसामान्य
तः । ज्ञानसपदार्थत्वेन रूपेण तत्तत्पदार्थघटितं विशिष्य तत्तत्पदार्थघटितं च । तत्र च वद
स्थले घटपदार्थविशिष्टानुपात्ताप्यर्थविशेषक घटपदार्थप्रकारकप्रतीतीच्छयोच्चरितत्व

27

रूपतात्पर्यज्ञानं हेतुः न तु विशिष्य। लोके तु घटविशिष्टकर्मताविशेष्यकघटप्रकारकप्रतीतीच्छयो
च्चरितत्वरूपतात्पर्यज्ञानमेव हेतुः तत्र सामान्यतः घटपदार्थत्वादिना तात्पर्यग्रहेऽपि पदादेर
पिलक्षणादिना घटपदार्थत्वसंभवेन घटविशिष्टकर्मताविशेष्यकप्रतीतीच्छयोच्चरितं न वेति वि
शिष्यसंदेहे शाब्दबोधापत्तेः वेदे तु लक्षणादिनाऽन्यार्थासंभवेनैकपदार्थत्वेन ज्ञाने विशिष्य
संदेहाभावात्। यथा कपिंजलानालभेतेत्यादौ प्रथमोपस्थितत्वरूपत्वात्पवनतर्दनिवीतत्वि
त्वविशिष्टकपिंजलपदार्थपरबहुवचनांतं कपिंजलपदमिति सामान्यतः कपिंजलपदार्थत्वरूपे
ण तात्पर्यनिर्णयेऽपि विशिष्य कपिंजलत्वादिरूपेण तात्पर्यसंशयाभावात्। लोके तु गुरुभूते
पर्थे तात्पर्यसंभवेन तावद्वतकीनवतारादिविशिष्यसंदेहसंभवेन घटविशिष्टकर्मत्वविशे
ष्यकघटप्रकारकप्रतीतीच्छयोच्चरितमिदमिति तात्पर्यनिर्णयस्य स्वाद्धा पूर्वमवश्यापेक्षि
तत्वात् लौकिकवाक्यमनुवादकं। तस्माल्लौकिकवाक्यं सर्वमेवानुवादकं वादे प्रमाणं वेदे तु
तदभावात्प्रामाण्यमिति गुरवः। तदसत्। एकपदार्थविशिष्टापरपदार्थ~~परं बहुवचनांतं~~वि
शेष्यकैकपदार्थप्रकारकप्रतीतीच्छयोच्चरितत्वरूपयथार्थतात्पर्यनिश्चयत्वेन हेतुत्वे बाधा

कल
१५

(28)

र्थ्यनिवेशे गौरवात् । किन्तु नानार्थानुरोधेन शाब्दसामान्ये एकपदार्थप्रकारकापरपदार्थविशेष्यकप्रती
तीघयोच्चरितत्वरूपतात्पर्यज्ञानस्यैव । न चैवं करकाक्षप्राप्रयुक्तपयसा सिंचतीत्ययोग्यवाक्यादपि
प्रमापत्तिरित्युक्तमिति वाच्यं । एकपदार्थेपरपदार्थवत्वरूपयोग्यता प्रमायाएव संशयनिश्चयसाधा
रणरूपेण कारणत्वात् । अपि चेदं वाक्यं प्रमादिविशिष्टज्ञानयोरन्यतरजन्यं वाक्यार्थज्ञानजन्य
वाक्यत्वात् । ततश्च भ्रमादेवौधेयपवक्ता स्वप्रयुक्तवाक्यार्थगोचरयथार्थज्ञानवान् भ्रमाघज
न्यवाक्यार्थज्ञानजन्यवाक्यप्रयोक्तृत्वादहमिवेति वक्तृयथार्थवाक्यार्थज्ञानानुमानपूर्वकमेव
यथार्थवाक्यार्थप्रतीतिपरत्वनिश्चयो हेतुर्वाच्यः । तच्च न संभवति । मौलेः पुरुषधर्मत्वेन भ्र
माघजन्यत्वनिर्णयासंभवात् । संवादिप्रवृत्तिजनकत्वादेश्च वक्राह बालिंगस्य शाब्दबोधोत्त
रकालीनत्वादि साक्षांविस्तरः । ननु शाब्दस्यानुमानान्तर्गतत्वे घटमानयेति शाब्दात् घटादिपद
शक्तिमविदुषोपि शाब्दबोधापत्तिः । मम तु तत्र व्याप्तिज्ञानाभावादेव तदसंभव इत्यारापे
न्नाशंकते नान्वेति । स्यान्मते त्रेण शाब्दत्वेनानुपामकराणां घटादिपदे अगृहीतशक्तिकानां सह
कारित्वादिति । इतरकारणचक्रसमवहितकारणस्यैव फलोपधायकत्वेन केवलशाब्दत्वेपि
शक्तिज्ञानरूपसहकारिविरहान्न तत्र फलोपधानमिति भावः । ऽपो होल संगत्या शक्तिज्ञ

था ५

रूपयितुं शंकते। अथेति। इयं शब्दसहकारिग्रहविषयः। पदार्थांतरमिति। तत्तत्पदार्थतावच्छेदकाभावकूटवदि
त्यर्थः। तेन नासिद्ध्यसिद्धिव्याघातः। संकेतग्राह्यं वक्ष्यमाणसंकेतजन्यग्रहविषय इत्यर्थः। आवश्यकत्वोत्र।
अभिधाख्यापनेऽस्य वक्तामप्यपेक्षणीयत्वात्। संकेतं निरूपयति। स चेति। अस्मादिति। एतत्पदजन्य
त्वप्रकारकतानिरूपिते एतदर्थबोधविशेष्यतानिरूपितनीरिच्छेत्यर्थः। हेलैवामिति। एवमपि शाप्तत्रस्त्रेवा
भिधारूपत्वे। पामरादीति। गगरीत्यादिशब्दा इत्यर्थः। अभिधायकत्वापत्तेरिति। तथा चानापभ्रंशीतवे
नम्लेंछितवै इत्यादिश्रुतिविरोधः। तथा प्रतिपादकत्वस्यापभ्रंशानपभ्रंशसाधारण्यात्। अतिरिक्त
शक्तिस्वीकारे तु तत्र संकेतसत्त्वेऽपि शक्तिविरहाच्चापभ्रंशत्वानंगीकारे चैतादृशश्रुतिविरोध
इतिभावः। संकेतमात्रं तादृशोच्चार्यमत्र। अपभ्रंशेऽपि गगर्यादिशब्दे सोऽस्ति ईश्वरसंके
तोऽस्ति। मानाभावादिति। शास्त्रविपर्णतद्बुद्धीनां गगर्यादिशब्दाच्छाब्दरूपफलाभावे नो
पभ्रंशो न तादृशेश्वरसंकेत इत्यर्थः। नापभ्रंशितवै इति श्रुतिविरोधश्च बाध्यकोऽवसेयः। ननु
शब्दसामान्ये शक्तिज्ञानस्य हेतुत्वेऽपभाषिते शक्त्यभावे कथं शाब्दबोधो घटतीति तटस्थः शंकते।
कथं तर्हीति। शक्तिभ्रमादिति। भ्रमप्रमासाधारणशक्तिज्ञानस्यैव हेतुत्वादिति भावः।
ननु प्रमेयत्वादिना शक्तिज्ञानेऽपि शाब्दबोधानुदयापत्त्या शक्तित्वेन तज्ज्ञानं हेतुः शक्तित्वं च तादृशे

राम
१५

२ चैत्रराजादपदमर्थो बोद्धव्य इत्याकारकेच्छाविषयाणां चैत्रादिराजनाम्नां अशक्यत्वापत्तिः तन्नेश्वरसंकेतानामीदृशानां कृते
आधुनिकसंकेतितेति कथमिति दिति । तत्रेश्वरेश्वरेच्छास्वरूपसंकेतज्ञानाभावादिति भावः २

श्वरसंकेतत्वेन तथा च पामराणामीश्वराज्ञानात् संकेतस्येश्वरसंकेतत्वेनाज्ञानात् कथं शाब्दबोध इत्याशंक्यते । कथं तर्हि
ति । ईश्वरमविदुषामिति । पामराणामीमांसकानां चेत्यपि बोध्यमित्यन्वेति । तथापीति । संकेतत्वेन सर्पः तथापि
पि संकेतत्वप्रकारकज्ञानसत्त्वादिति भावः । तस्यापि चैत्रादिराजस्यापि । ईश्वरेति । इदं साहः कालीनपि
कुत्र्यादितनामसाहित्यानामपदवाच्यत्वमित्याकारकेच्छयेश्वरेण तादृक्श्रुतिप्रणयनात् तत्रापीश्व
रसंकेतोऽस्तीति भावः । ईश्वरीयज्ञानस्येच्छायाः कृतेर्वा शक्तिरूपत्वमिति विनिगमनाविरहादिति । रिक्ते
व शक्तिरिति न्यायः । संकेतग्राहकप्रमाणाभावेन संकेतग्रहासंभवात् कथं शाब्दज्ञानं हेतुरिति भा
शंकते स्यादेतदिति । कथं ग्राह्यः केन प्रकारेण ग्राह्यः शंकते उपमानादितीति । तस्यातिदेशवाक्या
र्थज्ञानरूपोपमानस्य २ वाक्यार्थज्ञानेति । गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञाने
तावच्छेदकं तच्च गोसदृश इति स्वरूपं वाक्यार्थज्ञाने सतीत्यादि सर्पः । तस्य च गोसदृश इति वा
क्यार्थज्ञानस्य शक्तिग्रहहेतुत्वकथनात् गोपदं गवि शक्तमिति विशक्तिज्ञानमूलत्वादि सर्थः ।
तथा च ~~गोसदृशस्य~~ तथाच्छेदैरप्युपमानान्तरागृहेनवस्थापत्तिरिति भावः । व्यवहारादिति ।
प्रयोज्यप्रयोजकवृद्धव्यवहारादि सर्थः । व्यवहारश्च घटानयनादिक्रियारूपः । वृद्धानां च प्रयो

31

अङ्कुरत्वेन कृष्यनप्रयोज्यत्वरूढः। तदर्थं प्रयोजकवृद्धवाक्यार्थं घटमानयति। घटानयनानुकूलचेष्टावानूभव
ति। तया क्रियया घटानयनक्रियया तस्य प्रयोज्यवृद्धस्य प्रयत्नेति। एवं क्रियया प्रयत्ने विकलविलक्ष
णक्रियावत्त्वात् यथा क्रियावत् इत्यनुमितेरित्यर्थः। ज्ञानं घटानयनगोचरज्ञानं अयं घटानयनगोचरप्र
शोन६ यत्नः घटानयनमेन्यः घटानयनगोचरप्रयत्नत्वात् स्वीयस्तनपानगोचरप्रयत्नवत् यो यज्जन्य
रप्रयत्नः स तज्ज्ञानजन्य इति सामान्यमुखी व्याप्तिरतो ज्ञान इत्यंतासंगतिरिति दृष्टान्तमेवाह स्वप्र
यत्नेति स्वीयस्तनपानगोचरप्रयत्न इत्यर्थः। तेन बाल्येन तथा निश्चयात् ज्ञानजन्यत्वनिश्चयात्
तद्वेद्याकांक्षायां घटानयनगोचरज्ञानहेतुत्वाकांक्षायां शब्दमेव घटमानयेति शब्दमेवेत्यावा
पोद्वापाभ्यां मिलित्वा आवापः संग्रहः। उद्वापः त्यागः। यथा घटमानय पटं नयेत्यादि कृत्स्नेच। तत्क्रि
ति। घटपदं घटधीजनकमित्युक्तौ सत्यर्थः। अतिप्रसंगभंगाय अगृहीतशक्तिकानामपि घटस्मारकबो
ध्यातिप्रसंगभंगायेत्यर्थः। तज्जननानुकूलं घटधीजननानुकूलं। किमनुपपन्नमिति। तदर्थं विश
ष्यकस्माद्व्यावच्छिन्नं प्रति ज्ञाप्यमानतच्छक्तपदत्वेन कारणत्वे नातिप्रसंग इति पर्यवसन्नः। नन्वेवं
व्यवहारादेव शक्तिग्रह इत्युक्तौ स्यात् इत्थं च शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहार
तश्च। वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धा इति प्राचीनगाथाविरोधः स्यादत आह राम
१६

अतिप्रसंगभंगाय घटपदं घटधीजनकत्वमिव पटधीजनकत्वमपि स्यादित्यतिप्रसंग
भंगायेत्यर्थः। वस्तुतस्तु

तदनं तरामिति। आद्यशक्तिग्रहानंतरमित्यर्थः। व्यवहारात्। गवानयनगोचरप्रयोज्यप्रयोजकव्यवहारा
त्। एवं तु घटानयनगोचरव्यवहारदृष्ट इति नाभेदः। अनयेस्थापिपा पूर्वं व्यवहार एव शक्तिग्राहकः तत
श्च व्यवहारेण उपमानेन वा शक्तिग्रहो जायत इत्यत्र नास्माकमाग्रह इति नर्वाचीनगाथाविरोध इति भावः। उपमा
नादिति। गोसदृशो गवयपदवाच्य इत्युपमानाद्गवयो गवयपदवाच्य इति शक्तिग्रहो दयादित्यर्थः। शा
पि२५ ब्दादिति। आप्तवाक्यादित्यर्थः। कोकिलः पदवाच्य इति आप्तवाक्यात् पिकपदादेः कोकिले शक्तिग्रहादिति
भावः॥ व्याकरणादिति॥ भवति प्रत्ययादीनां शक्तिग्रहो व्याकरणादित्यर्थः॥ कोशादेरिति॥ अप्येकदंतहे
रंबलंबोदरगजाननाः इत्यत्र गणेशत्वविशिष्टे शक्तिग्रह इत्यर्थः। न च तत्र गणेशत्वविशिष्टस्य पदार्थत्वेन या
पदार्थस्य पदार्थतावच्छेदकस्य वा भेदाभावात्कथं द्वंद्व इति चेन्न कोशस्य शक्तिग्राहकतया इदं पदम
त्र शक्तमिति शक्तिग्रहस्यैव तस्मादुदये तत्पदानामेव पदार्थतया तद्भेदसत्त्वात्। आदिपदग्राह्य
शेषविवरणप्रसिद्धपदसान्निध्यानामधिकरणपरिग्रहः। वाक्यशेषो यथा यवमयश्चरुर्भ
वतीत्यत्र यवशब्दः म्लेच्छप्रसिद्धिवशात्कंगोरोचयत्कः आर्यव्यवहारवशात्तु दीर्घशूकवि

33

तर्कप्र·टी·
१७

शिष्टस्य वाचकः व्यवहारस्योभयत्राविरोधादिति। संदेहे वसंते सर्वसस्यानां जायते पत्रशातनं। मोदमानाश्च
तिष्ठंति यवाः कणिशशालिनः इति वाक्यशेषात् दीर्घशूकविशिष्टे शक्तिनिर्णयः। नच वेदेन [illegible] दीर्घशूकविशि
ष्टे शक्तिबोधेपि कंग्वादौ शक्तित्वे बाधकाभावः। नानार्थत्वेनापि वेदोपपत्तेरिति वाच्यं। अन्याय्यं चानेका
र्थत्वमिति न्यायेन वेदस्य बलवत्त्वात् तत्रैव शक्तिपरिच्छेदात्। एवं यन्न दुःखेन संभिन्नं नच ग्रस्तमनंत
रं। अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदं इत्यत्र वेदादेव स्वःपदशक्तिग्रहः। ननु दुःखासंभिन्नत्वं
न दुःखासमानाधिकरणत्वं आद्यं तच्च दुःखवत्त्वेनासंभवात् नापि दुःखासमानकालीनत्वं अस्म
दादिसुखेपि तत्त्वात्। नचानंतरमित्यस्याविरलत्वेन प्रवाहीत्यर्थकतया चिरन्तनप्रवाहस्य
दुःखासंभिन्नत्वप्राप्यानातिव्याप्तिरिति वाच्यं। अस्मदीयसुखस्यापि कतिपयकालावच्छेदेन त ना४
पात्वसंभवात्। चक्रवर्तिसुखे तथात्वसंभवेन अभिलाषोपनीतमित्यनेनापि तन्निरासात् सं
पन्नत्वात्। अन्यथा विशेषणात् रैश्वर्यव्याप्तिरिति चेदत्र केचित्। एकज[illegible]वच्छेदेन दुःखासंभि
न्नत्वादिकं नानैव शक्यतावच्छेदकमित्याहुः। तन्न नानार्थत्वकल्पने गौरवात् तथा तात्पर्यग्राह
कापत्ताच्च। केचित्तु यावन्ति वैशिष्ट्यं तदेव शक्यतावच्छेदकमित्याहुः। अपरे तु दुःखासंभिन्न
त्वादिकं न शक्यतावच्छेदकं किंत्वधर्माजन्यशरीरजन्यसुखत्वोपलक्षणमिदं योगिनां तु [illegible] धर्मा

ना१ सुखम
१७

जन्यंशरीरंतत्रदुःखोत्पत्तेरधर्मजन्यत्वात् सुखमात्रावच्छेदकेत च्छरीरे प्रमाणाभावात् । अथ मरणस्य
दुःखनियतत्वात् स्वर्गिशरीरेपि मरणजन्यदुःखसंभवादसंभवः । न च तेन राजदुःखम् अस्त्विति तेन
विरोधः तस्य दुःखोत्पत्तिपरत्वादिति चेन्न अनुकूलतर्काभावे नमरणस्य दुःखनियतत्वे प्रमाणाभा
वात् । आवश्यकत्वे वा मरणदुःखजनककर्मान्याधर्मजन्यशरीरजन्यसुखत्वस्यैव शक्तिनियतत्वात
=वक्ष्यमाणप्रका
रेण =५
दृतेन स्वर्गे । पिपतनशीलस्येति श्रवणात् स्वर्गयोनिपुण्यक्षयसंरूपात् स्वर्गेपि दुःखोत्पत्तेरसंभव
इति निरस्तं जदन्यत्वेनाप्यधर्मस्य विशेषणीयत्वात् स्वर्गिशरीरस्य सुखमात्रावच्छेदकत्वेन
तत्र दुःखधीः भ्रान्तैव आलएवतज्र्मपात्र जन्यमेवेति तदविशेषणेपि क्षतिविरहाच्चेत् साहः अ
पिर लत्र वाहृत्यिरस्त्वादौ घट[illegible]मात्रयोनिरूपकासक्ति त्र सुखवत्त्वं शक्यतावच्छेदकं न रूपस्येति
बोध्यं । विवरणात् यथा पचति पाकं करोतिश्रुति फलोपधकरोतीनां सर्वार्थत्वान्नविवरणानुआ
ख्यातस्य फलत्वविशिष्टेशक्तिः । यद्यपि पूर्वोच्चारितवाक्यस्य स्वसमानार्थकोत्तरोच्चारितवा
क्यतात्पर्यकथनानुरूपविवरणस्य शक्तिमात्रत्वात् नशाब्दविषया इदपदमत्र शक्तमि
ति शक्तिबोधकपदाभावात् तथाप्याख्यातपदं फलत्वविशिष्टेशक्तं फलत्वविशिष्टेशक्तिं
करोतीत्यादिप्रतिपादितार्थकत्वात् । पाकत्वविशिष्टशक्तरूपाकपदप्रतिपादितार्थकपचधातु

धात्वर्थकारकबोधस्यानुभवसिद्धत्वादितरथा
नुः । नेयमस्त्विति भाग्नसात्वेनचिरस्व
पितत्वं ६

तर्कसं० टी०
१८

वत् यद्धर्मविशिष्टशक्तप्रतिपादितार्थकं भवति तत्तद्धर्मविशिष्टे शक्तं भवतीति सामान्यमुखी व्याप्तिर्व्याप्त्याभि-
मता। इह सहकारतरौ मधुरं पिको रौतीत्यत्र सहकारतरुरूपप्रसिद्धपदसमभिव्याहारेण पिकपदं
कोकिले शक्तमिति प्रसिद्धपदसमभिव्याहारेण शक्तिग्रह इति ध्येयं। ननु कोशस्य शक्तिग्राहकत्वे गु-
णे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वति इत्यनेन शुक्लादिपदानां गुणे गुणविशिष्टे च शक्तिप्र-
तिपादनात् गुणविशिष्टेपि शक्तिः स्यादिति चेन्न। अनन्यलभ्यस्यैव शक्यार्थतया शुक्लादिपदा-
नां गुणविशिष्टे लक्षणयैवोपपत्तौ न तत्र शक्तिः कल्प्यते असति बाधके एव च कोशस्य श-
क्तिग्राहकत्वात् अत एव वैयाकरणेनाख्यातस्य कर्त्तरि शक्तिप्रतिपादनेपि लाघवात्कृ-
तावेव शक्तिरित्यग्रे वक्ष्यत इति दिक्॥ तयोः प्रयोज्यप्रयोजकवृद्धयोः पार्श्वस्थता बालेन भ- रो ५
न्ययोः स्वपूर्वकालीनप्रयोज्यप्रयोजकवृद्धयोः। अनवस्थेति। तयोर्व्यवहारेऽप्यन्यान्यव्यवहा-
रपूर्वक एवेत्यनवस्थापत्तेरित्यर्थः। य इयमनवस्था बीजांकुरवदनादौ चानवस्था न दो-
षाय प्रामाणिकत्वादिति भावः। तदसंभवादिति। तत्राद्योत्पन्नबालस्य स्वपूर्वकालीनप्र-
योज्यप्रयोजकवृद्धव्यवहारादर्शनाच्छक्तिग्रहासंभवादित्यर्थः। ननु संसारस्यानादि- सृम
त्वात् खंडप्रलयाद्यभावेन सर्गाद्यकालाभावात्कथं तदसंभव इत्याशंक्याह प्रलय इति। खंडप्र- १८

त० १

लयइत्यर्थः। कार्यद्रव्येति। सृष्टिकालवारणाय कार्यद्रव्यानधिकरणेति। कालिकसंबंधेन द्रव्यानधिकरण
त्वं बोध्यं। कार्यानधिकरणेत्युक्तावसंभवः। खंडप्रलयेऽपि परमाण्वादौ रूपक्रियादिसत्त्वात् अतः कार्यद्र
व्येति। द्रव्यानधिकरणेत्युक्तावपि तथा परमाण्वादेः सत्त्वात् अतः कार्येति। कार्यद्रव्यानधिकरणेत्युक्तौ म
हाप्रलयेऽतिव्याप्तिरतः कार्याधिकरणेति। कार्यत्वं चात्र ध्वंसप्रतियोगित्वं तेन महाप्रलये ध्वं
सरूपकार्याधिकरणत्वेऽपि नातिव्याप्तिः। अथवा। धातिरिक्तकार्यपरं कार्यपदं सामान्यपदस्य विशे
षपरत्वादित्यपि केचित्। महाप्रलयस्य चरमदुःखध्वंसादिरूपतया प्रतियोगितासंबंधेन का
र्याधिकरणत्वात् कालेति। कालिकसंबंधेनाधिकरणत्वं बोध्यं। तत्कालीनयोग्याधारा
धेयभाव इति भावः यत्तु तत्र शब्दादिरूपकार्याधिकरणत्वाद्गगनेऽतिव्याप्तिः कालेति। गगनेति।
ध्वातापपापूर्वमकल्प्यमिति वेदादिव्युत्पत्त्या इत्यर्थः। तथा च संसारस्य प्रवाहानादित्वं न त्वनादि
त्वमेवेति भावः। कालकपाली न्यायात्कालि घटप्रागभावः कार्यद्रव्यानधिकरणकार्याधिकरण
वृत्तिः अभावत्वात् गगनवृत्तिघटासंताभाववत्। पक्षधर्मताबलात्त्व घटप्रागभावे ई
दृशकालवृत्तित्वसिद्धौ खंडप्रलयपरत्वनिरासाय पर्यवस्यतीत्यनुमानमापतत इत्यधि
कं बोध्यं। शरीरद्वयं प्रयोज्यप्रयोजकद्वये शरीरद्वयं। तथा पूर्ववत्संक्रमं घटपटादिसंवेतं।
न चैवं संभवतीति व्याप्तेरप्रामाण्ये सत्ये तदेव सूत्रे त्याज्यते। ईश्वरत्वेऽपि। प्रपञ्च इति। शक्ति

माणाभावाद्युष्मन्मते घटादिगोचरप्रयत्नानुपपत्तिरेवेश्वरे मानमित्यर्थः। यद्यप्यर्थापत्तेर्नास्मन्मते प्रमा-
णान्तरत्वं। तथापि सर्गाद्यकालीनप्रवृत्तिग्रहः प्रयोज्यप्रयोजकवृद्धव्यवहारप्रयोज्यः प्रयोज्यप्रयोजकवृ-
द्धव्यवहारान्याप्रयोज्यत्वे सति प्रयोज्यत्वात्। यन्नैवं तन्नैवं यथा गगनादीति व्यतिरेक्यनुमान-
मेव। तदानीमन्यवृद्धासंभवाद्वादीश्वरसाधकमिति हृदयं। मन्वादय इति। तथा च नेश्वरसिद्धिरि-
तिभावः। यद्यप्येतावतापि न संकेतग्रहानुपपत्तिस्तथापि स सर्गादीश्वरोपि साध्यत इति
भावः। तेषामिति कपिलमन्वादीनां सर्वसत्त्वेऽपि न वृद्धव्यवहारहेतुत्वं परं तु तेषां तथात्वे एव विवाद इ-
तिभावः। ननु व्यवहारान्यथानुपपत्तिर्भवन्मते ईश्वर इव मन्मतेऽपि तेषु सर्वज्ञत्वे एव मानं स्याद्ध-
एव र्मिकल्पनातो धर्मकल्पनायां [illegible] लघीयस्त्वं चेदाह। व्यवहारेति। एवमपि पूर्वस-
र्गसिद्धसर्वज्ञत्वकमन्वादिस्वीकारेऽपि अनुपपत्तेरिति। पूर्वसर्गेति। पूर्वसर्गसिद्धसर्वज्ञत्वकः
कश्चिद्यदि स्यात्तदा तत्तत्र व्यवहारप्रवर्त्तनाऽस्यात् स एव तु नास्तीति भावः। तत्रापि। पूर्वस-
र्गेपि। अन्य एवेति। स्वपूर्वसर्गसिद्धसर्वज्ञत्वकः अन्य एवेत्यर्थः। तथा च व्यवहारप्रवर्त्त-
कत्वं। ननु सर्वदा सार्वज्ञ्यादिशाली एको मनुरेव न सर्वत्र मूलमित्याशंकते अस्त्वेकएवेति। तत एवे-
ति। सार्वज्ञादिशालिमनुत्वेनाभवदभिमतेऽसिद्धः। तथा च नाविच्छेदो न वास्तु नीति भावः। इ-
मिति। स्वोपादानगोचरजन्यापरोक्षज्ञानचिकीर्षाकृतिजन्यानि जन्यानि सकर्तृकाणि कार्यत्वाद्।

घटवदित्यनुमानमपि ईश्वरसाधकमवसेयं। ननु शाब्दबोधे शक्तिज्ञानस्य हेतुत्वेऽपि घटपदं घटे शक्तमिति शक्तिज्ञा
नकाले पटशाब्दबोधापत्तिः। नच तदा घटशाब्दबोधोत्पत्त्या शाब्दत्वावच्छिन्नंप्रति जायत एव पटशाब्दत्वा
वच्छिन्नस्यान्यापादकत्वाभावएवेतिवाच्यं। योग्यताज्ञानादेरेव तत्तदवच्छिन्नापादकत्वोदितांशंकतेस्या
त५ देतादिति। ननुदेवर्थविषयकशाब्दबोधत्वावच्छिन्नंप्रति तत्तद्घटरूपपदज्ञानत्वेन हेतुत्वकल्पनागौरवापत्तिरित्याशं
कृते। अथेति। तस्या देशांतरस्थस्य पुंसः तस्यां एव काशीस्थगोरेवाप्रतीतेरिति। अत्र संन्निकृष्टत्वोद्दि
तिभावः। गोः काशीवृत्तिरितिवाक्यजन्यबोधे काशीस्थगोरेव विशेष्यता। एवं च देशांतरीयपुंसः ता
दृशगोरसंन्निकृष्टत्वेन न तत्र शक्तेरग्रहात् शाब्दबोधानुपपत्तिरिति तद्विशेष्यकशाब्दत्वावच्छिन्नं
प्रति तद्विशेष्यकशक्तिग्रहत्वेन कारणताद्वयं चेति शाब्दत्वे शक्तिज्ञानत्वाभ्यामेव कार्यकारणभा
वो वाच्यः। योग्यताबलाच्चाग्रहीतशक्तिकव्यक्तेरपि भानमुपेयं। एवं च घटपदात्पटशाब्दबो
धापत्तिस्तदवस्थैवेत्यनुपपन्ना शाब्दप्रमितिरनुमितिसंलग्नैव। एवं च घटपदा[illegible]न्नपट
बोधापत्तिः। तन्निरूपितव्याप्तिज्ञानादेरभावादित्याखंडनभावार्थोऽवसेयः। अत्र शाब्द
त्वशक्तिज्ञानत्वाभ्यां कार्यकारणभावविचारे। गोत्वएवेति। गोत्वविशिष्टे शक्तिस्वीकारे
ऽनावश्यकत्वाग्रहीतविशेषणान्यायेन गोत्वएव शक्तिः विशिष्टे शक्तिस्वीकारमपेक्ष्य

नर्पज्ञ.गी.
२.

विशेषणेशक्तिस्वीकारेलाघवात्‌। तदिदमुक्तं। विशेष्यंनाभिधागच्छेत्क्षीणशक्तिर्विशेषणइति। रूपंतद्धीति।
व्यक्तेरशक्तत्वेइत्यर्थः। तास्मःबोधविषयता। अशक्यस्यापिशाब्दबोधविषयत्वोपगमेपदादेरपिबो
धापत्तिरितिभावः। नन्वाक्षेपोनुमानंतच्चनसंभवतिसाध्यहेतुप्रयोगासंभवात्‌। तथाहि।
अयंगौःगोत्वादितितावदनुमानमसंभविशक्तापक्षतानोपपत्तावात्‌ नापिगोत्वंगवाश्रितंगो
त्वेस्यादिति। पक्षतावच्छेदकहेत्वोरैक्येनासिद्धसाधनात्‌। अथगोत्वंस्वाश्रितंजातित्वादित्य
नुमानेनपक्षधर्मताबलाद्गोत्वाश्रयव्यक्तिसिद्धिरितिचेन्न। जातित्वादेर्लिंगस्यपदादनुपस्थितेःव्या
प्त्यादिप्रतिसंधानमंतरापिव्यक्तिबोधस्यानुभवसिद्धत्वाच्चेतिकृपमाक्षेपः। व्यक्तिलाभइ
त्याशयेनाशंकते ननुबोधयेदिति। समाधत्तेतस्येति। गवादिधर्मिणइत्यर्थः। अर्थापत्तिमेवो
ह। गोत्वंहीति। अनुपपन्नमिति। आनयनाद्यन्वयेऽनुपपन्नमित्यर्थः। तमाश्रयंआक्षिपती
ति। अनुपपत्तिज्ञानजन्यार्थापत्तित्वकज्ञानेव्याप्त्यादिज्ञानस्यानपेक्षितत्वात्‌। अतएवशतजी वर्ष
वित्तोगृहेऽवता[illegible]ः बहिःसत्त्वंविनाऽनुपपन्नइत्यनुपपत्तिज्ञानात्‌व्याप्तिग्रहणे। नापिशत
वर्षजीविनोगृहाभावेनबहिःसत्त्वसिद्धिरितिभावः। तथाचगो[illegible]शब्दात्कोशस्यशाब्दबोधः। व्यक्ते
स्यानुमितिविषयत्वंअर्थापत्तिविषयत्वंवानतुशाब्दबोधेतस्याःप्रवेशः। अतएवतत्पदोपस्थि
ताएवशाब्दबोधेभासते। यथागामानयेत्यादौ। पदानुपस्थिताएवमायथाप्यादरपतःश्रोतिमा क्षस
२.

(40)

श्रु १

रूपं हेषा शाब्दं च [illegible] एवं ततः स्वरूपविक्षेपराद्धं च मध्यतो यो यावतीति धीरित्यत्र पदानुपस्थितानामेव शाब्दबोधविष
यता तत्र शाब्दयामीत्यनुभवात् ननु केचित्पदोपस्थिताः केचिच्च पदानुपस्थिता इत्यर्धजरतीयन्यायप्रसंग इति चेन्नं
गीकारात् न च गौरिति पदाद्युपगर्भे देवजातिव्यक्त्योः प्रतीतिर्व्याहन्येत । एवं गोपदाज्जातिधीः ततः अनु
पपत्तिज्ञानं ततश्च व्यक्तेर्धीरिति ज्ञानधाराकल्पनं स्वै चेति गौरयमिति वाच्यं । गोपदस्य जातिमात्रवा
च्यत्वे सिद्धे युगपत्प्रतीतेरसिद्धेः ज्ञानधाराकल्पनस्य च फलमुखत्वेनादोषत्वात् । यथा पचतीत्यत्र कृति
मात्रशक्ताख्यातेन कृतिमात्रप्रतीतिः कर्तुर्लाभस्याक्षेपात् तद्वदत्र अन्यथासद्वृत्तेः क्रियायामेवाख्यातेस्त
त्रापि कर्तरि शक्तिः प्रसज्येत अन्यलभ्यत्वात्तत्र न शक्तिरिति चेत् अत्रापि तुल्यत्वादिति ध्येयं । अनु
पपत्तीति । गामानयेत्यादौ गोत्वस्यानयने ऽन्यथानुपपत्त्या व्यक्तेराक्षेपसंभवेऽपि गोरस्तीत्यत्र गोत्वे
स्यास्तित्वे ऽन्वयसंभवेनानुपपत्तिज्ञानस्यैवासंभवितया न तेन व्यक्तेर्लाभसंभव इत्यस्वरसः । न चानुप
पत्तिज्ञानं विनापि व्यक्तेर्लाभस्यानुभवाविरुद्धत्वात् तदनुपपत्तेरित्यर्थः । तथा सति पचतीत्यत्रापि आख्या
तस्य कर्तरि शक्त्यापत्तेः । अनुभवस्य तुल्यत्वात् । अत एव गामानयेति विहाय गोरस्तीत्येवमुदाहृतमिति ।
चिन्तामणिकृतस्तु व्यक्तेरपदार्थत्वे सुबर्थसंख्यादीनां तत्रान्वयासंभवः सुब्विभक्तीनां प्रकृत्यर्था
न्वितस्वार्थबोधकत्वनियमात् । तिङर्थसंख्यादीनां कर्तर्येवान्वयात् स्तु बिति निर्विराः । ना

तर्कप्र० र० = पक्षचैत्रोपनोगुणादिपसं = द २
= पञ्चमीतिरितित्रोव: = १
३१

ताद्येव शक्तिस्वीकारेपि पश्चादिपदे पाधिविशिष्टव्यक्तौ तैरपि शक्तिस्वीकारेण तत्रैव तन्नियमावधारणात्। न
च प्रकृतिपदतात्पर्यविषय एव तदन्वय इति नियम इति वाच्यं। लक्षणोच्छेदापत्तेः। गौरवाच्च। न च [illegible]
पचतीत्यत्र यथाक्षेपलभ्येनैव कर्त्रा[illegible]त्वान्वयः तथाक्षेपलभ्यव्यक्त्यापि तदन्वयः स्यात् तौ द्वयोर्नि
यमस्य च तत्रैवाभ्यापि संकोचादिति वाच्यं। तत्रापि चैत्र इति पदमध्याहृत्यैवान्वयबोधस्वीकारात्। त
दिदमुक्तं। अयमेव ह्याक्षेपो यत्प्रथमांतपदोपस्थाप्यत्वं नापेति। असंकोचेनोपपत्तौ व्युत्पत्तिसंकोचे मा
नाभावाच्च। न ह्येवमयसंकोचे [illegible]त्रापि सःव्यु। न्यूनवृत्तिमात्रोच्छेदापत्तेरिति। यत्तु गोपदस्य गोत्वेन श
क्तिः व्यक्तौ तु लक्षणेति मंडनमिश्राः। जातावर्तित्वं नास्ति येन हि कश्चिद्विवक्ष्यति। नित्यत्वात् न
क्ष्यमाणायां व्यक्तौ तु विशेषणे इति। अस्तित्वनास्तित्वे उत्पत्तिविनाशौ गोरूपस्य गौर्न श्वेतो दो
गोत्वस्यानित्यत्वेनोपपद्यविना शब्दोरस ११ बाध्यक्तौ लक्षणा तात्पर्यज्ञानसत्वे गंगायां घोष इत्यो
सा इत्यत्रेव प्रयोगपदबोधे मानाभावादिति तन्न। शक्यादन्येन रूपेण ज्ञाते भवति न
वृत्ति ५ क्षणा। यथा गंगायां घोष इत्यत्र तीरत्वेन ज्ञाते न ह्यत्र व्यक्तिर्गोत्वादतिरिक्तेन रूपेण ज्ञाता
वच्छिन्नत्वेन सास्नादिमत्वेन ज्ञाते च तेनैव शाब्दबोधापत्तिः। लक्ष्यतावच्छेदकरूपेणैव ल
क्ष्यत्वभानं नियमात्। किं च जातिमात्रे शक्तिः व्यक्तौ लक्षणेति तदा स्याद्यदि जातिमा रू
मात्रे मुख्यप्रयोगः। न चैवं किं च गोपदस्य गौरस्तीत्यादौ मुख्यार्थान्वयानुपपत्त्या तावदेव २

भूरिप्रयोगः = १

णा १ लक्षणायां मानाभावाद्व्यक्तिबोधानुपपत्तिश्चेति ध्येयं। तस्मादिति। अन्यविधाक्षेपस्य दुर्वचत्वादित्यर्थः। त
मानेति। एकज्ञानविषयत्वेनेत्यर्थः। इदमेवाविशदयति। यावतीति। व्यक्तिप्रसक्तिं विना जातिप्रत्य
क्षाभावेन तत्रैव तन्नियमावधारणादित्यर्थः। ननु प्रत्यक्षस्थले संयुक्तसमवायादिरूपजातिप्रत्य
क्षसामग्रीसत्वे संयोगादिरूपव्यक्तिभानस्य सत्वादस्तु तथा शाब्दे तु कथमेवमित्याशंकते। इ
द्येवेति। समानवित्तिवेद्यमित्यर्थः। जातिभानेति। जातिविषयकशाब्दबोधे जातिशक्तिज्ञान
स्य हेतुतया तत्कालीन जातिशाब्दबोधे ज्ञायमाने व्यक्तिरपि भासते। तत्पदजन्यविषयकशाब्द
शक्ति ७ बोधे प्रयोजके तत्पदनिरूपितजातिमत्वस्य हेतुत्वादित्यर्थः। इदं तु गुरुमते कृप्तशक्तिस्वीका
रे बोध्यं। तथाहि। तन्मते जातौ व्यक्तौ च शक्तिः परे तु जातिविषयकशक्तिज्ञानमेव जाति
विशिष्टव्यक्तिविषयकशाब्दबोधे कारणं। व्यक्तिशक्तिस्तु स्वरूपसदुपयुज्यते। न च जातिवि
शिष्टव्यक्तिशाब्दबोधे व्यक्तिशक्तिज्ञानमेव कारणं। जातिशक्तिस्तु स्वरूपसदुपयुज्यत इत्ये
व किं न स्यादिति वाच्यं। तथा सति देशान्तरस्थगोविशेष्यकशक्तिज्ञानाभावेन तद्बोधानापत्तेः।
एवं च घटादिबोधाप्रतिरोधेन। तत्पदशक्यविषयकशाब्दबुद्धिं प्रति तत्पदनिरूपितजा
तिशक्तिज्ञानत्वेन कारणत्वादिति कृप्तशक्तिवादनिष्कर्षः। ननु कृप्तशक्तिवादिमते व्यक्ति
शक्तिज्ञानस्याहेतुतया तत्स्वीकारप्रयोजनाभावः। न च तथा सति जातिविषयकशाब्दत्वमेव

जातिशक्तिज्ञानस्य कार्यतावच्छेदकत्वं चोपपत्तावुक्ता च व्यक्तिरपि भासत इत्येवोध्येयं। तथा च घटादेरपि भानापत्तिः।
आकाङ्क्षासत्त्वाविशेषात्। मन्मते च तत्पदशक्यविषयकशाब्दत्वस्यैव कार्यतावच्छेदकत्वेनानुपपत्तिस्या-
दिति वाच्यं। जातिप्रकारकव्यक्तिविशेष्यकशाब्दबोधं प्रति जातिविषयकशक्तिज्ञानत्वेन कारणत्वे क्ष-
तिविरहादित्यत्र त्वं कुत्र शक्तिवादिमतेनेत्यत आह। यद्वेति। तथा चेष्टापत्तिरिति भावः। कुत्र शक्ति-
वादस्यैकदेशीनादिमतेनेति न तदस्वीकारे तेषां सिद्धान्तविरोध इति भावः। जातिशक्तिरेवेत्येवका-
रेण व्यक्तौ कुत्र शक्तेः स्वरूपसदुपयोगित्वव्यवच्छेदः। अन्यशक्यतया जातिशक्यतया। अन्यबोधने
तत्पदशक्यव्यक्तिबोधने। अतिप्रसंगः। घटादिबोधनप्रसंगः तत्पदशक्यत्वाविशेषात्। मन्म-
ते च व्यक्तेरपि तत्पदशक्यतया व्यक्तिबोधनेन न कापि क्षतिरिति भावः। उत्तरयति। गोत्वशक्त्यादि-
ति। गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन कारणतया न घटादिबोधा-
पत्तिरिति भावः। ननु गोत्वप्रकारकगोविशेष्यकशाब्दं प्रत्येव गोत्वशक्तिज्ञानस्य कारणत्वमुपेय-
ते घटत्वप्रकारकघटविशेष्यकशाब्दबोधं प्रति तु नेत्यत्र विनिगमकाभावः। उक्तशक्यत्वाविशेषा-
दित्यत आह। अन्यथानुपपत्त्येति। गोपदात् गोत्वविशिष्टस्यैव बोधः न तु घटत्वादिविशिष्टस्येति
फलानुपपत्त्येत्यर्थः। तथैव गोत्वविशिष्टशाब्दबोधं प्रत्येव कल्पनात् गोत्वशक्तिज्ञानस्य हेतु- कत्व

२२

त्वेकल्पनात् एवकारेण घटादिशाब्दबोधं प्रति तु न तथा हेतुत्वकल्पनं फलाभावादिति सूचितं । अथ यावद्वैकु
ब्जशक्तिवादिमते स्वरसभ्रकारापत्ति अन्यथेति । अन्यथा कुब्जशक्तिं स्वीकृत्य व्यक्तिबोधोपपादने अनुपप
सा उपपत्त्यभावे न व्यक्तौ कुब्जशक्तिस्वीकारे प्रयोजनविरहेण तन्मते प्रमाणाभावेनेति यावत् । न चैवं गो
त्वविशिष्टबोधं प्रत्येव कल्पनात् गोत्वशक्तिज्ञानस्य हेतुत्वकल्पनादित्यर्थः । वस्तुतस्तु जातिभानस्य सा
मग्र्या एव व्यक्तिभानसकृत्वादिति । अग्रे च जातिशक्तेरेव व्यक्तिबोधकत्वेति ग्रंथपर्यालोचनया कुब्जशक्ति
वादमादाय । यद्वा पूर्वग्रंथसंगमने गोपदस्य व्यक्तौ शक्तस्य पक्षाद्वैन तथात्वतो लमिम [illegible] दूषणदा
न [illegible] स्य पदापूर्वत्वकल्प्ये संभवितया चनैवं व्याख्येयं । नच यद्वेति निष्कृष्टमते एवलेपात
तीति दूषणदानमिति वाच्यं संदर्भस्वरसभङ्गेरपरिहारात् । किंचान्यथैव । तथाहि जातिभानेति । जाति
शक्तस्यैव जातिशक्तिज्ञानस्यार्पितावच्छेदकं जातिभानेन च जायमाने व्यक्त्याविषयकस्य तस्मा
भावात् व्यक्तेरपि भानतत्ते यद्विषयेन विनान भानतत्ते तद्बोधकस्य तद्बोधकत्वमिति नियमात्
जातिभानस्य सामग्र्या एव तद्बोधोपधायकत्वादित्यर्थः । ननु जातिविषयतां विनापि व्यक्तिप्र
सक्तोदयात् जातिभानस्य सामग्र्यतिरिक्ता व्यक्तिभानस्य सामग्र्यवश्यमनुपेया । न च शाब्दस्थले
तथानियमः । तथापि जातिभानस्य सामग्र्याः व्यक्तिबोधोपधायकत्वे ततो घटादेरपि कुतो
न बोधः । नच व्यक्तिबोधे समानवित्तिवेद्यत्वमेवानियामकमिति वाच्यं । नहि व्यक्तिबोधेत्व

न्यायकौ.प्र.टी.
२३

मानाभिन्नविषयत्वेन कारणता। तथा च व्यक्तिविषयतायाः कारणनियम्यत्वावच्छेदकत्वे व्यक्तिशक्तिज्ञानमेव
कारणं स्यादित्यस्वरसादाह। एवेति। जातिशक्तेरेवेत्येवकारेण व्यक्तिशक्तिर्व्यवच्छेदः। तथा च व्यक्ति
विषयतायाः जातिशक्तिज्ञानकार्यतावच्छेदककोटौ निवेशात् तस्याः कारणतानियम्यत्वमपि निष्प्रमाणः।
गोत्वशक्तिज्ञानस्य घटबोधं प्रत्येव हेतुत्वसंभवान्नानिष्टमत आह। अन्यथेति। गोपदजन्येव बोधो न
तु घटादेरतो गोशाब्दं प्रत्येव हेतुत्वकल्पनादित्यर्थः। एवं न तु व्यक्तिशक्तेरेव जातिविशिष्टबो
धिहेतुत्वं किं न स्यात्। तन्मते तत्पदशक्यतायाः व्यक्तेरिव नन्वेतेऽपि जातेर्धर्मैवाध्यक्षाभावादित्य
त आह। अन्यथेति। अथवा ननु तत्पदशक्यबोधने प्रसंगात् जातिविशिष्टशक्तेरेव बोधकत्वे
च मास्तामित्यत आह अन्यथेति। व्यक्तिशक्तिज्ञानकारणत्वे देशान्तरस्य गोबोधानुपपत्तौ हि जाति
शक्तिज्ञानत्वेनैव हेतुत्वकल्पनादित्यर्थ इति बोध्यं। तथा सतीति जातावेव शक्तिस्वीकारे गो
त्वविशिष्टविषयकशाब्दबोधं प्रत्येव गोत्वविषयकशक्तिज्ञानत्वेन हेतुत्वस्वीकारे इत्यर्थः। गो
प्रसक्तीति। गोत्वपदस्यापि गोत्वेन ज्ञानत्वेन गोपदगोत्वपदयोरविशेषात् गोत्वविशिष्टशाब्दबोधा
पत्तेरित्यर्थः। नन्वागोत्वं गोपदशक्यमिति निर्धर्मितावच्छेदककगोपदशक्तिज्ञानं गोत्ववि
शिष्टबोधे हेतुः गोत्वत्वधर्मितावच्छेदकगोत्वपदशक्तिज्ञानं गोत्वत्वरूपेण गोत्वप्रका

ति ७

रा ३

कृष्ण
२३

96

ब्दबोधे हेतुरिति कल्पनान्नातिप्रसंग इति वाच्यं । गोत्वेन गोपदशक्यमिति बाधकालेपि निर्धर्मितावच्छे
दकशक्तिज्ञानसंभवेन गोत्वविशिष्टशाब्दबोधापत्तिरिति गोत्वत्वधर्मितावच्छेदकशक्तिज्ञान
हेतुतायाः आवश्यकत्वात् । एवं च गोत्वत्वस्य शक्यतावच्छेदकत्वावेरपकतया तदपेक्ष्य गोत्वजातेरे
व तथात्वमुचितमित्यपि लाघवमवसेयं । अथ गोत्वे निरवच्छिन्नैव शक्तिः गोपदं गोरित्याकारकश
क्तिसंबंधेन स्वरूपतः गोत्वप्रकारकगोपदत्वावच्छिन्नविशेष्यकशक्तिज्ञानं गोत्वविशिष्टबोधे
हेतुरिति न ~~शाब्द~~बाधकाले शाब्दबोधापत्तिः । गोत्वपदं गोत्ववदिति गोत्वत्वेन गोत्वप्रकारकशक्ति
ज्ञानेन च गोत्वशाब्दबोधे हेतुरिति न गोत्वमस्तीयतो गोत्वविशिष्टबोधापत्तिरिति चेत् । तथापि गो
पदात्कदाचित्समवायेन गोत्वविशिष्टशाब्दबोधः कदाचिच्च कालिकादिसंबंधेन तद्वि
शिष्टबोध इति नियमानुपपत्तिः । गोत्वविषयकशक्तिज्ञानस्यापि विशिष्टत्वोदस्यन्यतत्सम
वायेन गोत्वविशिष्टशाब्दबोधं प्रति समवायेन गोत्वविशिष्टशक्तिज्ञानस्य हेतुत्वेनानुपपत्तेरभावात्
नच तात्पर्यज्ञाने नियमात्तथा नियमः । तथात्व लिङ्गातावपि शक्तिस्वीकारे सर्वोत्तनविरहात् एवं गो
• संगोपदशक्यमित्याकारकस्यैव शक्तिज्ञानस्य तद्धेतुत्वोपगमेन न सिद्धांतभंग इत्येति । तथापु
पाधिप्रवृत्तिनिमित्तस्थले सैवरूपोपाधिविशिष्टशक्तिस्वीकारात् । [illegible]थापगुपदस्यत्वोमल्लो

व

त्वविशिष्टे शक्तिः तथा जातिविशिष्टेपि अनुभवस्य तुल्यत्वात् । न च जातेर्व्यक्तिवित्तिवेद्यत्वे नियमा द्यक्तेर्भा
नमुपायौ तु तादृशनियमाभावात् व्यक्तिबोधार्थमुपाधिविशिष्टे शक्तिरिति वाच्यं । नहि नियमबला
देव व्यक्तेर्भानं कारणनियम्यत्वात्कार्यस्य तथा च जातिविशिष्टबोधे जातिशक्तिज्ञानस्य कारणत्ववदुपाधि
विशिष्टबोधेऽपाधिशक्तिज्ञानस्यापि कारणत्वस्य सुवचत्वादिति दिक् । कुब्जौवादिनस्तु जातौ व्यक्तौ च
शक्तिः । परं तु जातिविषयकत्वेनैव ज्ञाता शक्तिः । व्यक्तिविषयकशाब्दबोधे कारणं व्यक्तिशक्तिस्तु फल
पलत्वदुपयुज्यते । न चैवं व्यक्तिशक्तिस्वीकारे वैयर्थ्यमिति वाच्यं । तस्य तादृशस्यापि भाने पदादे
रपि भानप्रसंगेन व्यक्तिशक्तिस्वीकारस्यावश्यकत्वात् तथा च गोत्वप्रकारक गोविशेष्यकशाब्द
बोधं प्रति गोत्वविषयक गोपदशक्तिमती गौरित्याकारक शक्तिज्ञानं हेतुः । न तु गोत्वविशिष्ट
विषयक गोपदशक्तिमती गौरित्याकारकं । गोत्वमस्ती त्यादौ कृतादृशगोत्वप्रकारकशक्तिज्ञाना
भावान्न गोत्वविशिष्टबोधापत्तिरित्याहुः । तदसत् । गोत्वविषयक गोपदशक्तिमती गौरित्याका
रकस्य गोत्वविषयकशक्तिज्ञानस्य हेतुत्वे गोत्वविषयकत्वस्य कारणतावच्छेदककोटौ निवेशे
गौरवात् । अन्यथा तु गोत्वविषयकत्वानिवेशात्तत्वादि गोपदशक्तिमती गौरिति गोत्वप्रकारक
शक्तिज्ञानत्वेनैव गोत्वविशिष्टशाब्दबोधं प्रति हेतुता न चैवमपि विवाद इति वाच्यं । व्यक्तिविष
मतायाः कारणतावच्छेदककोटौ न निवेश इत्येन तन्मतनिष्कर्षात् । देशांतरस्थगोबोधानुपप

त्तस्त

स्यो समानविशेष्यकत्वेन कार्यकारणभावासंभवेन लाघवेन च समानप्रकारकत्वेनैव कार्यकारणभावोपगमा
दिति चेन्न । व्यक्तिविषयतायाः कारणतावच्छेदककोटावनिवेशे व्यक्तौ शक्तिस्वीकारवैयर्थ्यात् न च
तदस्वीकारे गोत्वप्रकारकशक्तिज्ञानत्वेनैव हेतुत्वासंभवः व्यक्तौ शक्त्यभावेन शक्तिज्ञानस्य भ्रमत्वाप
त्तिरिति वाच्यं । शक्तिर्हि न स्वरूपसती शाब्दबोधे हेतुः अपभ्रंशादपि शाब्दबोधोदयात् किंतु ज्ञाता
तथा च यदंशे शक्तिज्ञानं हेतुः तदेव शाब्दमिति जाति न व्यक्तिवैशिष्ट्यं च शाब्दमेव । अन्यथा व्यक्ता ब५
वेव शक्तिः शक्तिज्ञाने च जातेरपि प्रकारत्वात् समानप्रकारत्वेनैव कार्यकारणभाव इति जातावेव श
क्तिरुच्छिद्येत । न च यद्विषयकत्वेन शक्तिज्ञानं हेतुः तदवच्छेदेन शाब्दमिति नियमात् । जातावपि
शक्तिरिति वाच्यं । तर्हि यद्विषयकत्वेन शक्तिज्ञानस्य हेतुता तदेव शाब्दमिति नियमेन व्यक्तिवि
षयकत्वेन शक्तिज्ञानस्य हेतुत्वमेव व्यक्तिशक्तिस्वीकारौचित्यादिति दिक् । नैयायिकमतं दूषयि
ति । तस्मादिति । गोत्वाविशिष्ट इति । जातौ व्यक्तौ वैशिष्ट्ये च शक्तिरित्यर्थः । तृतीयोपस्था
प्यकरणत्वेऽपि यतिव जातौ व्यक्तौ च विशकलिततया शक्तौ गोत्वं व्यक्तिश्चेति बोधप्रसंगात् । न
तु गोरिति तथा च वैशिष्ट्येऽपि शक्तिः एवमवयवसंयोगविशेषरूपाकृतौ तद्वैशिष्ट्ये च गोपदशक्तिः
गोपदाज्जात्याकृतिविशिष्टस्यैव प्रतीतेः । तदुक्तं जात्याकृतिव्यक्तयः पदार्थ इति एकत्वोक्तिसूच शा२
नाय पदार्थ इत्येकवचनं । ननु तत्प्रकारकतद्विशेष्यकशाब्दबोधं प्रति तत्प्रकारकतद्विशेष्यकशा

क्तिज्ञानत्वेन हेतुत्वमित्याशयात् । तच्च शक्तिस्वरूपविशेषस्यागृहीतत्वाद्बोधानापत्तिरूपबाधकग्रस्तमित्याशंकते । नचेति । उक्तदोषः शक्तिज्ञानताविषयीभूतव्यक्तिबोधानापत्तिरूपदोषः समाधत्ते गोत्वेति । तथाच सर्वत्रापि शक्तिग्रहाच्छक्तिग्रहाविषयव्यक्तेरलीकतया न तद्बोधानुपपत्तिरिति भावः । सामान्यलक्षणानङ्गीकारेप्याह । अस्तु वेति । एकत्रैव लौकिकसाक्षात्कारविषय एव । अन्यगवीति । शक्तिग्रहाविषयगवीत्यर्थः । ननु योग्यताबलात् किंच ग्रहाविषयव्यक्तेरपि ज्ञाने बाधकाभावस्तत्राह । अन्यथेति । अतिप्रसंगः । गोपदाद्घटादेरपि बोधप्रसंगः शक्तिग्रहाविषयत्वस्याविशेषादिति भावः । प्रस्तावपद इति । गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रति गोत्वप्रकारकगोविशेष्यकशक्तिज्ञानत्वेन हेतुतया न घटादिबोधापत्तिः । एवं तत्त्वज्ञातेनापि गोर्निर्विकल्पः । इदन्तु गोत्वेनैवेति द्रष्टव्यं । नन्वेवं कस्य प्रवाहत्वं बाधस्य तीरतीरत्वयोरभावाद्संबंधरूपायां लक्षणायामेकस्याः लक्ष्यतावच्छेदकत्वस्य परस्परमविलेपाल्लक्ष्यतावच्छेदकविशिष्टे लक्षणायामनंगीकारेण गंगायां घोष इत्यादौ तीरत्वस्यानुपस्थापितस्यापि तीरत्वस्य शाब्दबोधे भानं च तीरत्वस्य लक्ष्यतावच्छेदके शक्त्यभावेपि तादृशकार्यकारणभावबलादेन गोत्वभाननिर्वाहकत्वं तच्च शक्तिकल्पनेनेति संप्रदायमते । स्वरसं प्रकाशयन्नव्यमतमाह । गृव्येवेति । गौरवात् । केवलव्यक्तौ शक्तिस्वीकारे येनोपपत्तौ जातिविशिष्टव्यक्तौ शक्तिकल्पने गौरवादित्यर्थः । नन्वेवं नामीति । एवं गोत्वेनाशक्यस्य स्वीकारे घटादेरपि बोधप्रसंगाच्छक्यस्य शक्तिविषयतया गोत्वबोधानापत्तिरित्यर्थः । गोत्वेति । गोत्वविशिष्टशाब्दबोधं प्रति गोत्वधर्मितावच्छेदक

कत्व

वशक्तिमत्त्वस्य हेतुत्वे नातिप्रसंगादित्यर्थः। गोत्वएव शक्तिस्वीकारे गोत्वस्य धर्मितावच्छेदकत्व शक्तिमत्
स्य हेतुत्वतया गौरवाद्व्यक्तावेव शक्तिरिति ध्येयं। ननु जातिविशिष्टशक्तिस्वीकारेण शाब्दे व्यक्तिभा
नोपपन्नावपि वाक्यार्थरूपान्वयस्यापि शाब्दविषयत्वापातात् अपि शक्तिराहित्यात्। न चेष्टापत्तिः।
जात्याकृतिव्यक्तयः पदार्थ इति अक्षपादीयसूत्रविरोध इति संप्रदायमतेऽसंगतेः। स्यादेतदिति। न
न्वयबोधविशिष्टस्यैव सत्त्वात् आह तस्येति। जातिविशिष्ट एव शक्तिस्वीकारादित्यर्थ इति भावः। ननु
योग्यताबलात् सोऽपि भासत इत्यत आह। नन्वेति। अतिप्रसंगात् घटादेरपि बोधप्रसंगात् गो
शक्तं हीति। इतरपदसमभिव्याहृतगोपदमित्यर्थः। गवान्वयेति। न च गोः शुक्लरसत्त्वाभिभे
दः गामानयेत्यत्रान्वयविरहः सत्त्वे गौर्धावति इत्यत्र सत्त्वाकांक्षानियामकत्वम् इति वाच्यं। अन्वयबोधे
समानविषयकत्वेन तत्पदसमभिव्याहाररूपानुपूर्वीज्ञानस्यान्यत्र च तत्तत्पदानुपूर्वीज्ञानस्य हेतु
त्वादिति भावः। पदानां ज्ञाताभिधारूपाशक्तिः आक्षेपेण च व्यक्तेर्लाभः अन्वयस्य चाक्षेपेण
लाभस्तत्संभवात् अन्वयबोधने नातिप्रसंगादन्वयेऽपि शक्तिः। इयं च ज्ञातावन्विते वाक्याभिधारूपा
शक्तिरिति भट्टमतं दर्शयति। भट्टास्त्विति। अन्वयविशिष्टे शक्तिग्रहादभिधारूपा शक्तिर्न
तात् अन्वयेऽपि वाक्यार्थरूपान्वयेऽपि शक्तिरेव अभिधारूपा शाब्देरेव। अन्वयस्येति। गोः शुक्ल
इत्यत्र वाक्यार्थरूपान्वयस्येत्यर्थः। अन्यलभ्यत्वात्। अन्वयविषयशाब्दबोधे तत्तत्पदानुपू

(51)

उ नन्वन्यलभ्यत्वेऽपि शक्तिरावश्यकीत्यत आह अन्यथेति। अन्यथा शक्यस्यैव
शाब्दविषयत्वमिति नियमा उ

वीज्ञानत्वेन हेतुतया तद्बलादेवान्वयभानोपपत्तिरित्यर्थः। अन्वयविशेषभानार्थं तत्तत्पदानुपूर्वीज्ञानं हेतुता
यास्तस्याप्यावश्यकत्वादिति भावः। नन्वन्यलभ्यत्वेऽपि शक्तौ बाधकाभाव इत्यत आह। अनन्यलभ्यो हि शा
ब्दार्थत्वात्। शाब्दबोधकार्थत्वादित्यर्थः। ननु शक्यस्यैव शाब्दविषयत्वमिति नियमात्तत्रापि शक्तिः कल्प्यते ल
क्षणेति। लक्षणया तीरबोधोपपत्तिरित्यन्यलभ्यत्वात्तत्र न शक्तिः। शक्यस्यैव शाब्दबोधविषयत्व
६४ मिति नियमे तु तीरेऽपि गंगापदे शक्तिप्रसंगेन लक्षणोच्छेदापत्तेरित्यर्थः। इदमुपलक्षणं। अन्वितेऽपि श
क्तिस्वीकारे अन्वितत्वेन पदार्थोपस्थितेः अन्वयप्रकारकशाब्दबोधस्य स्यात्। न त्वेतदनुभवसि
द्धं। नन्वन्विते शक्तिः स्वरूपसदुपयुज्यते न तु ज्ञाता। ज्ञाता तु ज्ञातैवोपयुज्यते इति तन्मतनिष्कर्ष इ
ति चेन्न। यद्विषयकत्वेनैव ज्ञाता शक्तिरनुभवहेतुः तत्रैव शक्तिरित्यन्वये शक्तिस्वीकारवैयर्थ्यात्। घ८
शक्यस्यैव शाब्दविषयत्वमिति नियमस्य च लक्ष्ये व्यभिचारादिति रहस्यमनुसंधेयम्। केचित्तु भट्ट
मते ज्ञातावेवाभिधारूपा शक्तिः। अन्वितविषयकशाब्दत्वावच्छिन्नं प्रति घटपदसंकेतज्ञानस्य का
रणतेति घटपदादौ अन्विते आनुभाविकी शक्तिः। नैयायिकमते आनुपूर्वीज्ञानस्यैवान्वितशा
ब्दत्वं कार्यतावच्छेदकं। भट्टमते घटपदसंकेतज्ञानस्येति मतभेदः। अन्वयविशिष्टे शक्तिग्रहा
त्। बालेन घटपदेऽनुभविकशक्तिग्रहात्। शक्तिरेवानुभाविकशक्तिरेव। अन्वितविष
यकशाब्दत्वं घटपदसंकेतज्ञानकार्यतावच्छेदकमित्यर्थः। अन्यल[illegible]भ्यत्वात्। अन्वित कृस

दा१ २९

शाब्दत्वस्यानुपूर्वीज्ञानकार्यतानवच्छेदकतया तत्कोटिप्रविष्टत्वात्। अनन्यलभ्यस्य च आनुपूर्वीज्ञानादिरूपप्रकारान्तरालभ्यस्य च शाब्दार्थत्वात्। घटपदशक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टत्वादित्यर्थः। तथा चान्वयविशेषशाब्दत्वस्यानुपूर्वीज्ञानकार्यतानवच्छेदकत्वावश्यकत्वेऽन्यपदविषयकशाब्दत्वस्य घटपदशक्तिज्ञानकार्यतावच्छेदकत्वे मानाभावादिति भावः। ननु शक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टस्यैव शाब्दविषयत्वमिति नियमात्तथेष्यत आह। अन्यथेति। तादृशनियममनभ्युपेत्य तथाकल्पने लक्षणेति। तादृश नियमानभ्युपगमे तीरविषयताया अपि गंगापदशक्तिज्ञानकार्यतावच्छेदककोटिनिवेशेन तत एव तीरभानोपपत्तेस्तत्र लक्षणास्वीकारो निरर्थकः। वृत्तिर्हि न स्वरूपसदुपयुज्यते किन्तु ज्ञातेनेति व्याचख्युः॥ तत्संदर्भविरोधादुपेक्षणीयं। प्राभाकरास्त्विति। कार्यान्विते कृतिसाध्यानयनाद्यन्विते इत्यर्थः। तत्प्रयोजकतया। प्रवृत्तिप्रयोजकतया। कार्यताविशिष्टज्ञानमिति। कार्यता। कृतिसाध्यता। तद्विशिष्टविषयकज्ञानमित्यर्थः। अनुमिनोतीति। प्रयोज्यस्येति शेषः। अयं घटानयनगोचरकार्यताविशिष्टज्ञानवान् घटानयनगोचरप्रवृत्तिमत्त्वात् स्तनपानगोचरप्रवृत्तिविशिष्टमद्वदित्यनुमानाकारो बोध्यः। अप्रयोजकत्वमाशंक्याह। स्वप्रवृत्त्याविति। स्वप्रवृत्तौ स्वीयस्तनपानगोचरप्रवृत्तौ। तेन बालेन। कार्यताविशिष्टज्ञानस्य। कृतिसाध्यत्वविशिष्टज्ञानस्य। हेतुत्वावधारणादिति। तथा च कार्यकारणभावग्रह एवानुकूलतर्क इति भावः। तद्धेत्वाकांक्षायां। कार्यताविशिष्टज्ञानकारणजिज्ञासायां। शाब्दमेव। घटमानयेति शाब्दमेव। तथा कार्य

53

सविशिष्टज्ञानहेतुत्वेन तन्निर्वाहकत्वं। यद्वि कार्यत्वविशिष्टज्ञानोपधायकत्वे निर्वाहकत्वं। कार्यान्वितइति। यद्यपि घटानयनगोचरप्रवृत्तौ घटानयनगोचरकार्यताविशिष्टज्ञानत्वेनहेतुत्वं न तु कार्यान्वितज्ञानत्वेनेति कार्यान्विते शक्तौ बीजाभाव: तथापि न कृतित्वं कार्यमितिज्ञानात्प्रवृत्ति: किंतु घटानयनं कार्यमितिज्ञानात्कार्यताविशिष्टज्ञानं कार्यान्वितज्ञानमेवेति तत्र शक्ति:।१। नयनानुकूलितपदविभागस्य घटमानयेति वाक्यस्य कार्यताविशिष्टज्ञानजनकत्वं कार्यान्वितशक्त्यैव निर्वहति। अन्यथेकृपदस्यैव कार्यत्वविशिष्टे शक्तौ इतरपदस्य वैयर्थ्यात्। कार्यान्वितशक्तौ सर्वेषामपि कार्यताविशिष्टज्ञानजनकत्वंसंभवेति। कार्यताविशिष्टज्ञानस्य प्रयोजकत्वेच कार्यान्वितज्ञानस्यापि प्रवृत्तिप्रयोजकत्वानपायात् कार्यान्वितएव शक्ति:। नच कार्यतावाचकलिङादीनां कार्यान्वितशक्तत्वासंभव इति वाच्यं। सर्वपदानां कार्यान्वयपरत्वालिङ्गोचरज्ञानजनकत्वात् तच्च कार्यान्वितस्यार्थप्रतिपादकतया इतरान्वितकार्यप्रतिपादकतया वेति। तथाच कार्यान्वितान्वयपरत्वाल्लिङं कार्यं तद्भिन्नेऽन्यविशिष्टमिति सर्वत्र कार्यान्विते एवशक्तिरिति लाघवं इत्यर्थ:। अत्र वाच्यो वाच्यां तेनाह सागाभ्यां। प्रत्ययेति। शाब्दज्ञानमात्रे कार्यान्विते ज्ञानजनने निर्वाहकशक्तिकल्पनानुरोधादित्यर्थ:। ननु लाघवात्तथात्वमस्तु तत्राह। आघेवि। शाब्दसामान्ये कार्यान्विते शक्तिप्रन्वयताया: विरोधापत्तेरित्यर्थ:। शाब्दसामान्यस्य कार्यान्वितएवशाब्दत्वे यच्च तेविचे

रेयप्रामाण्यं नतर्थवादस्येति दर्शयति । इत्थं चेति । शब्दसामान्ये कार्यान्वितशक्तिर्वै चेत्यर्थः । यत्र भूतले घटोस्तीत्या
दौ । अकार्यतावाचकेति । कार्यतावाचकपदं लिङ्लोट्तव्यः पंचमलकारः । रूसो[illegible]न्वेति विधिप्रत्ययास्तत्स
मभिव्याहारो नास्तीत्यर्थः । विध्यसमभिव्याहृतं वैदिकवाक्यमर्थवादः । मूकस्येव शाब्दबोधानुपपत्त्य
रूपेण । ननु तर्हि प्रवर्त्तकज्ञानाभावात्प्रवृत्त्याद्यनुपपत्तिरत आह व्यवहारस्येति । प्रवृत्तेरित्यर्थः ।
असंसर्गेति । असंसर्गग्रहाभावात् बाधाभावबलादिति यावत् । नन्वेवं सर्वत्र प्रवृत्तिं प्रति विशि
ष्टज्ञानस्य हेतुत्वानभ्युपगमादिति भावः । ननु शब्दसामान्यस्यैव कार्यान्वितशक्ततया कार्यान्वितज्ञा
नजनकस्यैव च शाब्दबोधहेतुतया विधेरिव शब्दसामान्यस्यैव कार्यतावाचकपदत्वापत्त्यर्थं । सिद्धार्थपरा
र्थवादानामप्रामाण्यमित्याशंकते । नन्विति । कार्यान्वितेति । कार्यताविशिष्टान्वितेत्यर्थः । कार्यताविशि
ष्टान्वितवाचकत्वादिति यावत् । तथा च वैदिकापतौ वाचकपदेत्यर्थः । विधेरिव पदसामान्य
स्यैव कार्यतावाचकपदत्वादिति भावः । असंगतं चेति । सर्वस्यापि कार्यतावाचकपदत्वात् कार्यता
वाचकपदासमभिव्याहारप्रयुक्तमप्रामाण्यमर्थवादस्ये[illegible]त्यर्थः । अत्र यद्यपि पदानां कार्यान्वि
तेऽभिधारूपैव शक्तिः घटादिपदात्कार्यान्वितघटत्वादिनैव पदार्थोपस्थितिः घटादिपदेन का
र्यान्वितविषयकशाब्दबोधजननीये इतराविशेषणतया कार्यत्वोपस्थापकलिङादिपदस्य सा
काङ्क्षत्वाच्च नास्ति बाधः अर्थवादस्य प्रामाण्यमिति कार्यान्वितेऽ क्रियापरशक्तिमादायार्थ

55

बादस्याप्रामाण्यमुपपादयितुं शङ्क्यते। तथापि कार्यत्वोपस्थितेः सर्वत्र हि घटादिपदानां कार्यान्विते ऽभिधानरूपवृत्तिः
सा च यस्यापेक्षणीया लिंगादिपदादेव ज्ञातेति सर्वघटादिपदानां कार्यान्विते ऽभिधानरूपशक्तिकल्पनेन। ए
वं कार्यान्वितत्वेन शाब्दबोधे अनुभवबाधश्चेत्तत्र अभिधानरूपशक्तिमुपेक्ष्य आनुभावकीं शक्तिमादाय
समाधत्से। अत्रोच्यत इति। आनुभाविकशाब्दानुभवजनिका। स्यादित्या। पदार्थस्मृतिजनिका। तत्रेति।
कार्यान्वितविषयकशाब्दत्वावच्छिन्नं प्रति घटपदज्ञानत्वेन कारणतेत्यर्थः। स्यादित्याद्येति। जातिशक्तिवादी
नबलात्केवलघटत्वजातिस्मृतिः शक्तिज्ञानस्योद्बोधोऽपि स्वविषयपदार्थस्मृतिहेतुत्वादिति भावः। ननु
कार्यान्वितबोधे घटादिपदज्ञानस्य हेतुतयातत्त्वे कथं नानुभवजनकत्वमत आह। कार्यत्वान्वय
बोध्ये इति। घ।टादिपदेन कार्यान्वितविषयकशाब्दबोधे जननीये कार्यतावाचकलिंगादिपदजन्योप
स्थितेः सहकारित्वादित्यर्थः। नार्थबाधस्येति। विशेषसामग्रीसत्त्वकृतापा एव सामान्यसामग्र्याः प्र
लोपस्थाने तत्रतया [illegible] कार्यत्वोपस्थापकलिंगादिपदाभावेन तज्जन्यकार्यत्वोपस्थितेः सहकारि
त्वाभावाच्छाब्दानुभवजनकत्वरूपप्रामाण्यं नार्थबाधानामित्यर्थः। लाघवात्कार्यान्वितघट
विषयकशाब्दत्वापेक्षया लाघवात्। घटादिमात्रेत्य[illegible]ति। घटविषयकशाब्दत्वावच्छिन्नं प्रत्येव
घटपदज्ञानत्वेन कारणत्वमहइत्यर्थः। नत्विति। ननु घटपदादेः कार्यान्वितविषयकशाब्दत्वं का
र्यतावच्छेदकमित्यर्थः। घटविषयकशाब्दत्वावच्छिन्नं प्रति घटपदज्ञानत्वेन कार्यत्वविषयक

शाब्दत्वावच्छिन्नं प्रति च लिङादिपदज्ञानत्वेन हेतुता। यत्र च लिङादिपदसमभिव्याहारः तत्र तादृशसम
भिव्याहारादेव कार्यान्वयबोधः। यत्र तु न तत्समभिव्याहारस्तत्रैव केवलं घटादेर्बोधो जैति अर्थवादस्या
पि प्रामाण्यमिति भावः। नन्वन्यलभ्यत्वेन स्वरूपसत्प्रतीति बोधकं व्युत्पन्नं यदि वाक्यं स्यात्तर्हि अन्यल
भ्यं न स्यादिति तत्स्थले नोपनीत। तथा च यत्र तन्नोपस्थितं तत्र कार्यान्विते शक्तिग्रहे बाधका
भावइत्याशङ्कते। प्रथमामिति। प्रथमं लिङादिपदस्य कार्यत्वे शक्तिग्रहात् सर्वत्र कार्यान्विते शक्तिग्रहोऽस्तु
घटपदज्ञानस्य कार्यान्वितविषयकशाब्दत्वं कार्यतावच्छेदकमस्त्वित्यर्थः। तत् अन्यलभ्यत्वं। घटमा
नैति। घटविषयकशाब्दत्वं कार्यतावच्छेदकमस्त्वित्यर्थः। सा कार्यान्विते शक्तिकल्पना बाध्यते। अप्रामा
ण्यग्रहविषयीक्रियते। गौरवात्। घटमात्रे शक्तिकल्पनापेक्षया गौरवात्। ननु सामान्यतः प्रथम
प्रवृत्तस्य कल्पनायाः प्राबल्यवत्त्वेन कल्पितबाध इत्याह। अत्रैवमिति। ननु प्रथमप्रवृत्तत्वस्य बलव
त्त्वप्रयोजकतया कल्पने बलवत्त्वमत आह। नहीति। शास्त्रादिति। शतयोजनश्चन्द्र इति चन्द्रपरिमाण
बोधकागमोऽपि शास्त्रादित्यर्थः। तथा च चक्षुरादिनाज्ञातस्वल्पतायां अप्रामाण्यज्ञानवदत्रापि
घटपदादेः कार्यान्वितघटादौ शक्तिज्ञानेऽप्रामाण्यं कल्प्यत इति भावः। ननु चन्द्रादौ शास्त्रजन्यप्रथम
हत्परिमाणज्ञानेन बाधात्तत्र स्वल्पपरिमाणज्ञानेऽप्रामाण्यं कल्प्यते। प्रकृते च प्रथमं कार्यान्वि
तघटादिशक्ति[illegible]कल्पने बाधकाभावात् तेन न तद्बाधः। असति बाधके प्रथमप्रवृत्तस्यैव बलवत्ते

57

तंत्रत्वादित्यत आह। चरमकल्पनापाइति। लाघवेति। कार्यान्वितघटादेः शक्तेरबाधेपि कार्यान्वितत्वविशिष्टघ
टत्वस्य घटत्वापेक्षया गुरुतया शक्यतावच्छेदकत्वासंभवेन कार्यान्वितघटत्वावच्छेदेन शक्त्यभावेन तेनरू
पेण तत्र शक्तिकल्पनेबाधकत्वादेव। तद्धर्मावच्छिन्नाभाववति तद्धर्मावच्छिन्नप्रकारकज्ञानत्वमेव भ्रम
त्वमितिभावः। ननु कंबुग्रीवादिमत्वं घटत्वापेक्षया गुर्विति गौरवज्ञानस्य सत्वेपि कंबुग्रीवादिमान्न
स्तीतिप्रतीत्युदयात् यथा गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमुपपद्यते तथा गौरवेपि प्रथमप्रवृ
त्त्वात्कार्यान्वितघटे शक्तिः स्यादेवेत्यत स्वरूपतस्तु दुर्ज्ञेनेति न्यायवन्नाह। किंचैवमपीति। एवं कार्यान्वितघ
टत्वादौ शक्तिकल्पने साक्षिलाभेन न च घटत्वसामान्ये तु न तदीये कार्यतावाचकपदजन्योपस्थितेः स्वहेका प ७
रित्वेचैत्सर्थः। अनुभवसिद्धत्वेन दुरपन्हुवत्वं सत्वितं। तस्यादीति। लिंगादिपदस्थलेकारणाभा
वादितिभावः। नन्वेति। पदार्थोपस्थितेः वाक्याभावमात्रादेव व्यवहारादितिभावः। तदापत्तेः।
गौ ५ असंसर्गाग्रहापत्तेः। कार्यादावनुभवसिद्धस्यापि संसर्गानुभवस्यापलापेनेष्टः तस्मादि
व्यवहारेपि अपलापप्रसंगादितिभावः। ननु विशिष्टापत्तिरत आह। तथाचेति। ननु प्रथमेव्यापी
क्षित्तेरनकाश्यपत्यारणात्। तत्सहकारिकार्यतावाचकपदरूपकारणाभावात्। विधिसमभि
व्याहारस्थलेतु बाधकाभावेन शाब्दानुभवस्यावोपपत्ते। भ्रमत एवशाब्दप्रामाण्यमपीत्यत आह
व्याहारस्थलेतु बाधकाभावेन शाब्दानुभवस्वीकारे स्यादिति।
किंचैवमपीति। एवं कार्यतावाचकपदसमभिव्या। हारस्थलेतत्वशाब्दानुभवस्वीकारे स्यादिति। कृष्ण
२ असंसर्गाग्रहएवोपपद्यते कारणाभावे कार्याभावस्यावश्यकत्वात्। विधिसमभिव्याहारस्थले २ २९

58

तादृशपदसमभिव्याहाराभावादिति भावः। ननु केषांचिदप्रामाण्येपि लिङ्समभिव्याहृतपदमादायेव शब्दप्रा
माण्यं स्यादेवेति ● तेषामप्रामाण्ये इष्टापत्तिरित्यत आह। तथा चेति। पुराणादीनामप्रमाणत्वांगीकारैस इ २
र्थः। मिश्रैः वाचस्पतिमिश्रैः। बुद्धबंधुरिति। बुधबद्धैर्न कस्यापि शब्दस्याप्रामाण्यमुपेयते। प्राभाकरैस्तु कस्य
चिच्छब्दस्य प्रमाणत्वांगीकारात्। न तदंतर्भूतत्वमित्यत उक्तं बंधुरिति। यथा लोरनुभवसिद्धोप्यनुभवोऽ
पलप्यते इति वेदस्याप्रामाण्यमुच्यते तथा पुराणादेरप्रामाण्यं तवेति सामर्थ्यं बोध्यं। एवं वेद[illegible]अनुभव नर ५
सिद्धेपि असंसर्गाग्रहमात्रं वदन्। नर्णव्यासः। रक्तरसत्तेकर इति लिपिसादृश्यं तकारमकारयोर्गौड
लिप्यासादृश्येन तत्वाभावेन तयोः सादृश्यं बोध्यं। कुतकमुसस्यापद् इति। अनुभवानुरोधेनैव सर्वं कल्पना।
तथा च लिङ्गाद्यसमभिव्याहृतस्थलेप्यनुभवस्यापलापानर्हत्वे न लाघवेन च घटत्वविशिष्टशक्ति
स्वीकरणमुचितमिति भावः। वस्तुतस्तु अतिप्रसक्तधर्ममादायान्वयव्यतिरेकग्रहासंभवात्सस
स्थले कार्ये सकारणतानवच्छेदकधर्मग्रहमंतरा कारणत्वग्रहासंभवेपि शब्देऽतिप्रसक्तधर्मसामा ना ६
नाधिकरण्येनापि तद्ग्रहः। यथा स्वर्गकामो यजेतेत्यादौ गंगास्नानादितोपि स्वर्गोदयात् स्वर्गत्वा
वच्छेदेन ० यागजन्यत्वासंभवेन वेतातस्य च प्रत्यक्षमनुपस्थितेः स्वर्गत्वयागत्वसामानाधिक
रण्येन कार्यकारणभावग्रहः। तथा प्रकृतेपि शब्दे ८ कार्यान्वितज्ञानजनकत्वं गृहीतं ननु कार्य
न्वितज्ञानतावच्छिन्नं प्रति तच्चेतरपदसहकारादेवोपपन्नमिति न कार्यान्वितशक्तिरिति। पदता

तर्कप्र· टी·
३०

वच्चतुर्विधं। रूढं योगिकं योगिकरूढं योगरूढंच। यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बोधः तद्रूढं। यथा गोपदं। यत्रावयवार्थ एव बुध्यते तद्यौगिकं। यथा पाचकादिपदं। यत्र योगिकरूढार्थयोःस्वातंत्रेण बोध्यः तद्यौगिकरूढं। यथोद्भिदादिपदं। योगिकं खनित्रे रूढं यागविशेषे। योगरूढं पंकजादिपदं। तत्र पंकजपदसमुदायः पद्मत्वविशिष्टे रूढ्योनवेति योगरूढौ विप्रतिपत्तिः। पंकजपदात्पद्मत्वविशिष्टं प्रती[illegible]तेऽप पद्मत्वविशिष्टे पंकजसमुदायस्य रूढिरावश्यकी पदान्तरपातोपस्थितेर्वृत्तिसाध्यत्वात् पंकजपदात् योगेन कुमुदस्यापि बोधप्रसंगाच्च। मन्मते कदाचित् कुमुदबोधस्तु लक्षणयैव ननु रूढिस्वीकारेपि उद्भिदपदेन खनित्रमिव पंकजपदात् कुमुदमपि बोध्येत योगसत्वात्। अत्र प्राचः। यत्र योगरूढिभ्यामेकार्थबोधस्तत्र केवलयौगिकार्थबोधे रूढेः प्रतिबंधकत्वान्न कुमुदबोध इति। तन्न मणिकृतः। रूढ्यानियमतः स्मृतं पद्ममेव कर्त्तृरूपव्यक्तिवाचकउद्भस येन पंकजनिकर्त्तृतयानुभाव्यते बाधकं विना व्यक्तिवचनानां लौहित्यादिविशेषपरत्वे[illegible]नियमात्। व्यक्तिवचनानां। किंचिद्व्यक्तितात्पर्यकाणां संनिहितः स्वयमनुपस्थित इत्यर्थः। तथा च पद्मे तात्पर्यसत्वेन पंकजनिकर्तृत्वमात्रतदेव योगेनापि प्रतीयते न कुमुदमिति रूढेर्न प्रतिबंधकत्वं तात्पर्याभावान्नवगाहित्वात् तन्न कृशानाविरोधित्वाच्च। लिङ्गैरनुमितिप्रतिबंधकत्वस्यानायसास्वीकारेपि

न्नि

दृष्ट
३०

60

अन्वयितानवस्यमणिमंत्रादिन्यायेन प्रतिबंधकत्वे मानाभावात् । इत्थं च पदानुभवसामग्रीसत्त्वात् पद्मस्यैव बोधो न तु कुमुदस्य सामग्र्याः सत्त्वेऽपि फलाभावेन प्रतिबंधकत्वकल्पनादिति वदंति । अत्रेदं चिंत्यते पंकजं कुमुदमानयेत्यादौ यत्र पंकजपदस्य पद्मे तात्पर्याभावः कुमुदे च तात्पर्यग्रहः तत्र लक्षणां विनैव कुमुदबोधापत्तिः पदानुभवसामग्र्या अविरहात् । पद्मे तात्पर्याभावनिश्चयस्यैव तत्र बाधकत्वेन बाधकं विना । व्यक्तिवचनानां सन्निहितविशेषपरत्वमिति न्यायस्य तत्रानवतारात् । घटेन जलमाहरेत्यत्र सच्छिद्रघटस्य प्रथमोपस्थितत्वाद् अन्वयधारणाय बाधकं विनैव स्वस्यान्वयकत्वात् । तथा च गृहीतपद्मप्रयोगस्य पद्मान्वयानुपपत्तिपुरःसरेण कुमुदधीरिति न स्यात् । कुमुदं पंकजमित्यत्र कुमुदस्यैव प्रथमसंनिहितत्वसंभवाच्च कुमुदस्याभिन्नपदोपस्थाप्यत्वेऽपि प्रथमोपस्थितिमात्रस्यैवापेक्षणीयत्वात् । अत एवापेक्षुपासमुदायस्य भिन्नत्वेन पद्मस्यापि भिन्नपदोपस्थाप्यत्वं च । अथ कुमुदबोधस्तत्र शक्त्यैवास्तां पंकजपदस्य कुमुदे लक्षणेति प्रवादस्तु कैश्चित्क्वापि प्रायेण तत्र योगरूढिभ्यां पद्मानुभवः तदनंतरं कुमुदे तात्पर्यसत्त्वानंतरमस्य तत्रोपस्थितये कुमुदे लक्षणा । इत्याद परं विशेषः । यत्संप्रदायमते सर्वत्र लक्षणा । मणिकृन्मते क्वचित्कीर्तिचेन्न । तत्रापि पंकजनिकर्षे एतस्य कुमुदे तात्पर्यग्रहकाले पुनः स्मृतपंकजपदे न शक्त्यैव कुमुदोपस्थापनसंभवात् । तस्य पद्मे तात्पर्याभावनिश्चयेन कुमुदे तात्पर्यनिश्चयसत्त्वेन च पद्मान्वयासंभवात् । अन्यथा लक्षणानापत्ते

रिति। यत्तु शक्त्यापुनर्नानापदतदर्थानुसंधानपक्षे वा स्वार्थविषयागुरूपस्थितिवत्त्वं लक्षणायां पंकजनिरूढत्वे स
स्वपदार्थतया लघूपस्थितिवत्त्वमिति। तन्न। पंकजन्मकर्त्तरि मानये यदि तदादौ वाक्यमात्रे न लक्षणापत्तेः
प्रसेयकशक्त्यैव योगरूढतादि वक्ता द्विविधबोधान्न लक्षणेति चेत्, तत् प्रकृतेऽपि समानं। तस्मादुपस्थितज्ञानं प्र
तिबंधकमुक्तरूपमेव लक्षणासंभवे विरोध्यविषयत्वेऽपि सिद्धेरनुमितावपि रूढिज्ञानं प्रतिबंधकमि
ति। एतत्तपस्पान्वयानुपपत्त्यनंतरं कुमुदधीरिति लक्षणाव्यवहारो वस्तुतो मुख्यतयैवेति तु प्रमाणक
न्मते गतिरिति। ननु पंकजपदस्य पद्मे लक्षणैव वास्तां। वाक्यार्थस्य भावेऽपि तद्धेतु तत्संभवात्
न च शक्यलक्ष्यसाधारणैकरूपाभावेनानेकार्थस्य पर्यायस्य भावात् युगपद्वृत्तिद्वयविरोध
इति वाच्यं। सति तात्पर्ये गंगायां घोषमत्स्यौ स्त इत्यत्र रमणि न ते तस्य दोषत्वादिति चेन्मैवं।
शक्यबाधके सत्येव लक्षणेति मुख्यबाधकाभावे न लक्षणोपनीता नये लक्षणे कुमुदत्वावच्छिन्नबोधा
व५ पत्तेः तात्पर्यानुपपत्त्या पक्षेः प्रवेशाये ति लक्षणोपपादनेऽपि पंकजकुमुदयोस्तुल्यत्वापत्तेः। लक्ष्यता मु५
विशेषात्। तथा च पदार्थान्वयानुपपत्तिप्रतिसंधानानंतरं कुमुदधीरिति सिद्धांतव्याघा
तकोपः। एवं चेन्नुपदमपि योगरूढमेवेति। ननु पंकजत्वमेव प्रयोगोपाधिरस्तु इति चेन्न। पद्म
त्वज्ञानेन न प्रतिबंधकं अगृहीतनियतपद्मप्रयोगस्य कुमुदत्वावच्छिन्नबोधदर्शनात्। रूढि
ज्ञानमेव स्याभाववत्त्वसंबंधेन प्रतिबंधकमिति। ननु योग्यतापन्नत्वेन

पदत्वमपहाय केवलावयवशक्त्या समुदायबोधोस्तु किं लक्षणया रूढेर्योगप्रतिबंधकत्वमते तथाखेम
वेपि मणिकृन्मते रूढेः प्रतिबंधकत्वादिति चेन्न । पद्मान्वितत्वेनोपस्थितस्य पंकजनिकर्तृत्वस्यान्व
यनिराकांक्षत्वात् स्वातंत्र्योपस्थितस्यैव लक्षणागीकारात् । एवं पंकजपदात् स्थलपद्मबोधे लक्ष
णायैव स्थलपद्मे विजातीयत्वेनेति । पद्माकृतिसदृशाकृतौ स्थलपद्मत्वे विशिष्टे वा पंकजपद
स्य लक्षणा । यदि चानुगतप्रतीत्या तत्रापि पद्मत्वं जातिस्तथापि स्वातंत्र्योपस्थितत्वे तत्र लक्षणा ।
अथायोग्यतया योगार्थानन्वयेपि योग्यतया रूढ्यर्थः पद्ममेव बुध्येतेति चेन्न । योगार्थत ग
त्वेन पद्मत्वस्योपस्थितस्य निराकांक्षत्वात् । स्वातंत्र्योपस्थितत्वेनैतदन्वयस्वरूपत्वात् । यद्यपि शक्त्या
दन्येन रूपेण ज्ञाते भवति लक्षणेति न्यायात् समुदायस्य पद्मत्वे [illegible] न लक्षणा न युक्ता । तथा
पि कर्तृत्व[illegible]बोधकपद्मत्वस्याबोध्या । अत्रेदं चिंत्यं स्थलेपि पंकजमित्यत्र पंकजनिकर्तृत्वस्य
न५ पदेतात्पर्याभावाग्रहे तदन्वितपद्मत्वस्य सा[illegible]कांक्षत्वेपि यत्र च प्रथमपदमन्वयस्त
त्रापि स्थलपद्मतात्पर्यग्रहानन्तरं पुनः स्मृतपंकजपदात् स्वातंत्र्योपस्थितिर्लक्षणायैवो
पेया । एवं च शक्त्यैव तदानदुपस्थितिरास्तां अयोग्यत्वेन योगार्थस्यानन्वयादिति । अपि
च रूपेण नाक्षिद्धचरन्नूपतीतैसत्र बलवदनिष्टाननुबंधीष्टसाधनत्वरूपविध्यर्थे वि
शेषणांशमपहाय धात्वर्थान्वयस्तथा अयोग्यतया विशेषणानन्वयेपि विशेष्या

५९

(63)

न्वये[illegible]बाधकाभावः। योगार्थस्यैव विशेष्यत्वे च पंकजं कुमुदमित्यत्र तस्य सोऽप्यंश न यात्लक्षणा[illegible]नुपप
त्तेरितिदिक्। इदं तु बोध्यं। आकाशपदे निरवच्छिन्नैव शक्तिः व्यक्तीनामानंत्याभावे नानुगमकधर्मा
नपेक्षणात्। न च वस्तूपस्थापितस्यैव शब्दबोधविषयत्वाच्छब्दाश्रयत्वं ततः कथं भासेतेति वा
च्यं। नियमतो यद्धर्मावच्छिन्नेनोपस्थिते यत्र शक्तिग्रहस्तत्स्मरणजनकसंस्कारस्य तद्धर्मविषयता
नियमेन तद्बोधकादेव तदंशेऽपि बोधकेनियमे न आकाशपदादशब्दस्यापितस्य भानात्।
तथा हि शक्तिग्रहसंबंधिज्ञानपरसंबंधिस्मारकमिति रीत्या पदार्थस्मारकतया येन रूपे
णचोपस्थितयोः पदार्थयोः संबंधज्ञानं तद्रूपावच्छिन्नज्ञाना[illegible]संबंधोऽरोद्बुद्धसंस्कारसहकृ
तात्तद्रूपावच्छिन्नस्मरणं तत्र च संबंधितावच्छेदकस्यापि तत्त्वे तज्जनकतावच्छेदककोटिनि
वेशआवश्यकः। अन्यथा हस्तिपके चैत्रत्वेनोपस्थिते इभत्वेनो[illegible]चोपस्थिते हस्तिनि
संबंधग्रहे मनुष्यत्वेन हास्तिपकज्ञानात् गजत्वेन हस्तिस्मरणापत्तेः। तथा च यद्धर्मविशिष्टे शक्ति
ज्ञानं तद्धर्मविशिष्टमेव तत्स्मारयतीति। आकाशमात्रे शक्तावपि शब्दाश्रयत्वस्य स्मृतिसंभ
वः। वस्तूपस्थाप्यत्वस्यैव शाब्दविषयत्वे तंत्रत्वं न तु स्ववस्तूपस्थापकत्वस्येति लक्ष्यतावच्छेदक
वत् शाब्दबोधविषयत्वमपि। अन्यथैवं गोत्वमपि शाब्दं न स्यात्। यदि च विशेष्यवृत्तेरेव संस्का

रस्य

व देशात् विशेषणस्मरणे लक्ष्यतावच्छेदकवत् नियतस्मृतेरनुपपत्तिः रूपान्तरेण शक्तिग्रहे संस्कारवि-
षयताभावात्। किंचान्यसंबंधेनाप्यन्यत्र संस्कारोद्बोधे पदात् संसर्गलक्ष्यताकस्मरणानुपपत्तिः। अ-
या३ ननुभवविषयतत्तोऽपि नियमेन भानसंभवात्। घटशक्तेरेव तद्देशोद्बोधकत्वसंभवात्। उद्बो-
धकान्तरानुसरणे च लक्ष्यतावच्छेदकवत् नियतस्मरणापत्तेः। तस्मात् पदात् नियतोपस्थितिः
स्वसंबंधसाध्यासच्चसंबंधः परिशेषाद्वृत्तिरेव पर्यवस्यति। तत्पदात् नियतोपस्थितेर्वृत्तिसा-
ति६ ध्यैनियमात्। गोत्वं शक्यमिति निर्विषयते तदा शक्त्याश्रयत्वेपि तुल्यमिति चेदास्तां तदपि शक्या।
यदि नियमेन तदुपस्थितिः आकाशः शब्दाश्रय इत्यस्य चाकाशपदवाच्य इत्यर्थे नैवोपपन्नत्वप- नसा७
र्यवसानेपि सत्प्रयोगानुपपत्तिः। अस्तु तस्य कदाचित् शब्दाश्रयत्वेन कदाचिदाश्रयत्वादिति किं
द्रव्यत्वेनाप्युपस्थितेर्न नियता [illegible] तदुपस्थितिरिति न तत्संभवधर्मशक्त्युद्बोधकादेव तद्देशोद्-
बोधकसंभवात् स स्मृतेः शाब्दबोधस्य चोपपन्नत्वात्। यदि च संस्कारस्य कदाचित् तत्तद्दे-
शेनोद्बोधः तदा अस्तु वा पदादपि निर्विकल्पकं। आकाशपदान्निष्प्रकारकमेव स्मरणं
शाब्दबोधश्च पदार्थान्तरमादाय सविकल्पक एवं आकाशोऽप्यपि सत्त्वविभिन्नोऽनन्यस्य
पन्नीतसंख्यामादाय भिन्नप्रकारकोपस्थितिसत्त्वात् अभेदान्वयो नानुपपन्न इति द्रष्-
यं॥ अन्ताः नियतानुपस्थिता वापि विनिगमकाभावात्तत्पदं आकाशादिपदेन ज्ञानाधीन

65

त्वेनाप्युपपत्तेः । एवञ्च धर्मिण्यपि प्रवृत्तिनिमित्तवदपेक्षाबाधकाभावात् । यस्तु तत्तु शाब्दान्वयत्वमेव वाच्यतावच्छेदकत्वाभावात् । घटत्वपटरूपान्तरेण बोधस्य शक्तिभ्रमात् । कम्बुग्रीवादिमत्त्वेनेव घटस्य अनएवानियतोपस्थितिरपि शक्तिभ्रमात् कम्बुग्रीवादिमत्त्वोपस्थितिवदुपपन्नेति न नानार्थत्वमपीति । केचित्तु व्यक्तेरेवानुगतानामतिप्रसक्ततया प्रयोजनाभावेन धर्मेण शक्तिकल्पनमित्याहुः । निर्विकल्पकोपस्थितावाकाशे आकांक्षादिज्ञानासंभवेन शाब्दबोधानुपपत्तिः । एकस्यैव रसस्येवोभयार्थत्वात्तदविवक्षायां विभक्त्यर्थसंख्यापादानमपि न प्रकारेवोपस्थितसमवायेनाकाशो द्रव्यमित्यत्राभेदान्वयानुपपत्तिश्चेति पदान्निर्विकल्पकस्यापि स्वीकारोऽनुचित इत्यन्ये इति दिक् ॥ नन्वियं तात्पर्यवशेन परस्थानेन शाब्दसामान्ये जननीये शक्तिग्रहः सहकारी पामराणां च तदभावान्न शाब्दबोध इति विवेचितं । न चेदं संभवति । गंगायां घोष इत्यादौ गंगापदस्य तीरे शक्त्यभावेऽपि शाब्दबोधोदयादित्याशंकते । नन्विति । तीरेति । तीरे गंगापदस्य शक्त्यभावादिति भावः । तत्त्वेन शाक्तित्वेन । प्रयोजिकाज्ञाता तत्तीरशाब्दबोधोपयोगिनी । किंतु धीतीत्येनेति । प्रयोजिकेति पूर्वेणान्वितं । वृत्तित्वं च शक्तिलक्षणान्यतरत्वं । लक्षणेवेति । शाब्दसामान्ये वृत्तिज्ञानत्वेन हेतुतया गंगापदस्य तीरे लक्षणारूपवृत्तिज्ञानसत्त्वात्तीरशाब्दबोधो नानुपपन्न इति भावः । ननु गंगा

यांघोषः प्रतिपत्स्यतीति व्यवहारदर्शनात् गंगापदस्य तीरेऽपि कथं न शक्तिरिति चेन्न । लक्षणीयपदार्थानामनंततया सर्वत्र शक्तिकल्पने गौरवात् । शक्यसंबंधरूपा लक्षणा तु क्लृप्तेव । एकसंबंधिज्ञानस्यापरसंबंधिस्मारकतया गं[illegible]पदजन्योपस्थितेः शक्यसंबंधरूपलक्षणाजन्यत्वमपि क्लृप्तमेव लक्षणाजन्योपस्थितेः शाब्दबोधानुकूलत्वमात्रं कल्प्यते । शक्तिस्वीकारे त्वतिरिक्तधर्मिकल्पनातो धर्मिकल्प[illegible]ना लघीयसीति न्यायेन तीरे लक्षणैव । अथ शक्तिर्नातिरिक्ता किंत्वीश्वरेच्छारूपा सा तु क्लृप्तेव । एवं च शाब्देऽपि क्लृप्ततया तज्जन्योपस्थितेः शाब्दबोधानुकूलत्वमात्रं मयापि कल्प्यत इति न धर्मिकल्पनाया इति न्यायस्यानवतारः । नचास्माच्छ[illegible]ब्दादयमर्थो बोद्धव्य इत्याकारकेच्छा क्लृप्तेवेति वाच्यं । गंगापदात्तीरबोधोदयेनेश्वरेच्छायास्तादृशाकारतावच्छेदकत्वात् तस्याः सर्वविषयकत्वात् । न च लाक्षणिकपदं नानुभावकमिति गंगापदात्तीरबोधानुदयात्तादृशप्रकारत्वमक्लृप्तमेवेति वाच्यं । तथा सति गंगापदस्यानुभावकत्वे तादृशाकारकज्ञानस्याभावः । ज्ञानस्याभावे चानुभावकत्वमित्यन्योन्याश्रयादिति । अथ तादृशेच्छयेश्वरोच्चरितत्वं शक्तिः । सा च न तीरे इति तत्र लक्षणैव । अत एवापभ्रंशेऽपि शक्तिभ्रम इति चेन्न । ईश्वरोच्चरितत्वं न तज्जन्यत्वं अपभ्रंशादिसाधारण्यात् । न तत्कण्ठताल्वाद्युच्चरितत्वं । आधुनिकचैत्रादिपदेऽभावात् । द्वादशेऽहनि पिता नामधेयं करोतीत्यादिना सामान्यतः नामत्वेन तदुच्चारणोपपादनेनापभ्रंशे शा

त॰र्दप्र॰टी॰
३५

नचैवं सादिना अपभ्रंशत्वेन तदुच्चारणस्यापभ्रंशोपि स्यात्। वैदिकपदस्यापि लाक्षणिकतया तादृशोच्चपेध
रो अतिलंघसत्वात्। लक्ष्येपि शक्त्युपस्थितेश्चेति चेदनाकुः। अपभ्रंशादपि शाब्दबोधोदयेन तस्मात्पदाद
पमर्थो बोध्य इत्याकारिकेश्वरेच्छायास्तत्रापि सत्वान्नै तादृशाकारिकेच्छामात्रे शक्तिः। किंतु पदपदार्थ
संबंधत्वविशेषितासा। तथा च तस्याः नानातीरादिसंबंधत्वकल्पने गौरवात्। इच्छायाः संबंधत्वग्राहक
वृद्धप्रयोगस्याभावाच्च। न गंगापदतीरयोः संबंधत्वं किंतु प्रवाहसामीप्यस्यैव। तीतिरे कूलेव शक्ति
रिति। किंच यदि येहीसत्र द्वारोपस्थापदपदार्थानामनलतया विशेष्यानुपस्थितेर्यथेतरपदमेवानुभावक
न लभ्यानृतपदं तथा घोषपदादेव तीरान्वयबोधोपपत्तेर्गंगापदं तीरानुभावकमिति। तथा च गंगा
पदात्तीरबोधो जायतामिदाकारकसमप्यासिद्धमेवेति दिक्। लक्षणां निरूपयितुमिच्छति। अथपद
पमिति। शक्यात्। गंगापदशक्यात्प्रवाहात्। अशक्यस्य। गंगापदाशक्यस्य तीरस्य उपस्थि
तिर्लक्षणेत्यर्थः। गंगापदेन शक्त्या प्रवाहोपस्थितौ तत्र चान्वयानुपपत्तिप्रतिसंधानेन तद
गंगापदात्पुनः स्मृतेन प्रवाहेण एकसंबंधिज्ञानस्यापरसंबंधिस्मारकतया स्वसंबंधितीर
मुपस्थाप्यते तथा च सैवोपस्थितिर्लक्ष[illegible]णेति भावः। उपस्थितीति। पदज्ञानस्य पदार्थ
स्मारकता एकसंबंधिज्ञानमपरसंबंधिस्मारकमिति रीत्या तत्संबंधोपस्थितिरेव न तु तस्याद
पस्थितिरूपत्वमित्यर्थः। सैवेति। उपस्थितिरेवेत्यर्थः। अशक्यइति। गंगायां घोष इत्यत्र गं

रूम
३५

(68)

गापदाशक्यतीरे। तात्पर्यं गंगापदतात्पर्यं। गंगापदात्तीरबोधो जायतामितीच्छा[illegible]विषयत्वं यत्तीरे तदेवलक्ष
णेत्यर्थः। शक्यतात्पर्यस्य लक्षणात्ववारणाय शक्येति। अन्वयइति। घटमानयेत्यादौ घटकर्मत्वयोरा
धेयत्वरूपसंसर्गतात्पर्यसत्त्वात्तात्पर्यस्य लक्षणात्वं स्यादित्यर्थः। नचेष्टापत्तिः अन्वयेन शक्तिर्नवा
लक्षणेति सिद्धांतव्याघातात्। नचशक्यसंबंधस्य लक्षणात्वस्वीकारेप्येषदोषइतिवाच्यं। अन्व
ये शक्यसंबंधस्य सत्त्वेपि तस्य तच्छाब्दबोधानुपयोगितया तच्छाब्दबोधानुकूललक्षणायास्तत्रा
भावात्। अन्यथा गंगापदस्य मुख्यपरत्वेपि शक्यसंबंधस्य तीरे सत्त्वात् लाक्षणिकत्वापत्तिरिति ल
क्षणायास्तत्र मुख्यत्वमेवोपेयमिति। तात्पर्यस्य लक्षणात्वे चान्वये तात्पर्यस्य शाब्दबोधानुकूल
त्वेन तत्र तच्छाब्दबोधोपयोगिलक्षणायादुर्वारत्वात् इति ध्येयं॥ नन्वेवं शक्ये[illegible]पदार्थतात्पर्ये
ती१ लक्षणा। पदार्थत्वं पदजन्यप्रतीतिविषयत्वं। विषयता च प्रकारता विशेष्यतान्यतररूपा। इदंच संसर्ग ता८
स्यपदार्थत्वाभावादेव न दोष इत्यत आह। किंचेति। तात्पर्येति। रसापदार्थोपि स्थितौ स सांश
ब्दबोधो जायते। तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यनिर्वाहो भवतीति तात्पर्यमिति रिक्राव
निरवरूपमुपेया। नहि स्वपेक्ष स्वनिर्वाहकमिति भावः। ननु शक्तेः शाब्दबोधनिर्वाहकत्वेप
बोपपत्तेर्न तु तात्पर्यं निर्वाहकमत आह। शक्तेरपीति। तथात्वापत्तेः। तात्पर्यस्य लक्षणात्वाप
त्तीरित्यर्थः। तथा सति शक्तिलक्षणयोरभेदापत्तिः। यदिच तात्पर्यं हि निरिति प्रवादात्तत्र

चपं चन्यथान्वयानुपपत्त्या तन्निर्वाहकतया शक्तिस्वद्धलिरि स्यात् तदा लक्षणायामपि तुल्यमिति भावः। अ
न्वयघपि ईश्वरेच्छारूपशक्तेस्तात्पर्यात्मकत्वे इष्टापत्तिरेवेति। तथापि वक्तृसामान्यतात्पर्यानुकूलताप
त्तिरिति बोध्यं। स्ववाच्येति। स्वं लक्षणीयं पदं तस्य यच्छक्यं तत्संबंधो लक्षणेत्यर्थः। इदमेवोपपाद
यति। आस्तिहीति। गंगायां घोष इत्यादौ स्वं गंगापदं तच्छक्यः प्रवाहस्तत्संबंधः संयोगादिरूपस्ती
रेऽस्तीति गंगापदस्य तीरे लक्षणेत्यर्थः। गौण्याः वसेतरत्ववादिमते व्यवच्छेदाय लक्षणायामेव
तदंतर्भावं दर्शयितुं लक्षणां विभजते। साचेति। शक्यसंबंधरूपा लक्षणा चेत्यर्थः। तत्र गौणीं
लक्षयति। सादृश्येति। तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं तदात्मकः शक्यसंबं
धो गौणीत्यर्थः। गौणीमुदाहरति। यथेति। वाहीकः वाहीकदेशोद्भवः। गौर्बलीवर्द इत्य
र्थः। अत्र वाहीके गवाभेदस्य बाधात् गोपदेन गोसदृशो लक्ष्यते। गोसादृश्यं च गोगतजाड्यमान्द्या
दिकमेव। तथा च जडो मंदश्च वाहीक इति शाब्दबोधः। एवं च लक्षणयैवोपपत्तौ गौण्याः स्वा
तिरिक्तवृत्तिर्नोपेया लक्षणायामेव तदंतर्भावादित्यभिप्रायः। सिंहो माणवक इत्य
त्रापि गौणी लक्षणया सिंहसदृशाभिन्नो माणवक इत्यन्वयबोधोऽवसेयः। शुद्धां लक्षयति।
तदन्येति। तदन्या सादृश्यान्यशक्यसंबंधरूपेत्यर्थः। शुद्धामुदाहरति। यथा आयुरिति। आ
युःपदस्यायुर्जनघृते लक्षणा। तत्रायुःपदस्य शक्यसंबंधो जनकत्वरूपो बोध्यः। तथा चायु रूप्य

⑦0

र्जनकाभिन्नं ध्वतमित्यन्वयबोधः॥ननु शक्यादशक्योपस्थितिर्लक्षणेति प्राचीनमते लाक्षणिकं पदं नानु
भावकमिति प्रवादः संगच्छते॥स्वजन्योपस्थितिसंबंधेन पदस्यानुभावकतया गंगापदजन्यती
रोपस्थितेरभावान्न गंगापदस्य तीराननुभावकत्वात्॥किंतु घोषपदस्यैव तच्छाब्दप्रतितावन्वय
प्रतियोग्युपस्थापकपदत्वेन कारणत्वात्॥न च तच्छाब्दप्रतितौ घोषपदजन्यपदार्थोपस्थितेर्हेतु
त्वात्कथमेतदिति वाच्यं॥तदर्थवाचकतत्पदनिरूपितशक्तिज्ञानजन्यतच्छाब्दबोधं प्रति तत्पद सा ४
निरूपितशक्तिज्ञानत्वेन हेतुत्वं॥तादृशलक्षणाजन्यशाब्दबोधं प्रति तादृशस्वरूपसत्पदा
त्वे ७ र्थोपस्थितिर्नैव हेतुत्वेन तूक्तरूपेण हेतुहेतुमद्भावः॥शक्यसंबंधस्य लक्षणात्वे तु तीरोपस्थि
तेर्गंगापदजन्यत्वादन्वयप्रतियोग्युपस्थापकतयानुभावकत्वं संभवत्येवेति॥तादृशप्रवादवि
रोधः॥अथ मन्मते गंगापदात् स्वशक्यसंबंधेन प्रथममेव तीरोपस्थितिः॥तन्मते तु पुनः श
क्यस्मरणात्तस्मिन्नो गौरवमिति चेन्न॥पदस्य स्वशक्यसंबंधेनान्वयप्रतियोग्युपस्मारक
त्वस्याक्लृप्तत्वेन तत्कल्पने गौरवादस्मन्मते न प्रवाहेण स्वसंबंधितीरस्मृतेरेवोचित्यादिति
चेन्नैवं॥गंगापदात्तीरानुपस्थितौ प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्ति
भंगापत्तेः॥प्रकृत्यर्थोपस्थाप्यपदविभक्त्यर्थान्वयेऽतिप्रसंगादननुभवाच्च॥प्रकृतितात्पर्य

(72)

तर्कप्र.श.
३६

विषयेणस्वार्थान्वयबोधकत्वेपि तथा धूमोस्तीति वाक्यतात्पर्यविषयेण वह्निना धूमपदोत्तरविभक्त्यर्थान्वया
पत्तेः। तस्मात् गंगापदस्यापि तीरस्मारकत्वमवश्यमुपेयं। एवं च कॢप्तशक्यसंबंध एव तीरस्मारकत्वेन
कल्प्यते न तु शक्तिः तां विनाप्युपपत्तेः। तथा चान्वयप्रतियोग्युपस्थापकत्वाल्लाक्षणिकस्याप्यनुभावक
त्वोपपत्तिरवशिष्यते सोपि पदानां स्वशक्यानुभवं प्रत्येव कारणत्वावधारणात् इतरपदार्थेन सह
स्वशक्यानुभावकत्वेन कॢप्तत्वात् घोषपदादेव तीरानुभवसंभवात्। लाक्षणिकपदस्य नानुभाव
कत्वमिति रीत्या वारणीयेति। वस्तुतस्तु उद्देश्यविधेयभावबोधे न लाक्षणिकपदं नानुभावकपिसैर्धः वतद ६
उद्देश्यविधेयभावबोधोऽन्वये शाब्दिपत्वस्यैव प्रयोजकत्वात्। अत एव लक्ष्यार्थस्यैव विधेयतयाऽभा
नात्। विध्यर्थस्य च विधेयतयैव भानात्। न विधेयोपरागाद्यर्थ इति संगच्छते। किंच तन्तुसंयोग
स्यप[illegible]संयोगहेतुत्वे तात्पर्यके तन्तुः पटं करोतीति सर्वलाक्षणिकस्थलेऽन्वयानुभवापत्त्यापाप
त्तेर्लाक्षणिकपदमप्यनुभावकमिति तादृशप्रवादोऽकिंचित्करः। यत्तु शक्यादशक्योपस्थि
तिर्लक्षणेति मते लक्ष्यतावच्छेदकलक्षणा नास्तीति प्रवादइमाघातः। शक्यसंबंधस्यल
क्षणात्वमते तु शक्यसंबंधस्य लक्ष्यल[illegible]तावच्छेदकोभयसाधारणस्यैकस्याभावात् तदु
पपत्तेरिति। तन्न भवन्मते[illegible]यत्र लक्ष्यताक.छेदकं लक्ष्योभयसाधारणः शक्यसंबंध
स्तत्रागतेः तत्र लक्ष्यमात्रवृत्तितानियामकसंबंधेन तस्य लक्षणात्वोपगमेपमा। विलक्ष कृष्ण

३६

72

मात्रवृत्तिविषयतासंबंधेन तथोपस्थितेर्लक्षणात्वोपगमादिति । एतेन लक्ष्यतावच्छेदके लक्षणा नास्तीत्यस्य ल
क्ष्यतावच्छेदकांशे शक्यसंबंधरूपलक्षणाग्रहो नापेक्षित इत्यर्थः । यत्र चोभयसाधारणः शक्यसंबंधस्त
त्र लक्ष्यवृत्तित्वेनैव तत्संबंधग्रहापेक्षा न तु लक्ष्यतावच्छेदकवृत्तित्वेनापि शक्यतावच्छेदकविशिष्टे शक्ति
ग्रहात् । शक्यतावच्छेदकेऽपि विशेषणविधया शक्तिज्ञानमपेक्षितमिति परास्तं । लक्ष्यमात्रवृत्तिविष
यतासंबंधेनोपस्थितेः विशिष्टबोधप्रयोजकत्वस्य ममापि स्तुवच्चत्वादिति । इदं चात्र बोध्यं । शक्तिल
क्षणाज्ञानयोरेकरूप एव कार्यकारणभावः । तथाहि । शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपद
निष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्यताकज्ञानत्वेन शाब्दबोधं प्रति कारणत्वं । शक्तिसंबंधेन
शक्यसंबंधेन वा पदप्रकारकज्ञाने शक्तेः संसर्गत्वात् । शक्तित्वनिष्ठावच्छेदकतायां पर्याप्तिः पर
न निवेश्यते । तेन शक्यसंबंधेन पदप्रकारकज्ञानस्यापि संग्रहः । परं तु पदप्रकारतानिरूपितशक्ति
निष्ठसांसर्गिकविषयतानिरूपितार्थविशेष्यतानिरूपिता । तेन शक्तिसंबंधेन पदाभावप्रकारकबाध
बुद्धिप्रतिबध्यत्वं न लक्षणाज्ञानस्येति बोध्यं । शक्यसंबंधस्याविनाभावरूपत्वमिति प्राञ्चः । नन्वापं
घोः क्रोशांतीसत्त्वाभावात् तत्रापि न तात्समयमनादायाविनाभावोपपादनेऽपि भ्रमनेन । शक्यसंबं
धमात्रस्यैव लक्षणात्वोपगमात् । अविनाभूतबोधस्य तात्पर्यज्ञानाभावेनैव वारणीयः । अनेकार्थ
नाभूतशक्यतरभानं तात्पर्यज्ञानबलादेवेति भयतोऽपि वाच्यत्वात् । मंडपं भोजयेत्यादौ रूढि

73

पूर्विकालक्षणेति मीमांसकाः। मंडपपदस्य गृहविशेषे रूढिर्मंडपानकर्त्तरि च योगः। रूढिः समुदायशक्तिर्योगः अवयवशक्तिः तत्र रूढेर्योगापहारितेति प्रवादात्। अवयवशक्त्या मंडपानकर्त्तृबोधासंभवेन मंडपपदस्य मंडपानकर्त्तरि लक्षणा। इयं च रूढ्यर्थगृहसंबंधितावच्छेदकतया गृहीतचैत्रत्वेन कर्त्तृबोधः न तु मंडपानकर्त्तृत्वेनेति। पंकजमित्यादौ तु पद्मस्य रूढ्यर्थस्य पंकजनिकर्त्तृत्वेन योगार्थस्याविरोधादवयवशक्त्यैव पंकजनिकर्तृबोधः। ननु शक्यार्थपरत्वे संभवति लक्षणाकल्पनमयन्याय्यं। नच रूढेर्योगापहारान्न तथेति वाच्यं। कोयमपहारः। न तावद्यौगिकार्थास्मृतिः। रूढ्यर्थ इव यौगिकेपि स्मारकसंबंधस्य शक्तेस्तुल्यत्वात्। नच योगार्थस्य पश्चात्स्मृतिः स इति वाच्यं। मंडपसमुदायेन यदा स्वार्थस्मरणं। तदावयवार्थस्मरणे बाधकाभावात्। लक्षणापक्षेपि रूढ्यर्थेन पदात्स्वसंबंधिस्मरणं तदाऽवयवार्थस्मरणसंभवेन यौगिकार्थान्वयबोधसंभवात्। नच स्मृतस्याप्यवयवार्थस्यान्वयबोधबहिर्भूतत्वमेव स इति वाच्यं। अयोग्यत्वमारूढ्यर्थस्यान्वयबोधाभावेपि यौगिकार्थबोधे बाधकाभावात्। अथ मंडपपदस्य सत्यपि योगे प्रयोगप्राचुर्याभावादवयवशक्तेः कुंठत्वं कल्प्यते। अन्यथा नेकृथीक्षादिपदादिव मंडपानकर्त्तुरवगमोपि कदाचित्स्यादिति चेन्न। तप्तेपयसिदध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजी। नमिसत्र वाजमन्नमामिक्षारूपं येषामस्तीति योगाद्वाजिपदेन विश्वेदेवा उच्यंते न तु रूढ्या अश्वा इति लिंगोल्लंघनस्यात्। नह्यत्र विश्वेदेवोऽपु वाजितिपदस्य प्र

योगप्राचुर्यमस्ति। मंडपानकर्त्रीत्यादावपि मंडपपदस्य योगेन प्रयोगो नास्तीति तु तथैवाभिमान इति। मैवं।
मंडपपदात् यत्रागृहविशेषस्मृतिः तत्रैव मंडाद्यर्थोपस्थितिस्तदुत्तरं पिबत्यर्थस्य तदनंतरं प्रत्ययार्थस्य
ततो मंडपानकर्तृत्वेन ज्ञातत्वादिति यौगिकार्थस्यातिविलंबात्। तदेवं रूढयौगिकयोर्बलाबलं शीघ्रवि
लंबितधीकृतमेव। तथाच रूढ्यर्थस्य शीघ्रमुपस्थितत्वात् बलवत्त्वमौत्सर्गिकं। यत्र तु यौगिकार्थ
स्य प्रकरणवशात् प्रथममुपस्थितिस्तत्र रूढेर्योग एव बलीयान्। यथा अग्निर्वसुभिः सोमो रुद्रैरि
न्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैरित्यत्र प्रकरणवशात् विश्वेदेवपदेन वसुरुद्रमरु
दादित्यरूपसर्वदेवानामेव योगेन स्मृतिर्न तु रूढ्या पुरोरवोमाद्रवः प्रभृतिगणानामुपस्थितिः
एवं तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वाजपदप्राप्यामि
क्षारूपं येषां ते वाजिन इति योगात् वाजिनेपि विश्वेदेवदेवताकत्वस्य प्रकरणेनोपस्थित
त्वात्। न तु वाजिपदेन रूढ्याश्वानामुपस्थितिस्तथा सति नामिक्षाधिकरणसिद्धांतविरोधः।
न च रूढेर्योगाद्बलीयस्त्वेन रूढ्यर्थपरिग्रह एव स्यादिति वाच्यं। रूढ्यर्थयोगार्थयोर्द्वयोरु
पस्थितावनुपस्थितौ च रूढेर्बलीयस्त्वं। प्रकृते तु प्रकरणवशेन योगार्थस्यैव स्मरणान्न तु रू
ढ्यर्थस्य। प्रकरणेनोद्बुद्धसंस्कारस्यैव शाब्दादर्थबोध इति। राद्धेन प्रकरणसंवलितेन योगा
र्थस्मृतिर्मन्यते न तु रूढ्यर्थस्मृतिरिति। नचैवं मंडपपदादपि योगार्थस्यैव प्रथमं स्मृतिसं

न १

ऽवेनत्वेन लक्षणेति वाच्यं। अत्र प्रकरणाद्यभावात्। रूढ्यर्थस्यैव प्रथमं स्मृतिरिति रूढिपूर्विका लक्षणा यत्र
च योगार्थे प्रकरणाद्यवतारस्तत्र योगार्थस्यैव बलवत्त्वात् तल्लक्षणा। यद्यपि पदज्ञानमेवोद्बोधकं न प्रक
रणादिकं तथाप्यन्यतरप्रकरणमपरस्मृतौ प्रतिबंधकमवश्यमिति वदंति। तन्न। रूढ्यर्थान्वयबोधो
वा तत्स्मृतिर्वा योगिकार्थान्वयबोधे प्रतिबंधिका। न तावदाद्यः। रूढ्यर्थस्य प्रथममुपस्थितत्वेऽपि त
स्यायोग्यतया योगिकार्थान्वयबोधे बाधकाभावात्। न द्वितीयः। प्रकरणादिना यत्र योगिकार्थान्व
बोधः तत्र रूढ्यर्थस्मृतेरभावात् तस्याः प्रतिबंधकत्वोपपत्तावपि तस्या योगिकार्थस्मृतौ तदन्वय
बोधे वा प्रतिबंधकत्वे मानाभावात्। साक्षादविरोधिनो ज्ञानस्य जनकज्ञानविघटकत्वेनैव प्रति
बंधकत्वात्। अनुमितौ तु लिङ्गेरासाफल्यबलेन तथात्वकल्पनात्। तस्माद्यत्र मंडपपदस्यागृह
परत्वे तत्र मंडपानकर्तृत्वरूपयोगार्थस्यायोग्यतया नान्वयबोधः न तु रूढ्यर्थस्मृतिस्तत्प्रति
बंधिका। योग्यतारूपकूटकारणविरहेणैव तदबोधोपपत्तेः। यत्र तु रूढ्यर्थस्यायोग्यता तत्र यो
ग्यतया योगेन योगिकार्थबोधो भवत्येव। रूढेर्योगापहारप्रवादस्तु योग्यत्वात्। रूढ्यर्थस्या
न्वयबोधो न तु योगिकार्थस्य अयोग्यत्वादिसत्त्वे तत्परो न तु योग्यतादिमत्त्वेऽपि योगिकार्थस्य ना
न्वयबोधपरसत्त्वे तत्परः। यत्र च रूढ्यर्थगृहसंबंधिचैत्रे चैत्रत्वादिना तात्पर्यं प्रमाणांतरादेवावधा
र्यते तत्र रूढिपूर्विका लक्षणा न तु सर्वत्रेत्यवधेयं। लक्षितलक्षणापि रूढसंतरमिति प्राचः।

कृष्ण

76

३ द्विरेफपदार्थत्वाभावेन तत्र विभक्त्यर्थान्वयानुपपत्तेः। मन्मते च लक्षितलक्षणायाः द्विरेफपदस्येव शक्तितया भ्रमर

द्विरेफपदेन द्वौ रेफौ यत्रेति व्युत्पत्त्या भ्रमरपदं लक्ष्यते। भ्रमरपदेन च स्वशक्यसंबंधेन भ्रमररूपोऽर्थो लक्ष्यते इति द्विरेफपदस्य भ्रमरे लक्षितलक्षणा। न च द्विरेफपदलक्ष्यभ्रमरपदशक्त्यैव निर्वाहेऽलं लक्षणयेति वाच्यं। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन भ्रमरस्य द्विरेफपदार्थत्वा[illegible]दिति। न च शक्यादन्येन रूपेण ज्ञाते भवति लक्षणेति भ्रमरपदशक्यतावच्छेदकभ्रमरत्वस्य कथं लक्ष्यतावच्छेदकत्वं शक्त्यैव तद्बोधसंभवात् इति वाच्यं। शक्येन रूपेण लक्षणानंगीकारे शक्त्यैव तद्बोधसंभवेन लक्षणायां कल्पनमफलमित्यस्यैव तद्बीजकतया प्रकृते च शक्यस्य भ्रमरत्वविशिष्टस्य बोधस्वीकारे भ्रमरस्य ये ७ द्विरेफपदार्थत्वाभावेन विभक्त्यर्थान्वयानुपपत्त्या शक्यस्यापि लक्षणैव भानमुपेयते। एतन्मते लक्षितस्य पदस्य लक्षणा लक्षितलक्षणा। तच्च द्विरेफपदस्य वृत्तिरिति। तन्न। शक्यसंबंधो हि लक्षणा। न तु शक्यस्य साक्षात्संबंधो गौरवात्। एवं च परंपरासंबंधेन लक्षणे यल्लक्षितलक्षणा स्वलक्ष्यपदघटितं तल्लक्षणात्वे निपावत्। तथा च परंपरासंबंधेन लक्षणायाः एवं तथात्वे न द्विरेफपदस्य स्वलक्ष्यभ्रमरपदघटितपरंपरासंबंधेन भ्रमररूपार्थोपस्थापकत्वसंभवात्। द्विरेफपदलक्षणायां नोपपत्तेर्नालिरीत्या वृत्तिकल्पनमिति दिक्। सा च लक्षणा क्वचिज्जहत्स्वार्था क्वचिदजहत्स्वार्था चेति। आद्या गंगायां घोष इत्यादौ स्वार्थस्य प्रवाहस्य त्यागात् तीरे घोष इत्येव बोधात्। यदि च गंगासंबंधितीरत्वेन बोधः। तस्य जहत्स्वार्थैव। अन्त्या च काकेभ्यो दधि रक्ष्यतां छत्त्रिणो यान्तीत्यादौ दध्युपघातक

८१

त्वेन का[illegible]वकुलादीनां एकसार्थवाहित्वेन छत्र्यछत्रिणां बोधात्। एवं मंचाः क्रोशंतीति यष्टीः प्रवेशयेत्यादौ मं
चपदस्य मंचस्थपुरुषे। यष्टिपदस्य यष्टिधरे लक्षणया जहत्स्वार्थैव। स्वार्थपरित्यागेन परार्थलक्षणा
जहत्स्वार्था। स्वार्थपरित्यागेन परार्थलक्षणा जहत्स्वार्थेति तल्लक्षणात्। ननु छत्रिणो यान्तीत्यादौ छत्रि
शब्दस्य वाक्यस्योक्तत्वेन न लक्षणा। नापि छत्रपदे। छत्रपदार्थत्यागेनाजहत्स्वार्थत्वायोगात्। किं चात्र लक्ष्य
तावच्छेदकं नैकसार्थगंतृत्वं यांतीत्यस्यानन्वयापत्तेः। गंतृत्वेनोपस्थितस्य गमनान्वये साकांक्षत्वविरहादिति॥ अ
त्राहुः छत्रपदस्य एकसार्थे लक्षणा। मत्वर्थस्य संबंधी। तथा चैकसार्थवंतो यांतीति वाक्यार्थबोधः।
छत्रिवाक्यलक्षणाभिप्रायेण चाजहत्स्वार्थत्वोक्तिः। अर्थपदस्य प्रतिपाद्यपरत्वात्। अभिप्रायेणाना।
केचित्तु एकसार्थवत्त्वेन छत्रस्याप्यन्वयात्तथात्वं। अत एव सावयवलक्ष्यसाधारण्यमप्युपपद्यत इत्या
हुः। अपरे तु प्रकृतावेव एकसार्थवति लक्षणा। प्रत्ययस्य तात्पर्यग्राहकः। अथवा न संबंधिसामान्य
सात्कमतुप्रत्यये एकसार्थसंबंधित्वेन लक्षणा। छत्रपदं तात्पर्यग्राहकमित्याहुः। अत्र च लक्षणकृतत्वं
ध्यस्यैव लक्ष्यतावच्छेदकत्वं। यथा दुःखप्रघातकत्वेनैकसार्थवाहित्वादीति बोध्यं। एवं पदानां स्वपरत्वेन ल
क्षणेव न हानिः। अन्यलक्ष्यत्वात्। केचित्तु पाकशानामौत्सर्गिकमर्थपरत्वं तदभावे स्वपरत्वं। तत्पा
चप्रत्ययेन पदजन्योपस्थितितत्सापेक्षज्ञानमित्याहुः। तन्न। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबो
धकत्वनियमेन तत्र विभक्त्यर्थान्वयानुपपत्तेर्विशिष्टद्वारस्यावश्यकत्वात्। अत एव पदस्य

कृत

स्वबोधकत्वं वृत्तिं विनैव स्वभावात् । अन्येनहि अन्यबोधनेऽतिप्रसंगात् इति वृत्त्या । स्वस्य स्वबोध
कत्वे तु नैवं । रसादिपदस्यार्थान्वयानुपपत्तेः । सहकारिणाभावेन सर्वेषां स्वबोधप्रसंगः । एवं स्वबोधिते
स्वस्मिन्नन्यस्यार्थान्वयोऽपि लिप[illegible]रास्तं । प्रसयानामिति व्युत्पत्तिभंगप्रसंगात् । नचैवं निरर्थकत्व
वगाइदत्तमाहेसाहोस्वशाप्याश्रवात् लक्षणानुपपत्तिरिति वाच्यं । प्रत्येकवर्णेषु वृद्धो तत्स्वरूपमा
पाक्रियापदार्थान्वयात् समुदायस्योच्चारणासंभवेन तत्र तदनन्वयात् तेषां च शक्यत्वेन तत्र ल
क्षणापगमादिति । गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वतीति कोशस्वारस्याद्धर्मे च शक्तिबोधकत्वे
पि नीलादिपदानां धर्मे शक्तिः धर्मिणि लक्षणा । मत्सरशब्दे तु मात्सर्ये धर्मे धर्मिणि च शक्तिरिति स
प्रदायः । नीलादिपदवत् मात्सर्ये शक्तिः धर्मिणि लक्षणा । नच मत्सरशब्दस्य धर्मे धर्मिणि च तुल्य
वत्प्रयोगात् उभयत्र शक्तिरिति वाच्यं । नीलादिपदस्यापि गुणिनि प्रयोगप्राचुर्यात्र । ध
र्मिणि लक्षणयैवोपपत्तेः न तत्र शक्तिरिति तुल्यं मत्सरशब्देऽपि तुल्यमिति । मत्सरशब्देऽपि धर्मे
शक्तिः धर्मिणि लक्षणेत्यन्ये । अत्रस्तु विचरकौ लक्षणा न । सर्वनाम्नि न लक्षणा । वाहिकास्ये
न लक्षणा । विधौ न लक्षणा । विधेयार्थे न लक्षणा । विधेयताशालिशाब्दबोधत्वे शक्ति
ज्ञानकार्यतावच्छेदकं । लक्षणया शाब्दबोधस्तु न विधेयताशालीति न व्यभिचार इति ।
विधेयतया लक्ष्यार्थबोधो नास्तीति प्रवादबीजं लाक्षणिकपदेनानुभावकमिति प्रवाद
स्यादस्य विधेयभावेनान्वयो नास्तीत्यर्थः । एवं विशिष्टवाचकानां पदानां विशेष्यमात्रपरत्वे

79

तु.ख.प्र.श.
५.

नल्लक्षणा शक्यादन्येन रूपेण लोले भवति ल लक्षणेति॥ न लक्ष्यतावच्छेदकेन लक्षणेति प्रवादा अननुसंधे
याः । क्वचित् लक्ष्यतावच्छेदके लक्षणाया अकल्पने गोत्वे शक्तिविलोपप्रसंगः । वस्तुतस्तु एवमेव शा
द्बोधविषयतायां ये शक्तिकल्पने लक्ष्यतावच्छेदकेपि तथा । अन्यथा तीरत्वेनोपस्थितिं विना ती
रत्वं गंगायामिति संबंध[illegible]यात् तत्र न लक्षणेति चेन्न । घटो नेत्यादौ यथा प्रतियोगितावच्
छेदकसंसर्गमर्यादया भासते तथा गंगायां तीरमित्यत्र तीरत्वेपि सामीप्यावच्छेदकसंबंधो
भासते । संबंधांशे च यादृशं यस्य भानं तथैव तस्य स्मरणं । तथा च लक्ष्यतावच्छेदकेपि परंप
रा[illegible]संबंधास्यास्मि का लक्षणैवेति प्राञ्चः । राजपुरुष इत्यादौ शक्यालक्षणया वा राजस्व
वंचित्पुरुषबोधानुपपत्तेरिति चेन्न । वृत्तिरवश्यमुपेया । तथा च रूपे शक्तिलक्षणे एव वृत्ती
स्वरूपमित्साभिप्रायवान् इत्युच्यते । नाविति । एतेन एव शक्तिलक्षणे एव । एतेन वकारेण इतर
व्यवच्छेदः । ष[illegible]ष्ठ्यर्थे इति । तत्र षष्ठ्यास्तु तत्वे न राजपदादेर्यत्संबंधे शक्त्याद्युसंभवात्के
थं संबंधबोध इत्यर्थः । तदेवाह । नहीति । न नु प्रकारतया विशेष्यतया वा बोधे वक्तुरपेक्षा ।
न तु संसर्गमर्यादया भानेति । तथा च घटमानयेत्यादौ घटकर्मतयोराधेयतारूपसंसर्गवत्तरा
जपुरुष इत्यत्रापि स्वस्वामिभावरूपसंबंधभानं वृत्तिं विनैव स्यादिति साकांक्षते । अत्रेति ।
नील इति । नीलपदस्य निरूढलक्षणया नीलविशिष्टमर्थः । तस्य चाभेदसंसर्गेण घटेऽन्व
यः । तथा च यथा नीलघटयोरभेदः संसर्गमर्यादया भासते । तथा षष्ठीतत्पुरुषेपि संबन्ध

कुस
५.

(४०)

सेवकभाववल्लक्षणःसंबंधः संबंधाधिक्ययेव१नास्तत इतिभावः।तदापत्तेरिति।षष्ठ्यर्थसंबंधस्याना
पत्तेरित्यर्थः।राजपुरुषइत्यत्रेयात्रापि संसर्गस्य संबंधविधया१नानापत्त्या राजसंबंधिपुरुषइत्यन्व
यबोधापत्तेरितिभावः।ननुघटः कर्मत्वमानयनं कृतिरित्यत्रघटमानयेत्यत्रैवाधेयतासंबंधेन
कर्मत्वेघटान्वयबोधापत्त्याघटकर्मकानयनानुकूलकृतिमानित्यन्वयबोधापत्तेर्नामार्थयोरभे
दातिरिक्तसंबंधेनान्वयबोधोनस्वीक्रियत इतिव्युत्पत्तिरवश्यमुपेया।एवंचराजापुरुषइत्यत्रक
थमभेदातिरिक्तसंबंधेनान्वयबोधमापादयसीत्याशंकांबूते।अथेति।अथपदेनैवसेवकत्वारेणाभेदा
तिरिक्तसंबंधव्यवच्छेदः।एककारार्थंस्पष्टयति।नत्वन्यथेति।नत्वन्यथानत्वभेदातिरिक्त
संबंधेनेत्यर्थः।नन्वेवंनियमेमानाभावइत्यतआह।तथैवेति।अन्यथाघटःकर्मत्वमानयनंकृ
तिरित्यत्राप्याधेयतासंबंधेनघटपदार्थकर्मतोऽन्वयबोधापत्तिरितिभावः।ननुराज्ञःपु म
रुषइत्यत्रराजपुरुषयोरभेदातिरिक्तसंबंधेनैवान्वयबोधोदयात्नतादृशोनियमइत्यत
आह।राज्ञइति।नामार्थयोरेवतथान्वयः।राज्ञःपुरुषइत्यत्रतुषष्ठ्यर्थस्यनामार्थत्वाभावेनाभेदाति
रिक्तेनापिसंबंधेनान्वयोनानुपपन्नइत्यर्थः।विभक्त्यर्थेति।षष्ठ्यर्थसंबंधनामार्थपुरुषयोरित्यर्थः।
षष्ठ्यास्तुननामत्वं।स्याद्यंतमिहनाम्नेष्टमिति।मिथुन्दविरुद्धत्वादितिभावः।ननुराज्ञःपुरुषइत्यत्र
सेव्यसेवकभाववल्लक्षणसंबंधप्रकारकइवसेव्यसेवकभावसंबंधेनराजप्रकारकपुरुषविशे
ष्यकोऽप्यन्वयबोधोभवति।यथाघटमानयेत्यत्रकर्मतासंबंधेनानयनोपरिघटोप्यन्वेती

तर्कच॰ टी॰
४१

लिखितत्वात्। तथा चैतन्नियमभंग इति चेन्न। तस्यैकदेशिमतत्वात्। मन्मते नामार्थयोरभेदातिरिक्तसंबंधेन
साक्षादन्वयबोधो न स्वीक्रियत इति नियमात्। विभक्त्यर्थमध्यीकृत्य भेदातिरिक्तसंबंधेनान्वय इति
यावत्। प्रकृते च संबंधस्य विभक्त्यर्थत्वान्न द्वारान्वयबोधापगमेपि सति विरहादिति ध्येयं। तद्धृति। ता
दृशनियममभ्युपेत्य राजपुरुष इत्यत्र तथान्वयवारणेतीत्यर्थः। तयोः राजपुरुषयोः तथान्वयः। अभेदा
तिरिक्तसंबंधेनान्वयः। विभाव्येति। तादृशनियमानभ्युपगमे राजपुरुष इत्यत्रैव तथान्वयबोधापत्तिः
अभ्युपगमे तु। अत्रापि न तथा स्यादित्यर्थः। ननु राजपदस्य राजसंबंधे लक्षणेऽस्तां राजपुरुष
इत्यत्र त्वभेद एव तात्पर्येण न संबंधे लक्षणेत्याशंकते। अथेति। तथापीति। राजपदस्य राजसंबंधल
क्षकत्वेपीत्यर्थः। इतिवदिति। इति वाक्यवदित्यर्थः। नामार्थयोरभेदातिरिक्तसंबंधेनान्वयस्याव्युत्प
न्नतया राजपदार्थस्य राजसंबंधस्य आश्रयाश्रयिभावसंबंधेन पुरुषेन्वयासंभव इति भावः। तदे
वेति। राजसंबंधी पुरुष इत्यन्वयानुपपत्तिरूपदोषतादवस्थ्यादित्यर्थः। ननु राजपदस्य राजसंबंध
२५ लक्षणायाः संभवेपि राजपुरुष इति वाक्यमेव राजसंबंधिपुरुषलक्षकमस्त्वित्याशंकते। अथेति।
समुदाय एव राजपुरुष इति वाक्ये एव। शक्तिविरहे। वाक्ये कुत्रापि शक्तिविरहे। लक्षणायाः। वा
क्ये लक्षणाया अयोगादित्यर्थः। ननु गंगापदस्य तीरे शक्त्यभावेपि यथा तीरे लक्षणा तथा वा
क्ये कुत्रचिदप्यर्थे शक्त्यभावेपि लक्षणा स्यादत आह शक्येति। तथा च लक्षणायाः शक्ति
घटितत्वात्तदभावेनुपपत्तिः। तीरे गंगापदशक्त्यभावेपि गंगापदशक्यसंबंधसत्त्वात्तत्र कृष्ण

४.

(82)

१७१:

लक्षणोपपत्तिः। अत्र तु नाम्न्येकत्राप्यर्थे शक्तेरसत्वाल्लक्षणानुपपन्नेति भावः। संबंधीति। राजसंबंधिलाक्षैकमित्यर्थः। क्वचित्तथैव पाठः। ननु नामार्थयोरन्वयबोधो न स्वीक्रियते तेऽभेदेनापि इति कथं पुरुषपदार्थे तदन्वय इत्यत आह। तथा चेति। राजपदस्य राजसंबंधिनि लक्षणे चेत्यर्थः। अभेदेनैवेति। अन्वयः राजसंबंधिपुरुषयोरन्वयबोधः। नामार्थयोरभेदातिरिक्तसंबंधेनान्वयो न स्वीक्रियते येन तदभेदनापि तत्स्वीकार इति भावः। न चैवमिति। षष्ठीतत्पुरुषेऽपि विशेषणविशेष्यवाचकपदार्थयोरभेदान्वयस्वीकार इत्यर्थः। अभेदे कर्मधारय इत्यनेनाभेदबोधस्थले कर्मधारयविधानादिति भावः। समाधत्ते। समासेति। लक्षणा हि वाक्यार्थानुपपत्त्या स्वीक्रियते समासपूर्वं तु न राजपदादौ लक्षणा। अनुपपत्तेरभावात्। तथा च समासपूर्वं विशेषणविशेष्यवाचकपदयोः समानार्थकत्वं ययोर्यत्राभेदान्वयबोधकत्वं तत्रैव कर्मधारयः। पदयोः। राजपदपुरुषपदयोः। तुल्येति। एकविशेष्यकबोधजनकत्वाभावादित्यर्थः। पदे तुल्याधिकरणे विज्ञेयः कर्मधारय इत्यनुशासनादिति भावः। ननु राज्ञः पुरुष इत्यत्र संबंधप्रकारको बोधः। राजपुरुष इत्यत्र तु संबंधिप्रकारक इति भिन्नत्वाद्वाक्यसमासवाक्ययोः समानार्थकत्वभंगापत्तिः। समानार्थकसमासारंभकवाक्यस्यैव विग्रहवाक्यत्वादिति राजसंबंधी पुरुष इत्येव विग्रहवाक्यं वाच्यमिति कर्मधारयत्वापत्तौ तत्पुरुषोच्छेदः। न च राजत्वाऽभेदप्रतियोग्युपस्थापने कर्मधारय इति वाच्यं। नीलोत्पलमित्यादौ नीलपदस्य नीलत्वविशिष्टे शक्तिविरहेण कर्मधारयत्वाभावापत्तेः। तस्माद्राजपदस्य राजसं

८३

मएवलक्षणास्वीकर्त्तुमुचिता । न च राजसंबंधः पुरुष इति वदन्नप्यपापनिरुक्तेव नामार्थयोरिति व्युत्पत्तेरिति ग
म्यं । घटो नेत्यादौ नामार्थयोरप्यन्वयस्य दृष्टत्वात् निपातातिरिक्तस्थल एव तादृशनियमाभ्युपगमेन च समा
सातिरिक्तस्थल एव यथापि तादृशनियमाभ्युपगमात् । न चैवं राजसंबंधे लक्षणा वैयर्थ्यमिति वाच्यं ।
व्याससमासयोः समानप्रकारकबोधजनकत्वरूपसमानार्थकत्वरक्षणायैव संबंधे लक्षणाया
उपगमात् । संबंधप्रकारकबोधस्यानुभवसिद्धत्वाच्चेति । मैवं । समानविषयकबोधजनकत्व
मित्येव तत्समानार्थकत्वं न तु समानप्रकारकबोधजनकत्वं । तत्र आरूढवानरो वृक्ष इत्यत्र आ
रूढः वानरो यमिति विग्रहात् यत्कर्म आरोहणकर्त्ता वानर इति बोधेन समासाच्च वानरकर्तृका
रोहणकर्म वृक्ष इति बोधेन भिन्नप्रकारकबोधस्यैवोदयेन व्यभिचारात् । एवं प्राप्तोदकोग्रा
म इत्यादावपि तत्र प्राप्तं उदकं यमिति विग्रहात् । अथ बहुव्रीहेरविग्रहतया नास्य विग्रहत्वा
वश्यकत्वं चित्रगुरित्यत्र चित्रा गावो यस्येति समासार्थकथनं न तु विग्रहः समस्यमानपदैरेवार्थक
थनस्य विग्रहत्वादिति चेन्न । नहि तत्र विग्रह एव नास्तीति समासानंतरं वाक्यस्यैव विग्रह
५८ त्वात् । किंतु बहुव्रीहौ तत्स्वार्थ[illegible]त्वं समस्यमानपदैरेवार्थ[illegible] विग्रहस्य साधु[illegible]त्व
त्वात् । अत एव बहुव्रीहौ विग्रहस्यासाधुत्वतापनाय तत्र नित्यसमासत्वाभिधानं । अत एव
वचोऽविग्रहो स्वपदविग्रहो वा नित्यसमास इति तल्लक्षणं । अथ समस्यमानपदैरेवार्थकथ
नरूपविग्रहस्य साधुविग्रहस्य वा व्याससमासयोः समानार्थकत्वनियमेऽत्र वेशान्नोक्तस्थ कृभ

५२

लेव्यभिचार इति चेन्न । अत्र योजकत्वात् । वस्तुतस्तु । नामार्थयोरभेदेनैवान्वय इति व्युत्पत्तेः संकोचे मानाभावात् । संबं
धिनि लक्षणायाश्चाश्रयपक्षे समानविषयकबोधजनकत्वमित्येव कल्पनात् ननु समानप्रकारकबोधज
नकत्वरूपे समानार्थकत्वेपि तिदिक् । षष्ठ्येवेति । स्मृतासतीति शेषः । एवं च षष्ठ्या एव संबंधोऽर्थः । आ
श्रयाश्रयिभावेन पुरुषेऽन्वासतेनामार्थयोरेकान्वयेन दातिरिक्तसंबंधेनान्वयबोधनिर्वाहादिति भा
वः । ननु पदस्य न षष्ठीलोपस्तावत्तस्य तु लुप्तषष्ठीस्मरणात्तेन भवेन्नौन्वयबोधानुपपत्तिरेव सत आह । ष
ष्ठीलोपमिति । अज्ञानतस्तु अननुभाव्यत्वात्तु । शक्तिभ्रमात् । राजपुरुष इति समुदायस्य राजसंबंधि
निपुरुषे शक्तिभ्रमात् ननु राजपदस्य शक्तिभ्रमादिसत्त्वे । तथा सति राजपदलक्षणायां चेति सत्या
न्वयकथनानुपपत्तेरिति ध्येयं । न चैवं तत्र शक्तिभ्रमाच्छाब्दबोधस्वीकारे तत्र दोषादीनामननुग
तानां नियामकत्वकल्पने नियमतौल्यं पूर्वेत्ता इदानीं कल्पनेन चागौरवमत आह । राजपदेति । पूर्वकल्पे तु   दोष७
राजपदस्य राजसंबंधिनि निरूढलक्षणा । एतन्मते तु षष्ठीलोपस्मरणासंभवस्थले राजपदस्या
रसिकीलक्षणा इदमेव लाघवमिति भावः । न च रुक्वस्य राजस्मार्तं गदसादौ एतन्मते तु लुप्तषष्ठीस्म
रणस्यावश्यकतया समानविभक्तिकत्वेनाभेदेनान्वयबोधापत्तिरिति वाच्यं । नहि समानविभक्ति
कत्वाभावनिबंधनमभेदेनान्वयाननुभावकत्वं । किंतु समासाघटकपदसापेक्षत्वमपि तदुपा
वेन । सविशेषणानां वृत्तिर्नेवैतस्यापि विशेषणयोगो नेति नियमात् । न चेत्थं चारैः शातितपत्रः चैत्र
स्य दासभार्या इत्यादौ नारकरणक्त्वचैत्रनिरूपितस्तयोः समासविशेषणीभूतज्ञातनदासत्वयोः कु

थमन्वय इति वाच्यं। अभेदेनान्वये तथा नियमात्। स्तोकं पचतीत्यादौ विभेदान्वयानुरोधेन समानविभक्तिकत्वमि
त्यस्य निरूढविवक्षितत्वाहित्यमित्यर्थकत्वावश्यकतया भवन्मते प्राप्तत्वात्स्त्वीचक्रुरित्यस्य रसोऽद्भावनं त
द्योतं तु धूचित्समासपूर्वे विग्रहश्रवणस्य समासार्थकथनपरतया विग्रहश्रवणस्य सर्वेनानारूपक
त्यालुप्तषष्ठीस्मारणकल्पने गौरवात्। कश्चित्तु राजसंबंधिनि स्वारसिकलक्षणाग्रहस्थलानुरोधे
न राजसंबंधिप्रकारकबोधे तादृशसमभिव्याहारज्ञानस्य कारणत्वे कल्पनाया आवश्यकतया
तत्र निरूढलक्षणाया एव न्याय्यत्वात्। न च संबंधिनि तात्पर्यस्यानादित्वकल्पनमेव निरूढ
लक्षणाकल्पने गुरुः। अनादितात्पर्यविषयीभूतार्थनिष्ठलक्षणाया एव निरूढलक्षणात्वा
दिति वाच्यं। नियमतो लुप्तषष्ठीस्मरणकल्पनापेक्षया तात्पर्यानादित्वकल्पनाया एव युक्तत्वा
त्। नन्वेवं [illegible] दधिपश्यतीत्यादावपि दधिपदस्य दधिकर्मके लक्षणापि स्यात्तत्रापि लुप्तवि
भक्त्यनुसंधानेन विनापि बोधापत्तिरिति वाच्यं। तत्र दधिपदस्य द्वितीयेतरविभक्त्यंत
त्वेन भ्रमदशायां दधिकर्मकः पश्यति दधिकर्मत्वेन पश्यतीति सत्त्वेवान्वय। बोधेन कर्मत्वा
र्थकविभक्तिं विना निराकांक्षत्वेन तदनुसंधानस्यावश्यकत्वात्। समासस्थले त्वन्यथैव व्युत्प
त्तिः। अत एवाग्निनोदनं पचेते सत्र तान्येव पदानि समर्थानि न तु तदर्थकानि। अग्निकरणकौदनं
कर्मकपाककृतिरिष्टसाधनमिति तु वाक्येन पदं मिस्तस्थमिति। समासस्थ इति। चरमानयेति

कृष्ण

४३

शब्दसमुदायवारणाय समासस्येति। राजपुरुषइत्यादिसमासवाक्यस्येत्यर्थः। विशिष्टार्थे। राजसंबंधिपु
रुषादिरूपे विशिष्टेर्थे। शक्तिरेवेति। तथा च समासे शक्त्यैव विशिष्टार्थबोधोपपत्तेनीलिद्युक्तं वृत्ति
कल्पनमिति भावः। एवं समासे शक्तिस्वीकारे। राजपदेति। राजपुरुषइत्यत्र राजपदं ताहिशक्तिमि
ति शक्तिज्ञानशून्यस्यापि राजपुरुषपदे राजसंबंधिपुरुषे सा शक्तमिति शक्तिज्ञानसंभवेन तादृ
शबोधापत्तेरित्यर्थः। समस्तेति। समासस्थले विशिष्टार्थे शक्तिग्रह इत्यर्थः। नचेति। नहीत्यर्थः। अ
वयवशक्त्यग्रहे। राजपदादिशक्त्यग्रहे। अनुशासनग्रहः। अनुशासनमन्यः। विशिष्टार्थे शक्ति
ग्रहः। लक्ष्यशक्तिग्रहस्य अवयवशक्तिग्रहस्य समुदायग्रहे। समुदायशक्तिग्रहे। हेतुत्वादिति। अव
हातादिनानार्थे शक्तिग्रहः। किंतु व्याकरणादितः। व्याकरणेन हि प्रसक्त्या राजपदादिसमुदायो
विशिष्टार्थे शक्त इति बोधनीयं। तत्तु प्रसिद्धशक्त्यग्रहे न संभवतीति तथाच समस्तशक्तिग्रहे
अवयवशक्तिग्रहस्य हेतुत्वात्तर। राजपदादिशक्तिग्रहाभावे समुदायशक्तिग्रहस्याप्यभावेन ये ५
ज्ञाततोऽन्वयबोध इति भावः। अनवयवेति। राजपदस्य राजसंबंधिलक्षणैवेत्यर्थः। समुदायश
क्तौ। समासवाक्ये विशिष्टार्थशक्तौ मानाभावादिति। अनन्यलभ्यो हि शब्दार्थ इति न्यायादिति
भावः। ननु गंगायां घोष इत्यत्रैव जहत्स्वार्थैवात्र लक्षणा चेत्या। तत्तु न संभवतीति। राजपदस्य
सज्जपदस्य राजसंबंधिलक्षणायां स्वार्थपरित्यागाभावादित्यत आह। तदुक्तमिति। यत्र
रूढिः शक्तिविरोधिनी स्वार्थविषयकविशिष्टार्थबोधस्वरूपायोग्या तत्रैव जहत्स्वार्था

नि ५

न त्वन्यत्र। अन्यत्र तु अजहत्स्वार्था। यथा गंगायां घोष इत्यत्र तीराधिकरणको घोष इत्येवान्वयबोध उपेयस्तत्र च प्रवाहस्य तादृशबोधाविषयत्वाभावेन तादृशबोधस्वरूपायोग्यसमस्तेन। गंगापदस्येति गंगापदे जहत्स्वार्था लक्षणा। मंचाः क्रोशंतीत्यत्र तु मंचपदस्य मंचस्थपुरुषे लक्षणायां मंचरूपस्यार्थस्यापि तादृशबोधविषयत्वादजहत्स्वार्थैव लक्षणा। एवं च नन्वेवं जहत्स्वार्थैव लक्षणा येन राजपदस्य राजसंबंधिनि लक्षणावश्यकत्वं न स्यात्। किंत्वजहत्स्वार्थापीति सात्रांगीकार्येति भावः। वस्तुतस्तु नन्वेवं पंकजमित्यादावपि समुदाये शक्तिर्न स्यादवयवलक्षणयैव पद्मत्वविशिष्टबोधोपपत्तेरित्यत आह तदुक्तमिति। यत्र रूढिप्रसिद्धिः योगविरोधिनी तत्रैव जहत्स्वार्था लक्षणा। यथा कर्मणि कुशल इत्यादौ दक्षे रूढिप्रसिद्धिः कुशान् लातीति कुशादानकर्तृयोगार्थस्य विरोधिनी दक्षे कुशादानकर्तृत्वस्य बाधादिति। कुशलपदस्य विवेचकत्वरूपेणास्य संबंधसत्वात्। दक्षे लक्षणा। बाधेनेशस्यावयवार्थबोधाभावात्। न चात्र विवेचकत्वेन लक्षणायामजहत्स्वार्थत्वमिति वाच्यं। यत्र स्वार्थस्य विशेष्यतया क्रियान्वये प्रवेशः साऽजहत्स्वार्था। यथा छत्रिणो यांतीत्यादौ। एवं यष्टीः प्रवेशयेत्यत्रापि जहत्स्वार्थैव। प्रकृते च राजपुरुष इति समुदायस्य राजसंबंधिपुरुषे रूढिः प्रसिद्धिः राजाश्रितपुरुषस्य योगार्थस्याविरोधिनीति तत्र अजहत्स्वार्था लक्षणा स्वार्थस्यात्रापि विशेष्यतया क्रियान्वयप्रवेशाभावात्। पंकजमित्यादौ तु पद्मस्य रूढ्यर्थस्य पंकजनिकर्तृत्वयोगार्थस्याविरोधात्। अवयवशक्त्यैव पंकजनिकर्तृबोधः। पद्मत्वविशिष्टबोधार्थं च पंकजपदस्य

राम

५५

(88)

पद्मत्वविशिष्टे लक्षणाकल्पने तु शक्त्या पंकजनिकर्तृयोगार्थस्य लक्षणया च पद्मत्वविशिष्टस्य बोधः त
स्य युगपद्वृत्तिद्वयविरोधेनासंभवात्। पंकजपदस्य पद्मत्वविशिष्टे समुदायशक्तिरावश्यकी। तस्मा
द्युगपद्वृत्तिद्वयविरोधेन शक्त्या लक्षणया च बोधानुपपत्तेः। पंकजपदे समुदायशक्तिरावश्यकी।
समासे तु नैवमिति। अथवा पंकजमित्यत्रापि लक्षणयैवोपपत्तेः समुदायशक्तिर्न स्यादत आह।
तदुक्तमिति। यत्र रूढिः समुदायशक्तिः योगविरोधिनी योगः अवयवशक्तिः तद्विरोधिनी त
त्रैव जहत्स्वार्था लक्षणा यथा मंडपं भोजयेत्यत्र तत्र हि मंडपपदस्य गृहविशेषे रूढिः योगवि
रोधिनी रूढ्यर्थगृहे मंडपानकर्तृत्वासंभवात्। तत्र रूढेर्योगापहारितेति प्रवादात् अवयव
शक्त्या मंडपानकर्तुर्बोधासंभवात्। मंडपपदस्य मंडपानकर्तरि लक्षणा इत्थं च रूढ्यर्थगृ
हसंबंधितावच्छेदकतया गृहीतचैत्रत्वादिनान्वयबोधो न तु मंडपानकर्तृत्वेन। पंकजमि
त्यादौ तु रूढ्यर्थस्य पंकजनिकर्तृत्वस्य योगार्थस्याविरोधादन्वयबलात्तस्यैव बोधः। पद्मत्वविशि
ष्टस्य च लक्षणया बोधोपगमे युगपद्वृत्तिद्वयविरोधात् पंकजपदे समुदायशक्तिरावश्यकी
राजपुरुष इत्यत्र तु राजसंबंधिपुरुषे शक्तिः तद्भिन्नपुरुषस्यावयवार्थस्याविरोधादन्वयबला
त्स्या तद्बोधाभावेन युगपद्वृत्तिद्वयविरोधाभावाल्लक्षणैव स्वार्थस्यावयवार्थस्य त्या
गाजहत्स्वार्थत्वोक्तिरिति। सारं। स्वोक्ते समासेऽवयवलाक्षणिकत्वे उपष्टंभकमाह।

नकृ.श.
५५

तदुक्तमिति । यत्रेति । यत्रानुभूयमानसमुदायार्थोऽवयवार्थविरुद्धस्तत्र पदे जहत्स्वार्थलक्षणेति समुदाया
र्थे इत्यपि कश्चित् । एतन्मते तत्र जहत्स्वार्थैवेत्यन्वये विना गतिरिति ज्ञेयं । उपसंहरति । तस्मादिति ।
अन्यथेति । अवयवलक्षणोपपत्तावित्यर्थः । अनन्यलभ्यस्यैव शब्दार्थत्वादिति । अन्यथा गंगापदस्यापि ती
रे शक्त्यापत्त्या लक्षणोच्छेदापत्तेरिति भावः । ननु । चित्रगुरित्यादौ चित्रगोस्वाम्यन्वयोऽनुभवसिद्धस्तस्य
चावयवशक्त्या लक्षणया नोपपत्तेः समुदाये शक्तिरावश्यकीति कथं समासे शक्तिरित्याशंकते । स्या
देतदिति । बहुव्रीहौ तु चित्रगुरित्यादिबहुव्रीहौ तु । नन्वत्रापि अवयवलक्षणयैवोपपत्तौ न शक्तिः क
ल्पनीयेत्यत आह नहीति । लक्षणया । अवयवलक्षणया निर्वाहः । विशिष्टार्थबोधः । अनिर्वाह
मेवोपपादयति । तथाहीति । नहीति । गोपदस्य गोस्वामिलक्षणत्वे चित्रपदार्थस्य गवि अन्व
यावश्यः । स च न संभवतीति पदार्थैकदेशत्वादिति भावः । चित्रस्य । चित्रपदार्थस्य चित्रत्ववि
शिष्टस्य गावान्वयः । गा०वि अन्वयः । गवेति । तृतीयांतं वा गवा सहेत्यर्थः । संभवतीति । चित्रपदा
र्थस्य चित्रस्याभेदेनान्वयो गवि न संभवतीत्यर्थः । तस्य । गोः । ननु तत्पुरुषस्याव्यवहितपूर्वो
पस्थितमुख्यविशेष्यपरामर्शकतया गवान्वयोपसर्जनतया कथं तत्पुरुषेण गोः परामर्श इति वाच्यं ।
तत्पुरुषस्याव्यवहितपूर्वोपस्थितमात्रपरामर्शकतया तात्पर्यबलादन्वयोपसर्जनस्यापि गोर्बोधने
बाधकाभावात् । गवेति । तृतीयांतत्वे दोषास्पर्शाच्च । पदार्थैकदेशत्वाद्गोस्वामिरूपपदार्थै
कदेशत्वात् । गोर्भिन्नत्वेऽपि तत्र गोत्वे नित्यत्वान्वयवारणाय पदार्थः पदार्थेनान्वेति न तु पदार्थैक

कृश
५५

९०

दर्शनेति युक्तसंस्कारस्यावश्यकत्वादिति भावः। केचित्तु। चित्रस्य चित्रविशेषणतयोपस्थितस्य चि
त्रत्वस्येत्यर्थः। चित्रपदस्य उभयत्र प्रयोगात्। तस्य चित्रत्वस्य पदार्थैकदेशत्वात् चित्रपदार्थैकदेश
त्वात्। एवं विशेषणतयोपस्थितस्य अन्यत्र विशेषणत्वेनान्वये निराकांक्षत्वादिति भाव इत्याहुः।
तन्न। एवमपि चित्रस्य गवि अभेदेनान्वये बाधानुक्तेः। अत एवेति। चित्रस्य गवान्वयासंभवादेवे
त्यर्थः। गवानन्वयेति। चित्रपदस्य चित्रसामान्यपरत्वे पदार्थैकदेशतया चित्रेन गोरन्वयः। नापि चि
त्रस्यामिति नामार्थयोरभेदेनैव व्युत्पत्तेरिति भावः। पदद्वयेति। चित्रपदे गोपदे चेत्यर्थः। ननूभ
यत्र लक्षणायां गौरवात्तदपेक्षया समुदायशक्तिरेवास्तामित्यत आह। नत्विति। अन्येति। अनन्यल
भ्यस्यैव शब्दार्थत्वेनोभयत्र लक्षणायां गौरवस्य प्रामाणिकत्वादिति भावः। पदद्वये लक्षणाकल्प
नेऽन्यतरपदवैयर्थ्यापत्तेः न लक्षणावादिमीमांसक[illegible]कमतमाह। मीमांसकास्त्विति। समुदाय
एव। चित्रगुरित्यादिवाक्यमेव। लक्षणा। चित्रगोस्वामिनि लक्षणा। समुदायस्य। वाक्यस्य। शक्याभा
वादिति। वाक्यस्य कुत्रचिद्दोशक्यभावात् स्वशक्यसंबंधरूपलक्षणादुर्वचेत्यर्थः। स्वबोध्यस्येति।
गंगापदबोध्यस्य प्रवाहस्य संबंधस्तीरेऽस्तीति तत्र तत्सत्त्वमुपपन्नं। परंतु शक्यत्वेन न तत्प्रवेशः।
किंतु बोध्यत्वेनेति शेषः। अत्र चित्रगुरित्यत्र बहुव्रीहावपीत्यर्थः। वाक्यस्यापि चित्रगुरिति वा
वच्यस्यापि। विशिष्टबोध्यामिति। एकदेशविकृतमनन्यवद्भवतीति न्यायेनाचि[illegible]त्रगुरिस

त्र चित्रगोरितिवाच्यस्यासत्त्वात् । तस्य च बोध्यं चित्रगोस्तत्संबंधश्चित्रगोस्वामिन्यस्तीति भावः । शक्य
संबंधस्य लक्षणात्वे दूषणं दर्शयन्नस्य बोध्यसंबंधस्यैव लक्षणात्वमुपपादयन्नन्येति । वाक्ये लक्षणाया
अनंगीकारे इत्यर्थः । का गतिः । कथमन्वयबोधः । तदेवोपपादयति । नहीति । गंभीरायामिति । नदी
पदस्य तीरलक्षकत्वे गंभीरायामित्यस्य तीरे अन्वयो वाच्यः स च न संभवतीत्यर्थः । अनन्वय
मेवाह । नहीति । नदीपदस्य तीरत्वेन नदीतीरत्वेन वा लक्षणायां गंभीरपदस्य पदार्थैकदेश
तया नद्यामन्वयासंभवात् तीरे च विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्थले ऽभेदा
न्वयस्यैव व्युत्पन्नतया भेदेनान्वयासंभवादभेदेनैवान्वयो वाच्यः । स तु न संभवति । बाधादिति
भावः । नद्यामित्यस्यैवेति । गंभीरपदस्य गंभीरसंबंधितीरत्वेन तीरत्वेन वा लक्षणायां नद्याः पदा
र्थैकदेशतया गंभीरेऽन्वयासंभवात् तीरे च समानविभक्तिकस्थले अभेदेनान्वयस्य व्युत्पन्न
तयाऽभेदेनैवान्वयो वाच्यः । स तु न संभवति । बाधादिति भावः । अनन्वयमेवाह । नहि
तीरं नदीति उपसंहरति । तस्मादिति । अनन्येति । शक्त्या लक्षणया वा विशिष्टबोधस्या
नुपपत्तौ । वाक्यमेव गंभीरायां नद्यामिति वाक्यमेव । लक्षकमिति । पंकजपदेऽनोपपत्ता ति ३
वाक्ये शक्तिस्वीकारेऽपि अन्वयानुपपत्तेस्तत्र ~~शक्ति~~ लक्षणैव । कुत्र वाक्ये शक्तिकल्पनाद
न्यत्रापि ~~शक्ति~~ तत्कल्पने च गंगापदस्य प्रवाहे शक्तेः कूलत्वेन तीरेऽपि शक्तिकल्पनापत्ता कूल

५८

५२

लक्षणोच्छेदापत्तेरतः स्वबोध्यसंबंधस्य लक्षणात्वमुपगम्यैतस्य बारीति । वाक्यमिति । चित्रगुरित्यादिवा
क्यमित्यर्थः । नृविशिष्टार्थेति । चित्रा भिन्ना गावो यस्येत्यादिविशिष्टार्थबोधकत्वेनेत्यर्थः । तद्बोधकतेति ।
विशिष्टार्थबोधकतानवच्छेदकत्वेत्यर्थः । न सत्त्वेन च किं लक्षणयेति भावः । अत इति । शक्तेरभा
वाद्धेतोः । अर्थशून्यं वचनं इत्यर्थः । अपभ्रंशेऽपि शक्तिभ्रमेण स्वबोध्यसत्त्वात् तत्रापि लक्ष
णापत्तिः । तथा च वृत्तिमत्त्वे सत्येव पदत्वं धुत्वरूपत्वेन पतेऽपि प्रयोगापत्तिः । साधूनेव प्रयुंजी
तेत्यनेन विरोधाभावादतः शक्त्या स्वबोध्यस~~बोध्य~~संबंधो लक्षणोसैव बाध्या । न चैतद्वाक्ये सम्भ
वतीति भावः । ननु वाक्ये समुदायत्वेन शक्त्यभावेऽपि प्रत्येकपदशक्त्या स्वबोध्यमस्त्येव । गंभी
रपदसमभिव्याहृतनदीशक्त्यमेव विशिष्टबोधकतावच्छेदकं अपभ्रंशे तु नैवमिति तस्य
रसादाहृत् द्विंचेति । स्वबोध्येत्यत्र बोधकत्वं च मात्रं विवक्षणो गंगायां घोष इत्यत्र गंगाया
मितिसमुदायस्यापि लाक्षणिकत्वापत्तिरतस्तत्त्वेन बोधकत्वं विवक्षणीयं । तथा त सा
ह । गंभीरायामिति । तीरे । गंभीरनदीतीरे । तदाधारत्वेति । तीरस्याधारत्वेत्यर्थः । विभक्तेः प्र
सादिद्वारापाभ्नभावेनाधारत्वबोधाभावादिति भावः । विभक्तिशून्यपदस्यापि न लक्षणे सा
ह । नापीति । सप्तमीशून्यगंगापदस्येत्यर्थः । इह तु सप्तम्या एव बोधकत्वान्नाधारताप्रस
पानुपपत्तिरिति भावः । तस्य । गंभीरतया नदीतिभागस्य । तद्बोधकत्वादिति । त

तद्धप्र.रा.
५७

मानविभक्तिकपदस्यैवाभेदान्वयबोधकतया विभक्तिमदन्यभागस्याभेदान्वयबोधकत्वाभावादित्यर्थः। तथा च स्वबोध्यसंबंधरूपा लक्षणापि नात्र संभवतीति ज्ञेयं। यद्यपि पदानां स्वस्यान्वय[illegible]बोधकत्वं न समूहत्वेन। न चेतरपदावच्छिन्नेतरपदत्वेन स्वरूपमेव गृह्यते हि विभक्त्यन्तभागस्य लक्षकत्वेप्येष दोषः। तथापि इतरपदावच्छिन्ने इतरपदे फलोपधानरूपबोधकत्वं संभवत्येव गम्भीराभिन्ना नदीति शाब्दबोधे समानविभक्तिकगम्भीरपदसमभिव्याहृतनदीपदज्ञानत्वेनानुपूर्वीज्ञानस्य कारणत्वादिति पूर्वत्र नायं दोष इति ध्येयं। नन्वभेदान्वयेन समानविभक्तिकत्वं तंत्रं स्तोकं पचतीत्यत्र व्यभिचारात्। किंतु विरुद्ध[illegible]विभक्तिरहितत्वमेव तच्च विभक्तिमदन्यभागेप्यस्तीत्यत आह। बोधकत्वेवेति। लक्ष्ये तीररूपलक्ष्यार्थे। विभक्त्यर्थेति। आधारत्वानन्वयापत्तेरित्यर्थः। अनन्वयमेवाह। प्रसमानाविति। यथा घटमित्यत्र घटीया कर्मतेति घटरूपप्रकृत्यर्थान्वितकर्मत्वरूपस्यार्थप्रतिपादकत्वं अम्विभक्तेः। न च धवखदिरौ छिंधीत्यादौ द्वितीयार्थकर्मत्वस्य प्रकृत्यर्थधवान्वितत्वात् कथमेतदिति वाच्यं। यादृशसमुदायोत्तरविभक्तिः तस्यैव प्रकृतित्वेन धवस्यापि प्रकृत्यर्थत्वात्। सभागः। गम्भीरायां नदीति विशिष्टवाच्यात्मकभागः। प्रकृतिरिति। नदीपदोत्तरमेव विभ

कृ.स
५७

९५

कैक्ष्यमाणतया नदीपदमेभव प्रकृतिः तदर्थश्च नभवमते विशिष्टनदीतीरं विशिष्टवाक्योत्तरं च षष्ठ्यापि
विभक्तेरदृष्टत्वेन न वाक्यस्य प्रकृतित्वमिति भावः । ननु द्वित्थं कपित्थं समुदायवत् गम्भीरायां नदीति
वाक्योत्तरमेव विभक्तिरिति तस्यापि प्रकृतित्वमास्तामित्यत आह गम्भीरायामितीति । गम्भीरायां
नदीति वाक्योत्तरं यदि विभक्तिः स्यात्तदा सुपो धातुप्रातिपदिकयोरिति तयोरवयवस्य सुपो लुकि
स्यादिसत्त्वेन गम्भीरायामिति सप्तम्या लुकि स्यादिति गम्भीरायां नद्यामिति न स्यात् । किंतु गम्भीरनद्यामि
ति स्यादित्यर्थः । वस्तुतस्तु ननु नीलं घटमानयेत्यत्रापि विशिष्टे कर्मत्वान्वयो न स्यात् नीलस्यात्र
कर्मत्वादित्यत आह गम्भीरायामितीति । विशेषणवाचकपदस्य विशेष्यवाचकपद
समानवचनत्वानुरोधेन गम्भीरायामिति सप्तमी । न च न्मा ते च नदीपदस्य विशेष्यवाच
कपदत्वाभावात् गम्भीरायामित्यस्य विशेषणवाचकपदत्वाभावाद्वा गम्भीरायामिति सप्त
मी न स्यादित्यर्थ इति सारं । नदीपदोत्तरसप्तमीत एव लक्ष्यार्थे आधारत्वान्वयसंभवे क्वचित् १३
~~भव~~ गम्भीरायामित्यत्र विभक्त्यर्थान्वयासम्भवादिति भावः । इत्यपि तत्त्वं । वक्ष्यमा
णस्य पते पितदेव्यार्थस्य चेत् । अयेति । गम्भीरायां नद्यामिति विपन्नत्यत्तभागसेवस
र्थः । विपन्नत्यलस्य नोमत्वाभावेन नामाधर्यतोरिति व्युत्पत्तसनवकाशाद्दे नैव घोषित

95

रमा

दर्थान्वय इति भावः। अशक्तत्वादिति गंगायामित्यत्र समुदायस्यापि लाक्षणिकत्वापसाक्षात्त्वेन बोधकत्वं वाच्यं। एवमपभ्रंशवारणाय शक्त[illegible]त्वावश्यकं। इत्थं च शक्यवद्विज्ञायातत्तावच्छिन्नबोधकता तस्या एव निवेशात् वाक्यत्वेन बोधकतायां च शक्तत्वेनावच्छेदकत्वावश्यकत्वान्न वाक्ये लक्षणासंभवः। वस्तुतस्तु अपभ्रंशवारणाय शक्यस्य बोधे तस्यावश्यकतया वाक्ये न शक्तिरित्याह। वाक्यमित्यात्। ननु अपभ्रंशस्यापि लक्षणत्वे इष्टापत्तिः। वृत्तिमत्त्वमेव पदसाधुत्वमित्यत्र च शक्यसंबंधरूपलक्षणायाः एव वृत्तिमत्त्वघटकतया तत्र वृत्तिमत्त्वरूपसाधुत्वाभावात्। प्रमाधीनस्वबोध्यस्य संबंधो लक्षणेसस्वात् तल्लक्षणत्वेनापभ्रंशस्य प्रमाधीनबोध्यप्रकारकज्ञानानुपपत्तिरित्यस्य स्वरसात्तात्पर्येन बोधकत्वावश्यकत्वमभिप्रेत्य दोषमाह। किंचेति। अशक्तत्वादिति। स्वबोध्यत्वं तेन स्वजन्यबोधविषयत्वं समवायेन घटपदस्यापीति गगनादेः संबंधमन्तरा दुरुपस्थितस्य शाब्दबोधापत्तेः। न च स्वजन्यशाब्दबोधाविषयत्वं तदिति वाच्यं। गंगायां घोष इत्यादौ गंगापदे लक्षणानापत्तेः। तेन गंगापदेन प्रवाहे शाब्दबोधाजननात्। तस्मात् तस्य स्वजन्यबोधविषयत्वमेव तत्त्वं वाच्यं। तच्च शक्यसंबंधस्य लक्षणात्वापेक्षया गुरुतरं वाक्ये शक्त्यभावात् प्रकृतन्त्यासंभवीति भावः। उपसंहरति। तस्मादिति। वाक्ये लक्षणाया असंभवा

दित्यर्थः । पदद्वय एव गम्भीरपदे नदीपद एव वा विनिगमकेति । एकतरपक्षपातिनी हि युक्तिर्विनिगमना तस्या अ
भावादित्यर्थः । विशिष्टेति । विशिष्टा गम्भीरा या नदी तस्यास्तीरे इत्यर्थः । नन्वेकस्यैव लक्षणया
विशिष्टार्थबोधकत्वसंभवे अपरपदं व्यर्थमित्यत आह । नन्वेति । एकपदवैयर्थ्ये नन्वेस
न्वयः । परस्परेति । नदीपदेन गम्भीरनदीतीरबोधे जननीये गम्भीरपदसमभिव्याहारो नि
यामकः । गम्भीरपदेन वा तादृशबोधे जननीये नदीपदसमभिव्याहारो नियामक इत्यर्थः । लक्ष्या
र्थबोधे तात्पर्यज्ञानस्य हेतुत्वान्नदीपदं गम्भीरनदीतीरप्रतीतीच्छयोच्चरितमिति तात्पर्यज्ञा
नं गम्भीरपदसमभिव्याहारादेव भवति । अन्यथा केवलं नद्यामित्युक्ते गम्भीरनदीतीरबो
धापत्तेरिति भावः । एकत्रैव पदे यदा लक्षणाप्रतिसंधानं तदा तत्पद एव लक्षणा यदा तूभ
यपदे लक्षणाप्रतिसंधानं तदोभयपदलक्षणैव शाब्दबोधप्रयोजिका संभवेद्वा नत
र्वैयर्थ्यमिति न्यायेन चैकमेव विशिष्टतीरं बुध्यत इति द्रष्टव्यं । अत्रेदं बोध्यं । गम्भीरन
द्योरन्वयबोधोत्तरं गम्भीरतरनदीसंबन्धग्रहात् नदीपदेन विशिष्टतीरं लक्ष्यते । अन्य
था नदीसंबन्धग्रहात् विशिष्टतीरबोधापत्तेः । इत्थं च स्वशक्यनिरूपितसंबन्धो लक्षणा सा
च पद एव । न वाक्ये शक्त्यभावात् । वाक्ये लक्षणा नास्तीति मतेऽपि प्रत्येकपदद्वयेपि निग
मकाभावात् लक्षणापि दुर्वचेत्यर्थः । न चैवं नीलं द्विरेफमानयेत्यत्र विशिष्टसंबन्धि

निलक्षणानुपपत्तिः। पदद्वयस्यापि लाक्षणिकतया, नत्वनुभावकत्वेन स्वतात्पर्यसिद्धेरिति वाच्ये लक्षणायादिना सह तुल्यत्वमिति वाच्यं। लाक्षणिकस्यापि अनुभावकत्वांगीकारात्। वस्तुतस्तु शक्यसंबंध एव लक्षणा नदीपदस्य नद्या इव गम्भीरनद्या अपि शक्यत्वात्। गम्भीरपदस्य तात्पर्यग्राहकत्वात् तात्पर्यं च गम्भीरविशिष्टा नदीति अवान्तरवाक्यार्थबोधं विनापि गम्भीरनदीतीरलाभसंभव इति दिक्। तं सद्दृस्यनेनास्वरसः सूचितः। सच गम्भीरपदस्य गम्भीरत्वशक्ततया तस्य स्वाश्रयाभिन्ने नदीसंबंध एव तीरे वाच्य इति परंपरासंबंधे गौरवात् साक्षात्संबंधसंभवात् नदीपद एव लक्षणा युक्ता। यदि च घोषेतरपदवत् धर्मिण्यपि शक्तिः नीलादिपदवत् केवलगुणमात्रे गम्भीरपदप्रयोगादिति विभाव्यते। तथापि शुक्लादिपदानां गुणमात्रवाचकत्वेन शुक्लायां नद्यां घोष इत्यादौ साक्षात्संबंधासंभवात् विशेष्यवाचकपद एव लक्षणायाः क्लृप्तत्वात् सर्वत्रोत्तरपद एव लक्षणा। एवं चित्रगुरित्यत्रापि गोपद एव सा। तथा च सर्वत्रोत्तरपद एव बहुव्रीहौ लक्षणेति केचित्। गम्भीरपदेन लक्षणायां नदीपदोत्तरसप्तम्या अन्वयो न स्यात्। विशेषणविभक्तेरयोगात्। [illegible]त्यादिति विशेष्यवाचकपद एव लक्षणा। न च विशेष्यवाचकपदोत्तरविभक्तेनैवात्र शाब्दसाधुत्वमास्त्विति वाच्यं। विशेषणाविभक्तिकत्वेन सामान्यतः प्रयोगस्य साधुत्वकल्पनादित्याहुः। तदसत्। लाक्षणिकस्यार्थानुभावकत्वे गम्भीरपदस्य विशेषणपदत्वाभावेन गम्भीरपदोत्तरसप्तम्या एवान्वयसंभवादिति। अपरे तु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरुत्तरपद एव कृप्त

नबहुव्रीहश्चेति द्वेधा। भ्वादयो धातवः चैत्रादीन् भोजय लंबकर्णमानयेत्यादावाद्यः अंत्यस्तु चित्रगुरित्यादौ।
तथाहि भ्वादय इत्यादौ क्रियायां चिन्त्येन निर्मंत्रितत्वेन लंबकर्णावयवविशेषःसंबंधस्तद्वक्तित्वे
नान्वयबोधः। लक्षकसंबंधस्यैव लक्ष्यतानवच्छेदकत्वात्। तेन रूपेणैव बोधात्। विशेषणस्यापि
भ्वादेः क्रियान्वयादजहत्स्वार्थात्र लक्षणा। तत्र समस्यमानपदार्थस्य गुणीभूतस्यापि सम्यकृवि
शेषक्रियायामिलानं यस्यादिलिबुसत्तेरिति संप्रदायः। अत्राहुः। यदि लंबकर्णेत्यादौऽजहत्
स्यापि ८ स्वार्थालक्षणा तदा लंबकर्णविशेषत्वेनैवान्वये ऽनुभवबाधः। तस्मादत्रापि जहत्स्वार्थै
व। विशेष्यत्वेन विधेयान्वये स्वार्थत्यागात्। यत्र विशेषणतया स्वार्थस्य विधेयान्वयः।
स तद्गुणसंविज्ञानबहुव्रीहिः। उपलक्षणतया यत्र स्वार्थस्य विधेयान्वयः स अतद्गु
णसंविज्ञानबहुव्रीहिः। विशेष्यान्वयिना ऽन्वयित्वमेव विशेषणत्वं। यद्यपि लंबकर्णेत्यादौ
लंबकर्णसंबंधित्वेनोपस्थितिः। चित्रगुरित्यादौ चित्रगोसंबंधित्वेनोपस्थितिस्तुल्यैव। तथापि लंबकर्णा
देर्विशेष्यान्वयिना ऽन्वयात् विशेषणतया विधेयान्वयः। चित्रगोस्तु उपलक्षणतयातथेति। अत्र शी
घ्रस्यात्मनाव्यमेव तंत्रमिति। केचित्तु भ्वादिः प्रथमपठितो येषामिति विग्रहवाक्यात् भ्वभिन्नः वा४
प्रथमपठितो यत्संबंधीति बोधः। समासात्तु भ्वाद्यभिन्न प्रथमपठितत्संबंधीति बोधः। एवं चै
त्रः आदिः प्रधानो येषामिति विग्रहवाक्यात् चैत्राभिन्नः प्रधानो यत्संबंधीति बोधः। समासात्तु
चैत्राभिन्नप्रधानसंबंधीत्यन्वयबोधः। संबंधस्य स्वपाठप्राथम्यावधित्व। स्वनिष्ठप्राधान्यावधि

९९

त्वं च। अत्र भूवामित्र प्रथमपठितसंबंधित्वं चैत्रामित्रप्रधानसंबंधित्वादिना आदिशब्दस्य लक्षणा लक्ष्यतावच्छेदकस्यापि भूवादेर्विशेष्यान्वयित्वात् धातुत्वादिना। यथा तद्गुणसंविज्ञानलक्षणायामप्यजहत्स्वार्थसंचेतकः। अत्र परे तु लंबकर्णादौ विशेषतया। यथा न नुभवनादस्तु अतत्स्वार्थो भूवादय इति। अत्र तु गणपठितत्वनिमंत्रितत्वादिनैव बोधः। शक्यलक्ष्ययोर्विधेयान्वयानुभवात्। शाब्दे भ्यो दाधिरस्थलामित्रैव। शक्यलक्ष्ययोर्विशेषान्वयित्वान्वयमात्रादेव लंबकर्णभूवादिसाधारणं तद्गुणत्वादिकमित्यतत्कः। आदिशब्दे गणपठितत्वनिमंत्रितत्वादिना लक्षणा। अचैत्रादिपदं तात्पर्यग्राहकमित्यपरे। भूसत्तात्वादिना चैत्रत्वमैत्रत्वादिना नानारूपेण लक्षणा युगपद्वृत्तिद्वयविरोधानुपगमात्। बलदुपगमे तु पुष्पवंतादिपदे नानारूपेणैकशक्तेरिव नानारूपेणैव लक्षणायाः स्वीकारान्न दोष इत्यपरे। चैत्रशब्दे न शक्त्या चैत्रत्वेनादिशब्देन च लक्षणया मैत्रत्वादिना बोधः। चैत्रपदार्थादिपदार्थयोरभेदेनान्वयबोधस्यापि तात्पर्यविषयत्वात्। द्वंद्वे चाभेदेनान्वयाभावान्न द्वंद्वतापत्तिरित्यपि केचिदलं कृतं पल्लवितेन ॥ अव्ययीभावसमासेपि शत्रुभावान्मुखपादपतीति। उपकुंभमित्यव्ययीभावः। अर्धपिप्पलीति तत्पुरुषः। उपशब्दनिपाते षष्ठ्यंतसाकांक्षत्वाभावात् कुंभस्योपेति नात्र विग्रहः। किंतु कुंभस्य समीपमिति उपकुंभमिति द्रष्टव्यः। उत्तरपदेति। कुंभपदस्य कुंभसंबंधिनि। पिप्पलीपदस्य पिप्पलीसंबंधिनि लक्षणा। तस्य चोपाद्यर्थे सामीप्यादेरभेदेना

प१

न्वयः। वस्तुतस्तु। उपपदार्थः सामीप्यं न तु समीपः। तथा चोपदस्यापि समीपार्थे लक्षणा। एकदेशे च सामीप्ये
कुंभादिसंबंधिनस्तादात्म्येनान्वय इति पदद्वयलक्षणापेक्षया [illegible] कुंभपदस्यैव कुंभसमीपपरता उपपदं च प२
तात्पर्यग्राहकमिति। केचित्तु। चंद्र इव मुखमित्यादौ इवार्थसादृश्यस्याभेदेन मुखे। अन्वये नाव्ययनिपा
तातिरिक्तस्थल एव नामार्थयोर्भेदेनान्वयबोधानंगीकारात्। उपपदार्थसामीप्ये कुंभस्यान्वयबो
धासंभवात्। तत्संबंधप्रकारकानुभवानुरोधेन परं कुंभपदस्य कुंभसंबंधे लक्षणा। अनुभवानु
रोधे तु अत्रापि उत्तरपदेन लक्षणेत्याहुः। अन्ये तु। उत्तरपदलक्षणादिनान्यलभ्यत्वादित्यर्थः। अन
न्यलभ्यस्यैव शक्यार्थत्वादिति भावः। एवं निर्मक्षिकमित्यव्ययीभावे पूर्वपदे मक्षिकाभावे
लक्षणा। पूर्वपदं तात्पर्यग्राहकमित्यपि ध्येयं। समाहारद्वंद्वेतरेतरद्वंद्वभेदेन द्वंद्वो द्वेधा। तत्
त्र समाहारद्वंद्वे पाणिपादमित्यादौ पाणिपादपदस्य पाणिपादप्रतियोगिकसमाहारे शक्ति
रिति मतं दूषयति। समाहारेति। पाणिपदस्य पाणिप्रतियोगिके पादपदस्य पादप्रतियोगिक
समाहारे पदद्वय एव लक्षणा। पाणिप्रतियोगिकाभिन्नपादप्रतियोगिकसमाहारवाद्ये स
न्वयबोधः। समाहारे च विभक्त्यर्थैकत्वान्वयः। अत एव समाहारस्यैकत्वादेकवचनमिति। पा२
उत्तरपद एव पाणिपादप्रतियोगिकसमाहारे लक्षणा। पूर्वपदं तात्पर्यग्राहकमित्याहुः। ननु
समाहारे शक्तिः अन्यलभ्यत्वादित्याह। न पाणीति। समाहारं लक्षयति समाहारस्येति। कि

यावानुपनीतफलानुकूलसजातीयविजातीयव्यापारप्रचयस्तत्त्वैकरूपस्तुल्यसंबंधः समाहारः। यथा पा
णिपादं वादयेत्तत्र वादनक्रियायां तुल्यवदेव पाणिपादयोरन्वयः। एवं धवखदिरौ छिंधीत्यत्र छिदानु
कूलो यावान्व्यापारः स धवखदिरयोः तुल्य एव भासते। न त्वेकक्रियान्वयित्वस्य वादनादिरूपैक
क्रियान्वयरूपत्वमा तस्य च संबंधिभेदेनाननुगम इत्यत आह। तेनेति। यथा सेनात्वं नाम तत्तद
श्वादिविषयज्ञानविषयत्वं। एवं तत्तद्वृक्षादिविषयकज्ञानविषयकत्वं वनत्वं तथापेक्षाबुद्धिविशेष
विषयत्वमेव समाहारः। अपेक्षाबुद्धेरव्यासज्यवृत्तेरपि विषयतयोः व्यासज्यवृत्तित्वोपगमान्नानु [illegible] न६
गम इति भावः। ननु समाहारस्य संबंधिभिन्नत्वे क्रियाजन्यफलशालित्वरूपकर्मत्वस्य क्रिया
यामसंभवेन कथं पाणिवादमित्यत्र [illegible] कर्मविभक्तिरित्याशंकते। नन्वेवमिति। एवं समा
हारस्य तुल्यवदेकक्रियान्वयित्वरूपत्वे। वस्तुतस्तु। एवमित्यस्य पाणिपादसमाहारस्य लक्ष
ल्ये इत्यर्थः। अनन्वयः द्वितीयार्थकर्मत्वादेरनन्वयः। अनन्वयमेवाह। समाहारेति। तुल्यवदेकक्रि
यान्वयित्वरूपे इत्यर्थः। वादनेति। वादनरूपक्रियाजन्यफलशालित्वरूपवादनकर्मत्वस्य तत्
त्राप्यभावादित्यर्थः। तथा च वादनकर्मत्वं पाणिपादयोरेव न तु समाहारे इति भावः। परंपरये
ति। स्वाश्रयप्रतियोगिकत्वरूपपरंपरयेत्यर्थः। तत्र समाहारे। एवेत्यनेन साक्षात्संबंधे क
नानुभवसमानकर्मत्वबोधस्य परंपरयोपपादनमेवास्वरसः सूचितः। समाहारेति। समाहा

१०२

रवाच्चकपदोत्तरविभक्तीत्यर्थः । समाह्रियमाण एव । समाहारप्रतियोगित्वमेव । एकारेण समाहारे साक्षा
त्संबंधाभावादिति पूर्वनास्वरसो दर्शितः । ननु प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकत्वनियमभं
गप्रसंग इत्यत आह । व्युत्पत्तीति । व्युत्पत्तिराकांक्षा । तद्वैचित्र्यात् । कार्यकारणभेदेन कार्यकारणभा
वस्य भिन्नत्वात् प्रकृते भिन्न एव कार्यकारणभावः कल्प्यते । अनुभवानुरोधात् । तादृशव्युत्पत्ते
श्चात्र संकोच इति भावः । अत्र समाह्रियमाणयोर्द्वित्वाद्द्विवचनापत्तिः । प्रत्ययानामिति व्युत्पत्तिसं
कोचश्चान्ये इत्यनेनास्वरसः सूचितः । पाणिपादमित्यत्र पाणिपादसमाहारस्यानुभवसिद्धत्वा
द्वा पाणिपादाविति द्विवचनापत्तिरिति पाठ इतरेतरसमाहारसंज्ञानुरोधाद्वा पाणिपादसमाहारे
लक्षणाकल्पनमिति तत्र दूषणान्तरमुद्धरन् नव्यमतमुपपादयति । पाणिपादं वाद्येत्यत्रेति । पा
णिपादमात्रेति । मात्रपदात् समाहारव्यवच्छेदः । अनुभवसिद्धत्वात् समाहारे वृत्तिकल्पनं तदेव न
अनुभवस्यैवाभावादिति भावः । वैयाकरणप्राचीननैयायिकभेदेन शक्तिलक्षणयोरुपा
[illegible]र्दनं । ननु पाणिपादमित्यत्र समाहारे वृत्त्येककल्पने पाणिपादयोर्द्वित्वात् पाणिपादाविति द्विव
चनापत्तिः इष्टमतु समाहारस्यैकत्वात् तत्र द्वित्वान्वयासंभवेन न तदोपपत्तिरित्यत्रेसगत ।
नचैवमिति । एवं पाणिपादयोरेव प्रतीता विसर्गः । अत एवैक्यादिति । व्याकरणप्रतिपन्न
त्यादिसत्यर्थः । प्राणितूर्यसेनांगानामेकवद्भावो वक्तव्यः इत्यादिसूत्रेण तत्रैकवचननियमेव

(१०३)

नत्रप्र· शा·
५३

विहितं । यथा दाराणां बहुत्वाभावेपि बहुवचनमिति भावः । ननु समाहारसंज्ञानुपपन्ना समाहारबोधस्य ततोऽनुदयेनान्वर्थसंज्ञाया अथवा नोत् समाहरणं समाहारो नेकस्यैकीकरणं एको धर्म इति यावत् । तद्बोधको द्वंद्वः । समाहारद्वंद्व इति किंलिसेत्यत आह । इतरेतरेति । इतरेतरसंज्ञा समाहारसंज्ञो वेत्यर्थः । नदीति । नदीसंज्ञावद्विसंज्ञा यथा पारिभाषिकी । तथा समाहारसंज्ञापीत्यन्वर्थसंज्ञाभावेपि न क्षतिरिति भावः । स्वरूपेति । धवखदिरस्य रूपद्वयप्रतीतेरित्यर्थः । लक्षणेति । यद्यपि शक्तेर्मुख्यत्वान्न शक्तिर्न वा लक्षणा केवले ख नद्युचितं । तथापि प्राचीननैय्यायिकमते समाहारद्वंद्वे लक्षणायाः प्रक्रांतत्वेन तद्वादे निराकृतेति । अत्रापीति । इतरेतरयोगेपीत्यर्थः । अपिना समाहारद्वंद्वसमुच्चयः । समाहारे साहित्ये लक्षणा अन्यत्र तु साहित्याश्रये इति परं भेदः । धवेति । धवपदस्य खदिरपदस्य वा धवखदिरसाहित्याश्रये लक्षणा । इतरपदं च तात्पर्यग्राहकमि मासद्मतत्वाकास्मे एव वा लक्षणा । धवखदिरसाहित्याश्रयो द्वित्वं धीसन्नाम बोधः । ननु कृतं साहित्ये लक्षणयेत्यत आह । तदाहुरिति । एतत्स्मृत्यार्थो हि सूत्रं वा संज्ञोच्चारणमिति न्यायेन साहित्ये गम्यमान एव द्विवचनबहुवचने भवतः । द्वंद्वसमासो वा । नाकारव्यार्वे द्वंद्वसमासस्य साहित्ये गम्यमान एव भवतीत्यर्थः । धवश्चैन खदिरश्चेन चोपस्थितेसंव्यान्वये धवद्वयधीः खदिरद्वयधीश्च स्यात् । अन्वयितावच्छेदकव्याप्यसंख्याबोधकत्वात् द्विभक्ती

कृष्ण·
५३

नां। अन्यथा घटपटवृत्तिद्वित्वमादाय एकस्मिन्नपि घटे घटद्वित्वस्य प्रसंगः। साहित्ये लक्षणायांतु स्वीकृतत्वे
नोपस्थिते द्वित्वान्वयः। एवं चार्थे द्वंद्व इति सूत्रं समुच्चयान्वाचयसमाहारेतरेतरयोगे इति चत्वारश्चार्थाः।
तत्र समुच्चयान्वाचयातिरिक्तचार्थे द्वंद्वसमास इति तदर्थः। समुच्चयान्वाचययोः साहित्यानव
गमान्न द्विवचनबहुवचनापत्तिः। न वा द्वंद्वसमास इति। द्वंद्वे साहित्यलक्षणां [illegible] विना द्विवच
नबहुवचनानुपपत्तिः। द्वंद्वसमासानुपपत्तिश्चेति तत्र लक्षणाऽवश्यकीति भावः। ननु समुच्च
यान्वाचययोः कथं न साहित्यसंबोध इत्यत आह। साहित्यं चेति। एतेन साहित्यलक्षणस्य पुनर्वर्ण
नमिति शंका निराकृता। समुच्चयादिवादद्वयेन न तत्संगतिः। तुल्यवदिसस्य व्यापत्तिमाह। अत ए
वेति। तुल्यवदेकक्रियान्वयित्वस्य साहित्यरूपत्वादेवेत्यर्थः। ननु यजमानस्येव पत्न्या अपि या
गादावन्वयात्साहित्यं दुर्वारमत आह। यागादाविति। अनुमतीति। एवं कर्तृविसाताद्वारेण
र्थः। तथा च यथा यजमानस्य क्रियायां कर्तृत्वेनान्वयो न तथा पत्न्याः। अत्र पत्न्याः कर्तृत्वेन सा
हित्यं न विवक्षितं व्यापारसंबंधाभानात्। यदा च ययोर्न कर्तृत्वमात्रं तयोः संबंधो विवक्षित
स्तदान्वयसत्वेन साहित्यं। यथा दंपत्योरित्यादि। तथा च द्वंद्वे सहितत्वेन क्रियान्वयात् यत्रान्योन्य
साहित्यान्वयपूर्वक इतरेतरपदार्थान्वयस्तत्र समासः। इतरेतरसमा[illegible]योस्तथान्वयाचात्स
मासः साधुः। समुच्चये तु न संबंध्ययोरेव एकैकशः क्रियान्वयो न तु साहित्येनावगततया यथा
धवं छिंधि खदिरं छिंधीति समुच्चये तुल्यवदसंबद्धयोः क्रियान्वयधीः। एकरूपसजातीय

चं १

य १

105

तर्कप्र॰टी॰
५४

स८

विजातीयव्यापारयोगित्वरूपं साहित्यं। चादीनां द्योतकतया पक्ष्यामानांतरेणावगम्यते चादीनां वाचकत्वेपि तुल्यवत्सा
हित्यान्वयाभावात्। द्विवचनबहुवचनयोरेव साहित्यव्यंजकत्वादिति क्रियाभेदेऽन्वाचयः। यथेध्मानाहर्तुं वनं व्र
छिंधि३ ज गामप्यानेष्यसीति। ननु भवं खदिरमपि छिंधीत्यत्रान्वाचयेऽव्याप्तिः क्रियाभेदाभावात्। किंच घटं पश्य प
टं चानयेत्यत्र समुच्चयेऽतिव्याप्तिः। उभयत्रैव प्राधान्येन क्रियान्वये तात्पर्येण तस्य समुच्चयत्वात्। एवमाहरणा
नयनयोः क्रिययोरभेदादेध्मानाहर्तुमित्यत्रान्वाचयेऽव्याप्तिश्च निरूपकभेदेन क्रियाभेदोपपादने समुच्चये
प्रा तिव्याप्तिरिति चेन्न। प्राधान्येन यत्र क्रियान्वये तात्पर्यं स समुच्चयः। प्रधानगुणभावेन यत्र क्रियान्वये तात्पर्यं सोऽ छिवि रोप
न्वाचयः। सपुत्रको गच्छतीत्यादौ पुत्रस्यैकक्रियान्वयित्वेनैवान्वयाभावान्नातिव्याप्तिरिति। यत्र च युगपत् क्रिया मासे ७
न्वये तात्पर्यं तत्र समासः। समुच्चये च क्रमेण क्रियान्वयो न तु युगपत्। क्रिया च व्यापारमात्रं। इत्थं च तुल्यवदे
कविधेयान्वयित्वं साहित्यं तेन धवखदिरावितिक्रियारहिते धातूपनीतफलानुकूलव्यापारवत्त्वाप्र
तीतौ कथं साहित्यबोध इति निरस्तं। चैत्रमैत्रौ स्थितिगतिमंतावित्यत्र यथासंख्यस्थले तु भवत इ
ति क्रियाध्याहारादेव द्वंद्वः। यद्यपि एतावता द्वित्वान्वयार्थं अन्वयितावच्छेदकतया साहित्यभान
मित्यायातं। तच्च घटेन जलमाहरेत्यत्र छिद्रेतरत्वस्येव योग्यतावच्छेदकतयैव भानोपपत्तौ
मीमांसकमते साहित्यलक्षणापादनबीजं। तथापि पदानुपस्थितस्य शाब्देन भानमिति मतमं दृश्म

५४

स२

१८६

गीकृतेदं। आकृतिस्त्वरसोद्भवनं। तद्बीजं तु प्रत्येकमुपस्थितयोर्थयोरव्यवहितयोर्द्वित्वबोधसंभवे साहित्यं लक्ष
णात्स्यमनेर्थकं अन्वयितावच्छेदकसमानाधिकरणसंख्याबोधकत्वं विभक्तीनां न तु व्यापकत्वं तर्भा
वेपि गौरवात्। घटावानय पटं चेत्यत्र पदमादाय घटेन द्वित्वान्वयः पदस्याप्रकृत्यर्थत्वात्। प्रकृत्य
र्थमात्रवृत्ति संख्यावाचकत्वाद्विभक्तीनां यादृशसमुदायोत्तरं विभक्तिस्तस्यैव प्रकृतित्वेन घटस्या
पि प्रकृत्यर्थत्वान् प्रकृते न दोषः। किंच धवादिपदात्सतित तेनैव यदि बोधः। तदा चैत्रमैत्रौ गच्छत इत्य
त्र गमनस्याबाधात्स्यादिति तथा च तत्रान्वयप्रसंगः। एवं च द्वित्वबोधार्थं सहितत्वेन लक्षणागमनाबोधा
र्थं चैत्रत्वेन बोध इति युगपद्वृत्तिद्वयविरोधः। साहित्यावच्छेदे गमनकर्तृत्वासंभवश्च। इत्थं च द्वंद्वे क्रिया
न्वयात् पूर्वं साहित्यबोधो न भवत्येव। उत्तरं तु भवत्येव। यत्र युगपदुपस्थिते द्वये युगपत् क्रियान्वये
तात्पर्यं तत्र समासः समुच्चये तु क्रमेणोपस्थिते क्रमेण क्रियान्वयबोधे तात्पर्ये न समासः। एवं
प्रधानगुणभावविवक्षया विशेषणत्व विशेष्यत्वविवक्षायां वा तत्र समासाभाव इति दिक्। घ
टाविति स्वरूपैकशेषः। विरूपैकशेषे तु पितरावित्यत्र जनकशरीरत्वेन लक्षणायां माता
पित्रोरवगमः। विभक्त्युपनीतं पुंस्त्वं तु पित्रर्थैकान्वेति योग्यत्वात्। जन्यापि तुः लक्षणा
स्यार्थनिरूप्यत्वेन वा स्वसंबंधेन जनकस्त्रीत्वेन रूपेण मातुर्बोधकं एकशेषेव लक्षण
यत्वा पितृसमानत्वाभ्यां बोधकमिति तु न व्याः। श्वशुरावित्यत्र पत्नीजनकशरीरत्वेन प्राप्ति

१०७

स्विकरूपेण वा बोधः। दंपतीत्यादिप्रकरणे ब्राह्मणावानयेत्यत्र पुमान् स्त्रियेति विरूपैकशेषत्वात् ब्राह्मणपदे
स्त्रीपुंसलक्षणेक्तविभिन्नत्वपर्यं पुंस्त्वस्य च स्त्रियामनन्वयोऽयोग्यत्वात्। विभक्तेरेव वा शक्त्या पुंस्त्वस्य लक्ष
णया च स्त्रीत्वस्य बोधिका। ननु ब्राह्मणत्वेन शक्त्यैव ब्राह्मणी बोधसंभवे ब्राह्मणपदे लक्षणा व्यर्थे
[illegible]ति चेन्न। आद्यवर्ण[illegible]लरूपब्राह्मणीत्वेन बोधार्थं तदादरात्। केचित्तु विशुद्धमातापितृयोनि
जपुंस्त्वस्य ब्राह्मणत्वव्यंजकतया ब्राह्मण्यां ब्राह्मणत्वाभावेन ब्राह्मणत्वेन शक्त्या तद्बोधाभावा
ल्लक्षणैव। अत एव ब्राह्मणीवधे प्रायश्चित्तह्रासः इत्याहुः। तन्न। पुंस्त्वघटितस्य तद्व्यंजकत्वे गौरवा
त्। अपकृष्टब्राह्मणवधे एव प्रायश्चित्तह्रासस्यान्यथाप्युपपत्तेरिति। शिवौ नमस्कुर्यादित्यत्र
शिवपदं च शिवदुर्गान्यतरत्वेन बोधकं शक्त्या। शिवत्वेन लक्षणया च शिवाया बोधकमिति
तु नव्याः। भ्रातरौ पुत्रावित्यत्र भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विरूपैकशेषत्वात्। भ्रातृस्व
सारौ सोदरत्वेन। पुत्रपदेन चापत्यत्वेन पुत्रदुहितरौ लक्ष्येते। हरी नमस्यावित्यत्र शक्त्यैव विष्णु
त्वादिना बोधकं। युगपद्वृत्तिद्वयविरोधानुपगमात्। एवं कृष्णैव लक्षणया विष्णुत्वादिना बोध
कमित्याहुः। उपपदसमासे कुंभकारः क्षीरपायी खद्वाशामी त्यादौ च धात्वर्थे नामार्थ
योरभेदेनान्वयस्याव्युत्पन्नत्वाल्लक्षणया कुंभादिपदानि कुंभविषयकक्षीरकर्मकखद्वाधि
करणकादिपराणि। व्युत्पत्तिसंकोचे तु शक्त्या कुंभादेर्विषयत्वादिसंबंधेनान्वयबोध इति। रूष्ठ

कर्मधारये नीलोत्पलमित्यादौ नीलाभिन्नमुत्पलं इत्यभेदप्रकारको बोधः अनुभवसिद्धः। तत्रैव व्याकरणम
ते कर्मधारये शक्तिकल्पनात् समासत्वेनैव साकल्प्यते न तु विशेषतः कर्मधारयत्वेनेति सर्वत्र समासे शक्तिः।
अन्यमते तु नीलपदस्यैव नीलाभिन्ने लक्षणेति मतद्वयमपि निराचिकीर्षुराह। नीलोत्पलमित्यादाविति।
अन्वयधियैवेति। संसर्गमर्यादयैवेत्यर्थः। एवकारेण प्रकारत्वव्यवच्छेदः। येन तत्प्रकारकबोधोपपत्त्य
र्थं अभेदे वृत्तिरपि कल्प्येतेति भावः। ननु नीलमुत्पलमित्यत्र संभवत्यपि साधुत्वे शाब्दसाधुत्वमन्याय्यमि
ति न्यायेन न विशेषणविभक्तिः प्रयोगसाधुः किंत्वभेदार्थिका। युक्तं चैतत्। नीलमुत्पलमिति शाब्दसा
मग्रीकाले नीलाभेदाभाववदुत्पलमिति मानसप्रत्यक्षादिवारणाय तत्र शाब्दसामग्र्याः पृथक् प्रति
बंधकतायाः अवश्यवाच्यत्वात्। मन्मते च नीलाभेदप्रकारकज्ञानस्य तत्रायोग्यताज्ञानविधया आ
वरणकत्वेन विपरीतज्ञानोत्तरप्रत्यक्षनिर्णयं प्रति विशेषदर्शनस्य हेतुतया तदभावादेव मानसवार
णात्। विशेषदर्शनसत्त्वे च तदभावव्याप्यवत्तानिर्णयरूपप्रतिबंधकसत्त्वेन शाब्दबोधस्यैवानुदया
न्न तादृशशाब्दसामग्र्याः प्रतिबंधकताधिक्यं। न च मन्मतेपि नीलस्याभेदसंबंधेनान्वयस्वीकारे
तादृशसामग्रीकाले अभेदसंबंधावच्छिन्नप्रतियोगिताकनीला[illegible]भाववदुत्पलमिति
प्रत्यक्षादेरनुत्पादस्य विशेषदर्शनाभावादेव निर्वाह इति वाच्यं। तथापि अभेदप्रकारकबोधस्वी
कारे अभेदे नीलस्य निरूपितत्वसंबंधेन भानं तथा नीलमुत्पलमिति शाब्दसामग्रीकाले नि

रूपितत्वसंबंधेन नीलाभाववान्न भेदइत्यादिप्रत्यक्षे प्रतिबंधकत्वोत्तरत्वाकल्पनादिति विशेषणविभक्तेरभे
दार्थः। एवं च नीलोत्पलमित्यत्रापि अभेदलक्षणा आवश्यकी। व्याससमासयोः समानाकारकत्वेन त
नकृत्यनियमात् समानार्थत्व समासारंभकवाक्यस्यैव विवक्षितत्वात्। न चैवं नीलाभेदस्य रूपमुत्पलेऽ
न्वयः। नामार्थयोर्भेदेनान्वयाभावादिति वाच्यं। समासातिरिक्तस्थल एव तन्नियमादित्यत आ
ह। अत एवेति। यत एव कर्मधारयेण समासत्वेन शक्तिर्न वा लक्षणा अत एवेत्यर्थः। बलीयानि
ति। कर्मधारये यदि समासत्वेन शक्तिस्तर्हि तत्पुरुषे पि शक्तिरेवेति तत्पुरुषाद्बलीयस्त्वव्याघातः।
यदि च कर्मधारये लक्षणा तर्हि तत्पुरुषे ऽपीति उभयथापि बलीयस्त्वव्याघात इति न कर्मधारये च
शक्तिः क[illegible]प्या। न च विशेषणविभक्तेरभेदार्थकत्वमते व्याससमासयोः समानार्थकत्वानुरो
धादभेदे लक्षणावश्यकीत्युक्तमिति वाच्यं। आरूढवाक्येनैकदेशत्रव्यभिचारेण तादृशनियमाभा
वात्। यदिदमुक्तमभेदस्यान्वयविषयेवभानोपपत्तेरिति। ननु राजपुरुष इत्यत्रापि संबंध
लक्षणानुपपत्तिः। व्याससमासयोः समानार्थकत्वनियमानुरोधेनैव तत्कल्पनात्।
नामार्थयोरिति व्युत्पत्तिश्च समासातिरिक्तस्थल एव अन्यथा संबंधलक्षणाया अनिर्वा
हादित्यत आह। तत्रहीति। तत्पुरुषेहीत्यर्थः। पूर्वपदे राजपदे। तादृशनियमाभावेपि सं
बंधप्रकारकबोधस्यानुभवसिद्धत्वात् संबंधे लक्षणा। कर्मधारये तु नैवमिति भावः। न

रूप
५८

110

नुसंबंधप्रकारकानुभवश्चेदुभयत्रापि तुल्यः। नास्ति चेदुभयत्रापि मास्त्वनुभवे विवादश्चेत्तत आह।
संबंधिलक्षणेत्युक्तमिति। व्युत्पत्तिसंकोचे मानाभावात्समासासमासयोः सर्वत्रापि नामार्थयोर्भेदेनान्व
याद्राजपदस्य राजसंबंधिनि लक्षणा। नीलस्य नाभेदेनैवोत्पलेऽन्वयान्न व्युत्पत्तिविरोध इति न क
र्मधारये लक्षणाकल्पनमिति भावः। न च तत्पुरुषात्कर्मधारयस्य बलीयस्त्वे मेवालिङ्गमिति वाच्यं।
निषादस्थपत्यधिकरणविरोधापत्तेः। तथाहि। एतया निषादस्थपतिं याजयेदित्यत्र निषादः स्थ
पतिर्यस्येति बहुव्रीहिस्वीकारे उभयपदलाक्षणिकतया गौरवात्। तस्योत्तरपदलाक्षणिकस
मतेऽपि पुरःस्फूर्तिकप्रथमपदलाक्षणिकतत्पुरुषस्यैव लघुत्वादिति। निषादानां स्थपतिरिति
वा निषादश्चासौ स्थपतिश्चेति वा समासस्तत्र षष्ठीतत्पुरुषस्वीकारे नामार्थयोर्भेदान्वयाभा
वेन निषादपदस्य निषादसंबंधिनि लक्षणावश्यकतया लक्षणागौरवं कर्मधारये तु नल
दिति तदपेक्षया लघुत्वात् कर्मधारय इति सिद्धान्तः। तस्य च कर्मधारये लक्षणाकल्पने
व्याघातः। ननु निषादस्य संकरजातीयत्वेन तस्य यागोपयुक्तपूर्वविद्याप्राप्त्यकल्पने गौ
रवं। एवं स्त्रीशूद्रौ नाधीयातामित्यत्र संकोचकल्पनं चेति। तदपेक्षया तत्पुरुष एव साधुः।
न चात्र शूद्रपदस्य निषादेतरशूद्रपरतया संकोचे निषादस्य वेदान्तराध्ययनप्रसंगः। अ
ध्ययनपदस्य यागोपयुक्ताध्ययनेतरपरत्वे च शूद्रेतरस्यापि यागोपयुक्ताध्ययनप्रसंग इति

नव्यप्र-रा-
५७

बन्धं । विशेषतः प्रसिद्धतराध्ययनपरत्वादध्ययनपदस्या । नचैवमादृत्यपाणोपपुन्नत्वे देतरवेदाभिबंधः।प्र
कांतरस्यानुपावर्द्धदगौरेव । तस्य विशेषतः प्रा प्रायाभावादिति चेन्नैवं । लाघवात् कर्मधारये प्र
वृत्तेरुत्तरमपूर्वविधाप्रयुक्तिकल्पनस्य फलमुख्यत्वेन न्यायत्वात्तदपि न गौरवस्याप्रतिबंधक
त्वात् कर्मधारयेपि लक्षणाकल्पनेन तत्पुरुषापेक्षया लघुत्वाभावो नापूर्वविधाप्रयुक्तिकल्प
नागौरवमस्तत्वेन च तत्र कर्मधारयस्य स्वीकारे अनर्थक एव स्यादिति नत्र लक्षणानंगीका
र एव साधुः । ननु लक्षणाया अभावेपि कर्मधारय एव स्वीक्रियते न तु तत्पुरुषः स तत्र बीजाभा
वः । शक्तिलक्षणाज्ञानयोः समद्बोधहेतुतायां विशेषाभावाल्लाघवाच्च मुख्यार्थपरत्वे संभवति ल
क्ष्यार्थपरतायां अन्याय्यत्वादिति न्याय एव शरणमिति चाम् । असति विशेषतो बाधके कर्म
धारये विधेयेव वेदानां प्रामाण्यं न तु तत्पुरुषविधयापीति मन्तेपि सुवचत्वात् । तस्मात
कर्मधारये समासत्वेन शक्तौ लक्षणाया वा स्वीकारेपि बलीयस्त्वानुपपादकत्वं सकलत एवेति चेन्न ।
शक्यसंबंधरूपलक्षणाज्ञानस्य विना शक्तिज्ञानं अलभ्यविलंबतया शक्तिज्ञानादेव शाब्दबोधो
पपत्तौ लक्षणाज्ञानकल्पने गौरवादिति वैदिकशाब्दबोधस्य शक्तिज्ञानमूलकत्वेन लाघवस्यै०
वासिद्धांतबीजस्यादित्सल्लंपल्लवितेन । ननु तत्पादिविवेकाग्रधनाभिलत्र बहुव्रीहिगर्भतत्पुरुषस्य

कूम
५७
।।श्रीरा

112

लेबहुव्रीहौ लक्षणोत्तरं तत्पुरुषे लक्षणास्वीकारे लक्षितलक्षणास्वीकारापत्तिः। बहुव्रीहेः अन्यपदार्थसंबोध
नि अनुशासनाभावात् परंपरासंबंधेनैव लक्षणया निर्वाहाद्बहुव्रीहौ तत्स्वीकारस्यावश्यकत्वे
या समासत्वेन सर्वत्रैव समासे तत्पुरुषस्यानभिमतिश्चेन्न। चित्रगुपदस्य बहुव्रीहिलक्षणया अन्यपदा
र्थपरत्वे तत्संबंधित्वपरंपरासंबंधेन तत्पुरुषलक्षणायां च लक्षणाद्वयादेव युगपदन्वयबो
धोपपत्तेः। युगपद्वृत्तिद्वयविरोधस्य च मणिकृन्मतेऽनंगीकारादिति। अघटः पट इति नञ्
तत्पुरुषे घटभिन्नः पट इति अन्वयबोधस्यानुभाविकत्वात्। नञश्च संसर्गाभावमात्रवाचक
त्वेन तत्र अन्योन्याभावप्रकारकबोधस्यासंभवितया घटभिन्ने समासशक्तिरिति मतं दूषयति।
नञ्तत्पुरुषेपीति। घटसंबंधिपरमिति। घटसंबंधिनि लाक्षणिकमित्यर्थः। संबंधस्याभाव
प्रतियोगित्वे। अनन्यलभ्यस्यैव शब्दार्थत्वान्न तत्र शक्तिरिति भावः। ननु एवं तर्हि अन्यो
न्याभावत्वप्रकारकबोधः स्यादत आह। नञ्पदं चेति। ननु संसर्गाभावोन्योन्याभावश्च न
ञोर्थ इति संसर्गाभावत्वं अन्योन्याभावत्वं च शक्यतावच्छेदकमिति नञ्पदस्य नानार्थ
कत्वं लघुत्वेनापेक्षयाऽन्योन्याभावे लक्षणैव बोधिता अनन्यलभ्यस्यैव शब्दार्थत्वादित्यभि
प्रायेणाह। संसर्गेति। अत्यन्ताभावमात्रवाच्यत्वे घटप्रागभाववद्दशायां ध्वंसदशायां च
कपाले घटो नास्तीति बुद्धेरनुदयप्रसंगः। ध्वंसप्रागभावप्रतियोगिकभिन्नत्वेन सहाये

ताभावस्य प्राचां मते विरोधादत्यंताभावविषयकत्वासंभवात् अतो ध्वंसादिविषयकत्वमेवोपेयं।
तथा च तत्साधारण्याय संसर्गाभावेति। संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयीभू
ताभावत्वं ध्वंसप्रागभाववद्दशायां कपाले घटो नास्तीति धीः ध्वंसादिविषयिणी। तत्र चोत्त
रकालीनत्वविशिष्टसमवायः प्रागभावस्य पूर्वकालीनत्वविशिष्टसमवायश्च ध्वंसस्य प्र
तियोगितावच्छेदकः संबंधः प्रसक्तं हि प्रतिषिध्यते इति न्यायात् उत्पत्तिपूर्वं उत्तरकालीन
त्वविशिष्टसमवायेन कपाले घटस्याभावात् तत्र तेन संबंधेन कपाले घटोऽस्तीति संसर्गा
रोपानंतरं घटो नास्तीति बुद्धिः। एवं ध्वंसदशायां पूर्वकालीनत्वविशिष्टसमवायेन घटस्याभा
वात् तेन संबंधेन कपाले घटोऽस्तीति संसर्गारोपानंतरं घटो नास्तीति बुद्धिः। अत्यंताभावे
तु संयोगमात्रेणैव घटवत्त्वारोपात् अत्यंताभावधीः। न चान्योन्याभावप्रसक्तौ तादात्म्या
रोपस्य हेतुत्वात् तादात्म्यस्यापि संसर्गत्वेनान्योन्याभावेऽतिव्याप्तिरिति वाच्यं। संयोगा
दिसंबंध एवकृरिप्रयोगात्। संयोगादित्वेन संसर्गव्यवहारात्। तादात्म्यातिरिक्तत्वेन संस
र्गस्य प्रवेशाद्वा। न च तथापि निसाक्कारकप्रसक्तिवारणायाभावात् लौकिकप्रसक्तेः प्रतियो
गिज्ञानहेतुताया अभावस्य कत्वेऽपि प्रतियोगिसंसर्गारोपहेतुत्वे मानाभाव इति वाच्यं। एकदा
नानासंबंधावच्छिन्नाभावप्रसक्तिवारणाय तत्संबंधावच्छिन्नाभावप्रसक्ते तत्तत्संसर्गारो
पक्षेऽपि हेतुत्वात्। न च ध्वंसप्रागभावयोः प्रतियोगितावच्छेदकसंबंधे मानाभावेन

५८

कथं तत्र सपक्षे प्रतियोगिसंसर्गारोपः कारणमिति वाच्यं । अनुभवबलेन प्रतिबध्यप्रतिबंधकभावानु
रोधेन चात्यंताभावस्यैव तयोरपि प्रतियोगितावच्छेदकसंबंधांगीकारात् । तथाहि । अत्यंताभावस्ये
व ध्वंसप्रागभावयोरपि ज्ञानदशायां तत्कालावच्छेदेन प्रतियोगिमत्ताज्ञानानुदयात् समवाये
न तद्धटवत्ताज्ञानं प्रति तद्धटत्वावच्छिन्नप्रतियोगिताकात्यंताभावप्रागभावादिमत्ताज्ञान
त्वादिना प्रतिबंधकत्रयमपेक्ष्य समवायेन तद्धटत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वे
नैव प्रतिबंधकतयात्यंताभावस्येव तयोरपि संबंधावच्छिन्नविशेषधर्मावच्छिन्नप्रतियोगि
ताकत्वस्वीकारात् । तथाच संसर्गाभावत्वं नञ्पदशक्यतावच्छेदकं । तच्चान्योन्याभावान्यत्वमे
व तथास्तामिति वाच्यं । सामान्ये पक्षपात इति न्यायेन ध्वंसप्रागभावादिसाधारणतया संसर्गा
भावत्वस्यैव तथात्वात् । अत्र घटः पटः इत्यादौ सामानाधिकरण्यानुरोधादन्योन्याभाववति
लक्षणया अन्योन्याभावे शक्तस्य नञः प्रयोगाभावाच्च । चैत्रो न पचति नेदं चैत्रस्य भूतले
न घटः इत्यादौ मन्मतेनाभो मुख्यार्थतासंभवादित्याशयः । लाघवेनेति । संसर्गाभावत्वं सं
सर्गारोपजन्यप्रतीतिविषयाभाववत्त्वमिति ४ तदपेक्षया तत्प्रविष्टस्याभावत्वस्यैव लघु
त्वेनोभयत्रैव शक्तिरिति भावः । ननु संसर्गाभावत्वं न संसर्गारोपजन्यप्रतीतिविषयता
भावत्वं । संसर्गारोपस्य हि अनाहार्यस्य हेतुत्वेऽनाहार्यबाधबुद्धेः प्रतिबंधकतयाऽभा

वप्रसक्तानुपपत्तिः। आहार्यस्य तस्य तदानीं बाधाभावेन नासंभवः। बाधकालीनेच्छाजन्यज्ञानस्यैवाहार्यत्वात्। यदि च बाधसामग्रीकालीनस्याऽपि तत्त्वमिति मन्यते तथाप्यभावत्वे किं रूपं लक्षणं एवं प्रतियोगिसंसर्गारोपस्यालौकिकतया ऽतीन्द्रियाभावाव्याप्तिः। न च तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वं। तत्संयोगान्योन्याभावे ऽतिव्याप्तिः। संयोगितादात्म्यस्य संयोगरूपत्वे तस्यापि संसर्गावच्छिन्नप्रतियोगिताकत्वात्। संसर्गतया तादात्म्यत्वमात्रावच्छेदकतयात्वे लक्षणपदवैयर्थ्यं। एवं तादात्म्यावच्छिन्नप्रतियोगिताकान्यत्वं नान्योन्याभावत्वं संयोगत्वसंबंधावच्छिन्नप्रतियोगिताकसंयोगवत्ताभावे ऽतिव्याप्तेः। संयोगितादात्म्यस्य संयोगरूपतया तादात्म्यावच्छिन्नप्रतियोगिताकत्वात्। तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वोक्तौ च तादात्म्यस्यातिरिक्तत्वोपगम एव निरस्तत्वादिति। एवं संसर्गाभावत्वमन्योन्याभावत्वादिकमखण्डमेवेति। किं तदपेक्षया तावत्त्वे लाघवं। न च सामान्यतोऽभावत्वं लक्षितिवाच्यं। सामान्यधर्मस्यावच्छेदकत्वेन नञ्पदघटितैवाभावबोधोपपत्तौ लक्षणां विनैवोपपत्तिरिति तस्यैव बीजतया संसर्गाभावत्वादीनामखण्डत्वे च नञ्पदार्थसंसर्गाभावत्वप्रकारकबोधपस्तत्राभावत्वप्रकारकबोधस्य खल्वनुगमस्तत्त्वेन प्रकृते तदसंभवादित्यत आह। विनिगमनेति। संसर्गाभावत्वस्यातिरिक्तत्वे ऽभावस्यातिरिक्तत्वेन तदपि शक्यतावच्छेदकमित्यर्थः। इति संप्रदायानुसारिणी व्याख्या। वस्तुतस्तु अभावत्वस्य नञ्शक्यतावच्छेदकत्वे घटो नास्तीत्यत्र संसर्गाभावत्वप्रकारकबोधः। घटो नेत्यादौ अन्योन्याभावत्वप्रकारकबोधश्च स्यात्। यदि च संसर्गावच्छिन्नप्रतियोगिता संसर्गाद्यभावविशेषपरत्वाकल्पादेः शाक्यतावच्छेदकतया तादृशानुभवोपपत्तिरिति विभाव्यते। कृम

118

तथाप्यभाव इति प्रतीतेरखण्डरूपकत्वात्यंताभावत्वध्वंसादिविषयकत्वेनैवोपपत्तौ अतिरिक्ताभावत्वे माना-
भाव इति नाभावत्वं राश्यतावच्छेदकमत आह। विनिगमनेति। संसर्गाभावत्वमिवान्योन्याभावत्वमपि राश्य-
तावच्छेदकं विनिगमनाविरहादिति भावः। भूरिप्रयोगस्य संसर्गाभाव एवान्योन्याभावे च तु सत्त्वान्नियम-
तः प्रतीयमानेष्वर्थेषु राश्यस्वीकारेणानापोछेदापत्तेः। चैत्रो न पचतीत्यादौ कारणान्तरे कर्तृवाच्यतया येष्या।
ऽस्याक्रमपि यदाख्यानेकृत्तिर्लक्षणात् तदा शब्देनान्योन्याभावस्य नञ्प्रत्यायने संभवादिति
नव्यानुसारिणी व्याख्येति विभावनीयं। यदि च घटो नास्तीत्यत्रात्यंताभावत्वप्रकारक एव बोध आनु-
भाविकः। ध्वंसप्रागभावयोरत्यंताभावविरोधित्वे मानाभावेन ध्वंसप्रागभावकाले घटो नास्तीति
बुद्धेरत्यंताभावविषयत्वेनैवोपपत्तेरिति विभाव्यते। तदात्यंताभावत्वमन्योन्याभावत्वं च राश्यता-
वच्छेदकमिति पर्यवसन्नं। अत्र च घटवति भूतले यत्किंचित् घटप्रतियोगिकात्यंताभावसत्वात् भूत-
ले घटो नास्तीति व्यापत्तिवारणायान्यापि तावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबलल-
भ्यं। तत्र घटत्वावच्छिन्नप्रतियोगिताकाभावविषयकशाब्दत्वावच्छिन्नं प्रति किं। चेत्तत्पदासमभि-
व्याहृतनञ्पदज्ञानत्वेन कारणता। तेन नीलो घटो नास्तीत्यत्र न घटत्वावच्छिन्नाभावधीः। घटपदसमभिव्याहृत
किंचित्पदं च नीलादिपदत्वेन विशेषणोपादेयं। तेन भूतलादिपदसमभिव्याहारेपि न दोषः। न चैवं तथापि नी-
लघटो नास्तीत्यत्रानुपपत्तिः। अभेदेन नीलादिसाकांक्षत्वेन ज्ञाने तत्तद्धीतरकंबुग्रीवादि-
मान्नास्तीत्यादौ संभवतीति न्यायोगुरोर्दत्ते भावादिति न्यायेन कंबुग्रीवादिमत्त्वस्य घटत्वापेक्ष-
या गुरुत्वेनानवच्छेदकतया कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावबोधो प्रमात्मक एव।

118

घटेऽपि कंबुग्रीवाद्यवच्छिन्नप्रतियोगिताकस्यास्याप्रसिध्या तेन संबंधेन कंबुग्रीवादिमतो नाभावोपरि भ्रम: । तथापि सं
सर्गिकविषयतायामपि प्रकारत्वनिरोष्यतान्योपगमेन प्रतियोगितायां कंबुग्रीवाद्यवच्छिन्नत्वांशे भ्रम इति बो
ध्यं । केचित्तु । घटो नास्तीत्यत्र प्रतियोगितया घटस्यस्यावच्छिन्नप्रतियोगिताकत्वसंबंधेन घटत्वस्याभा
वोपरिभानं । कंबुग्रीवादिमान्नास्तीत्यत्र तु घटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन कंबुग्रीवादिम
त्त्वस्याभावोपरि भ्रम: । स्वावच्छिन्नप्रतियोगिताकत्वस्यैव स्वस्य संबंध ~~[illegible]~~ नानादित्याहु: । आ
शयमपि दाकरं दते । ननु न घट इति । अभावे घटयोरिति प्रतियोगितया घटस्याभावोपरि बोधोपपत्ते
रित्यर्थ: । घटपदेपीति । अपिनाखंडपदसमुच्चय: । नामार्थयोरिति । नीलो घट इत्यत्र नीलघटयोर
भेदेनान्वयात् भेदेनेति । अभेदातिरिक्तसंबंधेनेत्यर्थ: । तथा च नञर्थाभावे प्रतियोगित्वसंबंधे ना
न घटस्यान्वयो न संभवति तु खलु बलत्वेनन भोपि नामत्वादिति भाव: । रूपांतरमिति । नामार्थ
योरिति व्युत्पत्तिस्वीकारे हीत्यर्थ: । न घट इति प्रयोगाया: साधुत्वाप्रतियोगितासंबंधेनापि नञ
र्थान्योन्याभावे घटस्यान्वय इति भाव: । अर्थसाधुत्वे संभवति शाब्दत्वसाधुत्वस्याव्याप्ततया प्रथ
मायामेव लक्षणामाह । प्रथमायां चेति । षष्ठ्यर्थे प्रतियोगित्वे । ननु सुबविभक्तौ लक्षणासं
भवति । कर्तृकर्मणो: कृतीति व्यवस्थानुशासनवैयर्थ्यापत्ते: । कर्तृत्वस्य कर्मत्वं प्रकारकबोध
स्य व्यवस्थास्तु कर्मविशिष्टे लक्षणायां वोपपादयितुं शक्यत्वादित्यस्यापि प्रायेण संकेतेनान्वितेति । ताहि
सुबविभक्तौ लक्षणानंगीकारे हि । षष्ठीत: । भारतस्य श्रवणं व्यासस्य कृतिरिति कर्तृकर्मरूपयोगे

रूम
८०

विहितषष्ठीतः । कर्मत्वेति । कर्तृत्वेऽपि बोध्यं । शेषे षष्ठीत्यनेन संबंधमात्रशक्तषष्ठीतः संबंधत्वेन बोधसंभवेऽपि कर्मत्व
त्वेन बोधो न संभवतीति तथा च तादृशानुभवोपपत्तये लक्षणास्वीकार आवश्यकः । न चानुशासनस्य शक्ति
निर्णायकतया कर्तृकर्मणोर्योगे विहितषष्ठीत्वेन कर्तृत्वादिना शक्तिरेवास्तामिति वाच्यं । अनन्यलभ्यस्य शब्दार्थ
त्वादिति भावः । असंदिग्धस्थलमुदाहरति । एकत्वेति । एकस्यां स्त्रियां दारा इति । दाराः पुंसि च भूम्न्ये
वेति बहुवचनान्त एव दारशब्दः साधुरिति भावः । यद्यपि एकत्वं सर्ववृत्ति संख्यावाचकत्वं सुपां न तु तन्मात्रवृत्ति
संख्यावाचकत्वमिति तद्गुणानामप्येकत्वान्वयः संभवत्येव तथापि एको घट इत्यत्रापि भवसाधुत्वस्याना
भावेन स्यां घटगतगुणानामप्येकत्वान्वयापत्तिः । न च बहुवचनान्तेऽपि बहुवचनेन लक्षणया एकत्वं बो
ध्यतामिति वाच्यं । एकवदिति पदेनैकत्वबोधसंभवे च दारा इति बहुवचनस्यैकत्वे तात्पर्यग्रहेण लक्षण
या एकबोधकारणसंभवात् । प्रकृते च संभवस एकधुते राजसाधुत्वस्यान्याय्यत्वादिति । अनु
शासनविरुद्धेति । इयं लक्षणा । षष्ठ्याः कर्मत्वे बहुवचनस्यैकत्वे लक्षणेत्यर्थः । इष्टैवेति । कर्तृक
र्मणोः कृतीति व्यवस्थयानुशासनवैयर्थ्यमिति या सुरु विभक्तौ न लक्षणे एतस्यानुशासनविरुद्धत्व
मिति चेन्न लक्षणेति केवलं दर्प इति । भार तस्य श्रवणमित्यादौ विभक्तौ लक्षणोपपत्तावपि न च
टः पद इत्यत्र प्रथमायां कृष्णलक्षणा न तथानुशासनाभावादिति भावः । प्रकृतेऽपि न भ्रस्नमपि
घा इत्यत्र घटपदोत्तर प्रथमाभावादपि । आनुशासनविरुद्धलक्षणा संभवतीति तुल्यमित्यर्थः । अनुशा
सनमेवाह । तदिदमाहुरिति । नियतेति । नियतः प्रतियोगिवाचकपदेन नियतः प्रयोगो येषां ते

119

त॰र्कप्र॰ टी॰
६९

केचिदव्ययाः नञादिरूपाः प्रतियोगिवाचकपदार्थान्वितस्वार्थबोधकाः केचिदव्यया इत्यादिवत् । न इति । हि । न क
दाचिदपि प्रयोगः । किंतु न घटः न पट इत्यादिरूप एव । तथा च स्वार्थप्रतियोगिवाचकपदार्थान्वितत्वं अभेदेन
विभक्त्यर्थद्वारत्वात् तत्र च घटपदस्य घटप्रतियोगिकत्वलक्षणायां अभेदेन प्रथमायाः प्रतियोगित्वलक्षणायां
तु विभक्त्यर्थद्वारान्वयः । घटपदे लक्षणायां प्रथमायाः शब्दसाधुत्वमात्रं वक्तव्यं नापेक्षायाः प्रथमायाए
वप्रतियोगित्वलक्षणौचित्ये सत्यपि प्रतियोगित्वलक्षणमानुशासनिकीति भावः । यद्यपि प्रति
योगित्वरूपार्थे प्रथमेति न व्याकरणेन प्रतिपादितं । तथापि तादृशानुशासनतात्पर्यं तत्रैवेत्यनुशा
सितत्वमिति बोध्यं । शंकते तथापीति । ननु चेति । न घटः पट इत्यत्र घटान्योन्याभावस्य पटे रूपमन्व
यः । नामार्थयोरभेदातिरिक्तसंबंधेनान्वयबोधासंभवादित्यर्थः । शंकते । ननु तत्रेति । तथा च न
नामार्थयोरन्वयः । किंतु विभक्त्यर्थनामार्थयोरिति भावः । तत इति । न घटः पट इति वाक्यादि
त्यर्थः । शंकते । नञ्पदमिति । नञर्थस्याभाववतः पटे अभेदेनैवान्वय इति नैतद्व्युत्पत्तिवि
रोध इति भावः । घटस्येति । नञोऽभाववत्त्वलक्षणायां घटस्य प्रतियोगितासंबंधेनाभावेऽ
न्वयो बाध्यः । स च न संभवतीति भावः । तदेवाह । तस्येति । अभावस्येत्यर्थः । पदार्थैकदेशेति । न
ञोऽभाववत्पदार्थकतयाऽभावस्यैकदेशत्वादित्यर्थः । गोर्निपशुरपशुरित्यादौ सवि
शेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्यबाध इति न्यायेन स्वर्ग घटस्य
इतिवत् नित्यत्वस्य गोत्वे अपशुत्वस्य पशुत्वे अन्वयापत्त्या पदार्थः पदार्थेनान्वेति ।

रुम
६०

सा३

ननु पदार्थैकदेशेनेति नियमस्याव्यवस्थया नञर्थाभाववदेकदेशेऽभावे घटस्य प्रतियोगितयाऽन्वयासंभव इति भावः।
तथापीति शंकोपरि समाधत्ते। एवमिति। स्वसंबंधिकेति। नामार्थयोरिति व्युत्पत्तिजान्यो भाववत्तिलक्षणेन अ-
भाववत अभावे नैव घटेऽन्वय इति नामार्थयोरिति व्युत्पत्तिविरोधः पदार्थः पदार्थेनान्वेतीति न तु पदार्थैकदेशे-
नेति व्युत्पत्तेश्च स्वसंबंधिकपदार्थविशिष्टेकस्यान्वयेवाभ्युपगमात्। नञर्थाभाववदेकदेशेऽप्यभावे घटस्यो-
न्वये बाधकाभाव इति भावः। ननु व्युत्पत्तेः संकोचे मानाभावादित आह यथेति। जनक इति। अ-
जनकपुत्रत्वांशेऽपि तत्रैकदेशे जनके चैत्रे यथा चैत्रस्य निरूपितत्वसंबंधे नान्वय इत्यर्थः। तथा
च व्युत्पत्तिसंकोच आवश्यक इति भावः। ननु चैत्रस्यापि तेनाद्यै जनकपुत्रत्वरूपपित्रैकदेशे जन-
कत्वे चैत्रस्यान्वयः। किंतु स्वनिरूपितजनकत्वसंबंधेन पितृपदार्थे एवेति पदार्थः पदार्थेनान्वे-
तीति न व्युत्पत्तिसंकोचः। एवं च प्रकृतेऽपि घटेनेत्यादौ घटपदस्य घटप्रतियोगित्वलक्षणया घट-
प्रतियोगिकत्वस्य स्वाभिन्नाभावाश्रयतासंबंधे नञर्थमायाः प्रतियोगित्वेन लक्षणया न तु घटस्य
स्वप्रतियोगिताकाभावाश्रयतासंबंधेन पटेऽन्वये बाधकाभाव इति मतं दर्शयति। अन्ये-
त्विति। समुदाय एव। अभाववत्येव। एवकारेणाभावरूपपदार्थैकदेशव्युदासः। इतरप-
दार्थेति। घटपदार्थस्यान्वयः। परंपरासंबंधेन। स्वाभिन्नाभावाश्रयत्वसंबंधेन। स्वप्रति-
योगिताकाभावाश्रयत्वसंबंधेन वेत्यर्थः। न च नामार्थयोरिति व्युत्पत्तिभंग इति वाच्यं। ना-
मार्थयोरभेदाघटितसंबंधेनान्वयस्यापि घटितसंबंधेन चनान्वय इत्येव व्युत्पत्तेरिति भावः।

न २

एवं चैत्रस्य पितेत्यादौ चैत्रस्य स्वनिरूपितजनकत्वसंबंधेन पितर्येवान्वय इति बोध्यं। आकुरिसत्वरसो ज्ञानं। तद्बीजं तु घटी
यः अभाववान् पट इत्यन्वये कृत्वा भावद्भृत्या कांक्षाया अनिवृत्तिः। अनुपपत्त्येति। ननु अभाववत्तिलक्षणांगीका
रे पदार्थ इत्यादेर्नवमते संकोचः। नञर्थाभावस्याश्रयतासंबंधेन प[illegible]न्वये नामार्थयोरित्यस्य संकोच इति
तुल्यत्वे विमिति अभाववति लक्षणा। घटपदस्य घटप्रतियोगिकेन त्र[illegible]भाववतिलक्षणया लक्षणे त
द्वयप्रसंगाच्चेत्यत आह। युक्तं चेति। सुतरां संकोचस्या विशिष्टत्वेपीति शेषः। लक्षणत्वमेव न नञ्पदस्येति शे
लक्षणाया अ८ [illegible]षः। अन्यथा ननो [illegible]भावान् इति [illegible] कल्पने। अघट इति। विशेषणविशेष्यवाचकपदयोः समान
विभक्तिकत्वस्य विरुद्धविभक्तिरहितत्वस्य वाऽभेदान्वयबोधे हेतुत्वेन भवन्मतेऽभावस्यैवाश्रयतया। अन्वये
नाभेदान्वयबोधाभावे नञ्प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिकत्वमनुपपन्नं स्यादिति भावः।
निपातेति। निपातादी सर्वः। आदिनाऽव्ययपरिग्रहः। अन्येनेति। निपातातिरिक्तनामार्थयोरभेदा
तिरिक्तसंबंधेनान्वयबोधाभाव इत्यर्थः। नामार्थप्रकारकशाब्दबोधे अव्ययनिपातप्रत्ययघटितत
मजन्योपस्थितेस्तन्त्रत्वादित्यर्थः। न च स्थले च प्रत्ययजन्योपस्थितेरसत्त्वेऽपि निपातजन्योपस्थितेः स
त्त्वेन व्यभिचाराभाव इत्यपि कश्चित्। तत्तु अन्यलभ्यत्वनिवेशे गौरवं चिंत्यं। नन्वव्ययातिरिक्तत्वनिवे
शे गौरवमत आह। अत एवेति। अव्ययातिरिक्तत्वनिवेशादेवेत्यर्थः। भेदेनेति। इवार्थे सादृश्ये चंद्र
स्य प्रतियोगितयाऽन्वय इत्यर्थः। अत एव चंद्ररूपमो नोर्थस्य सादृश्यरूपे वाच्ये अभेदातिरिक्तप्रति
योगितासंबंधेनान्वयोपपादनाय तादृशनियमसंकोचस्यावश्यकत्वादेव। घटेति। घट[illegible]लक्षणा

(122)

वयोः प्रतियोग्यनुयोगिभावस्य संसर्गमर्यादयैव भानाल्लक्षणाकल्पनमप्यावश्यकमिति भावः। मानाभावात्। नापा
र्थयोरित्यादिनियमे अव्ययपाठितातिरिक्तस्थले इति संकोचे मानाभावादिति तात्पर्यः। नन्वेवं चंद्र इव मुखं
मित्यादौ चंद्रस्वार्थयोः कथमन्वय इत्यत आह। चंद्र इवेति। तत्सदृशेति। चंद्रसदृशेत्यर्थः। ~~नन्वेवं~~
चंद्र इव मुखमित्यादौ चंद्रस्वार्थयोः कथमन्वय इत्यत आह। चंद्र इवेति। तत्सदृशेति। नन्वेवमिवपदमनर्थक
मत आह। इवपदं चेति। तात्पर्येति। केवल चंद्र इति पदान्न सादृश्यबोध इति। चंद्रपदस्य चंद्रसदृशे
लक्षणायां इवपदसमभिव्याहारस्तत्रापि प्रयोजकः। नन्वनंतलक्षणाकल्पनमपेक्ष्य इवपदस्य निपाततः प्रतीय
माने सादृश्ये शक्तिरेवास्तामत आह। अत एवेति। चंद्रपदस्य चंद्रसदृशे लक्षणकल्पनादेव। अन्यथा लक्षणा
कल्पने। तदनुपपत्तेः। चंद्रमिवेति द्वितीयानुपपत्तेः। चंद्रपदस्य चंद्रसदृशे लक्षणायां तस्याभेदेनान्वयाद द
भेदे च विशेषणविशेष्यवाचकपदयोः समानविभक्तिकतायास्तंत्रतया। चंद्रमिति विशेषणवाचकपु
पदोत्तरं द्वितीया आवश्यकी। मन्मते तु इवार्थसादृश्यस्य मुखपदार्थमुखेऽन्वयेनापत्ते
दान्वया भावात्तु द्वितीयानुपपन्नैव। चंद्र इव मुखं पश्यामीत्यत्रापि तादृशबोधोपपत्ते
रिति भावः। ननु चंद्रपदस्य चंद्रप्रतियोगिकमर्थः। सादृश्यशक्तस्य चेदादेः सादृश्याश्रये लक्षणा त
स्याभेदेन मुखेऽन्वय इति रीत्या चंद्रमिव मुखमित्यत्र समानविभक्तिकत्वोपपत्तिः संभवत्येवानघ
टः पट इत्यत्रेव। अन्यथा तत्रापि घटपदस्य घटाभाववति लक्षणा नञ्पदं च तात्पर्यग्राहकमि
त्यपि प्रसज्येतेति चेन्न। अतत्वेन घट इत्यत्र अभावविशेष्यकबोधस्य शाब्दत्वानभ्युपगमात्। अ
भावशाब्दत्वस्य नञोऽभाववतिलक्षणौचित्यात्। केवल चंद्र इवेत्यप्रयोगात्। शाब्दमा इवपदात्सा

वा ५

123

सा२ न३ सं२

द्रव्यविशेषबोधाभावात् इत्यादेः सादृश्ये शक्तेरेव कल्पनात् नैष्फल्यं निरर्थकत्वमेवेत्याशयात् । इवादीनां सादृश्ये शक्त्य-
भ्युपगमेऽपि न व्युत्पत्तिसङ्कोच इत्यत आह । अस्तु वेति । षष्ठ्यर्थे प्रतियोगिरूपे विभक्तौ । चन्द्रपदोत्तरप्रथमावि-
भक्तौ इवपदोत्तरं च लुप्तविभक्तेरनुसन्धानं । तथा च नामार्थयोरिति व्युत्पत्तिसङ्कोच इ[illegible]निराशयः ।
ननु लुप्तविभक्तौ न लक्षणेत्यत आह । अनुशासनेति । नियतप्रयोगादिति क्वचिद्द्व्यपाठ इत्यनुशासनेन
बलादित्यर्थः । अनुशासितविभक्त्यर्थातिरिक्तस्थले सुब्विभक्तौ लक्षणा नास्तीति भावः । तथेति ।
घटो नास्तीत्यत्र घटपदोत्तरप्रथमाविभक्तेरपि प्रतियोगित्वे लक्षणेत्यर्थः । भूतले न
घट इत्यत्रैव न केवलं चन्द्र इवेति न प्रयोगः । चन्द्र इव मुखमित्यत्र लुप्तविभक्त्यननुसन्धानेऽपि बो-
धात् चन्द्रपदस्य चन्द्रसादृश्ये लक्षणाकल्पनमेवोचितं कुत्रापि इवादिना सादृश्यबोधनात्
लेवोनिरर्थकत्वमेवेत्याशयोऽस्तु वेत्यनेन सूचितः । पृथिव्यां गन्धो न जले इत्यत्र पृथिवी इति
गन्धो गन्धाभावो जलवृत्तिरित्यन्वयबोधस्वीकारे समानविशेष्यकत्वानुपपत्तेः । पृथिवीवृत्तिगन्धः
जलवृत्त्यभावप्रतियोगी इत्यन्वयबोधस्वीकार आवश्यक इति प्रा[illegible]चीनां मतमाह । अन्ये त्वि-
ति । ननु पृथिव्यां गन्धो न जले इत्यादौ समानविशेष्यकत्वानुरोधेन तथान्वयस्वीकारेऽपि भू-
तले घटो नास्तीत्यत्र भूतलवृत्ति घटाभाव इत्यन्वयबोधे बाधकाभाव इत्यत आह । घटो
नास्तीत्यत्रेति । एकत्वादीति । भावनान्वयिन्येव संख्यान्वयेन घटो नास्तीत्यत्र घटाभावो
अस्तीत्यन्वयबोधस्वीकारे भावनाविशेष्ये घटान्वये द्वित्वादेरसंभवितया घटौ न स्त इति न स्यात् ।

रूस

124

लं३ त२

तत्र एकत्वसत्त्वेनैव संबोधे बाधकाभावात् घटौ नास्तीति स्यात् । भावनाविशेष्यवृत्तिसंख्याबोधस्वाकारस्यालक्ष्य इत्यर्थः । त
र्हि यादृशोन्वयबोध इष्टस्तमाह । किं चेति । भूतले घटो नास्तीत्यत्र तत्तन्निरूपितवृत्तित्वविशिष्टतया अस्तु यादृशो विद्यमाना
धेयतया आरम्भात् तस्याप्यभावाधेयतया भूतलनिरूपितविद्यमानत्वादत्र यो घटाभाव इत्यन्वयबोधस्वीकारे भाव
नान्वयिनि संख्यान्वयनियमात् । भवन्मते विद्यमानत्वाश्रयसंरूपाख्यातार्थभावनायां अभाव एवान्वये
नाभावत्वस्यैकत्वात् घटौ नास्तीति स्यात् । मन्मते च सत्ताया आधेयत्वमर्थः । तथा च भूतलवृत्तिसत्ताश्रयो घटः
अस्तित्वाश्रय इति बोधोदयेन भावनाया घट एवान्वितत्वात् घटद्वये एकत्वबोधासंभवात् न घटौ नास्ती
त्यस्यापत्तिरिति भावः । नेति । भूतलवृत्तिसत्ताभावप्रतियोगी घट अस्तित्वाश्रय इत्यन्वयबोधस्वीकारे किं नि
रूपितास्तित्वाश्रयो घट इत्याकारकापत्तेः । न घटे भावनान्वय इति भावः । कथं तर्हीति । भूतलनि
रूपितास्तित्वाश्रयो घटाभाव इत्यन्वयबोधस्वीकारे तु इत्यर्थः । इत्यादीति । भावनान्वयिन्यभावे द्वित्वाभावात्
घटौ न स्त इति न स्यादित्यर्थः । स्याच्च घटौ नास्तीत्यर्थः । भावनेति । भावनान्वयी योऽभावस्तत्प्रतियोगिनि
संख्यान्वय इत्यर्थः । तथा च भावनान्वयिन्येव संख्यान्वय इति न आख्यातसमभिव्याहारे नियमः । नञ्समभिव्याहारस्थले
तु भावनान्वय्यभावप्रतियोगिनि संख्यान्वय इति । कुत्र सत्तदन्तरकल्पनेनैव घटौ न स्त इत्यत्र घट एव द्वित्वान्वया
त् न घटौ न स्त इत्यस्यानुपपत्तिः । तथा घटौ नास्तीत्यस्यापत्तिरिति भावः । यथाप्रतीतीति । अत्र भावनान्वयिन्ये
व संख्यान्वयस्य दृष्टत्वात् कथमत्र भावनान्वय्यभावप्रतियोगिनि संख्यान्वय इत्यर्थः । तथैवेति । अभावप्रति
योगिन्येव संख्यान्वयप्रतीतेरित्यर्थः । तथा च नञ्स्थले समभिव्याहृते तौ संख्याप्रकारकबोधेन नञर्थाभाव
प्रतियोग्युपस्थितत्वेन हेतुत्वं कल्प्यत इति भावः । नञ्समभिव्याहारे यद्विशेष्ये यद्विशेषणं प्रतीयते तत्ता
तद्विशेष्ये तद्विशेषणाभावः प्रतीयते । अन्यथा वचनैकनियमानुपपत्तेः । इत्येवं भूतलेऽस्तीता

ख्यातार्थः

।प्र० रा० नाद इति। घटस्याविशेष्यत्वादित्यर्थः। द्विवचनेति। घटौ न स्त इति द्विवचनानुपपत्तिरित्यर्थः ३

४

भाववान् घट इत्येवान्वय इति नियमवादिनां मतमाह। परेत्विति। इह भूतले घटो नास्तीत्यत्र। न त्वाख्यातार्थस्य निषेधेऽन्वयो न
दृष्टचर इत्यत आह। न पचतीति। पाकानुकूलकृत्यभाववांश्चैत्र इतिवत् भूतलं [illegible] ऽभाववानित्यत्र घट इ
त्यन्वयबोधे बाधकाभाव इत्यर्थः। इदमुपलक्षणं। घटौ नास्तीत्येकवचनोपपत्तिरपि नेयापि द्रष्टव्यं। अभावस्य वि
शेष्यत्वे घटौ न स्त इति द्विवचनादिकं न स्यात्। विशेषणपदस्य विशेष्यपदसमानवचनत्वनियमात्। परन्त्व
ऽभावस्यैकत्वात्। घटौ नास्तीत्येकवचनमेव स्यात्। घटस्य विशेष्यत्वे च तस्य द्वित्वबहुत्वयोः सत्त्वात्। क्रिया
पदस्यापि द्विवचनादिकं साध्विति भावः। घटौ नास्तीत्यत्र घटाविति द्विवचनेन द्वित्वावरुद्धे एकत्वान्वया
संभवादयोग्यत्वं घटौ न स्त इत्यत्र च घटद्वयेऽन्वयसंभवात् योग्यत्वमिति नात इत्यस्य भावार्थ इत्यपि केचित्। ननु भू
तले घटो नास्तीत्यत्र स्वसम्पानिरूपितत्वपर्यन्ततया ऽनुसप्यातो विधमानाधे[illegible]तया ऽनाख्यातस्याश्रयत्वप
र्यन्ततया भूतलनिरूपितविधमानताश्रयत्वाभाववान् घट इत्येव बोधः। तत्र च आख्यातार्थाश्रयत्वस्या
भाव एव विशेष्यो न तु घट इत्यभावेन विशेष्यगतसंख्याबोधकत्वाभावात् कथं द्विवचनोपपत्तिः
रिति चेन्न। साक्षात्परंपरासा[illegible]धेयेण भावनाविशेष्ये संख्यान्वयस्वीकारेण प्रकृते परंपरयाभाव
नाविशेष्यत्वस्य घटे सत्त्वादिति। एवं परंपरयाविशेषणस्यापि विशेष्यसमानवचनत्वमनुसंधेयं। चैत्रो
न पचतीत्यादौ दृष्टत्वादिति बोध्यं। ननु तथापि द्वित्ववत् घटत्वावच्छेदेन भूतलनिरूपितविधमानत्वा
श्रयत्वाभावस्यान्वयेऽप्येकघटवति भूतले घटौ न स्त इति न स्यात्। घटत्वे द्वित्वसामानाधिकरण्येन
नञर्थान्वये घटद्वयवत्यपि घटौ न स्त इति स्यात्। अधिकरणान्तरीयघटे भूतलास्तित्वाभावात् इति चे
न्न। घटद्वित्वे द्वित्वसावच्छेदेन नञर्थसामानाधिकरण्यान्वयात् अधिकरणान्तरीयद्वित्वेन नञर्थसामा

कृष्ण
६४

128

नाधिकरण्येपि एतद्भूतलत्ववृत्ति। घटवृत्ति द्वित्वे भूतलास्तित्वाभावसामानाधिकरण्य। अथवान्न घटद्वयवति घटे न स्वड्स्या
पित्तिरितिध्येयं। नन्वेवमिति। सर्वत्रैवानुयोगिवृत्तित्वाभावस्य प्रतियोग्यन्यमत्वीकारे इत्यर्थः। जातौ न सत्तेत्यस्य
जातिवृत्तित्वाभाववत्त्वमित्यर्थः। तत्र च संबंधसामान्यावच्छिन्न जातिवृत्तित्वाभावो ना समवायसंबंधावच्छिन्न जाति
वृत्तित्वाभावो वा बोध्यते। तत्राद्ये आह। जातिवृत्तित्वाभावस्येति। एकार्थसमवायेन सत्तायाजातौ सत्वेन तद्
भावानबोधनासंभवादित्यर्थः। नचैककालीनत्वादिवत् एकार्थसमवायस्यापि वृत्तिनियामकत्वाभावेन तत्स
न्या ९ बंधेन सत्तायाः सत्वेपि संबंधसामान्यावच्छिन्न वृत्तित्वाभावोऽस्त्येव। जन्यमात्रस्य कालोपाधितया मूर्त्तमात्र
स्य दिगुपाधितया कालिकदैशिकविशेषणतया तत्रा सत्वं प्रतियोगितया तदादायापि क्षतिविरहादिति वाच्यं। जा
तिः सतीति प्रतीतेः स्वरूपादिवृत्तिनियामकत्वात्। द्वितीये आह। जातिसमवेतत्वस्य चेति। प्रतियोगिप्र
सिद्ध्या न समवायसंबंधावच्छिन्न जातिवृत्तित्वाभावप्रतीतेः ~~[illegible]~~ ति पूर्वतनः। यागत्विरिति जा न ३ १
त्तिः ८ तौ न सत्तेत्यत्र जातिवृत्तित्वाभावस्यानुपपत्तौ यपि जातिर्न सत्तावृत्तिरित्यत्र संबंधसामान्यावच्छिन्नस
त्तावृत्तित्वाभावस्य जातावसंभवात् समवायसंबंधावच्छिन्नसत्तावृत्तित्वस्याप्रसिद्ध्या निषेधा
संभवात् तत्त्वमसंगत्यापीत्यर्थः। अप्रयोग्यमेवेति। निरुक्तानन्यपदार्थकमिति भावः। इदं चाक्यं। जा
तिर्न सत्तावृत्तिरिति वाक्यं। यथा द्रव्यत्वं चेयोग्यतयोपपत्तावप्रयोग्यत्वमन्याय्यमत आह। वृ
त्तिपदं चेति। साध्यादिति। जातिर्न सत्तावृत्तिरित्यनेन तल्लक्षणया सत्तानिरूपितसाध्यतासंबंधाव
च्छिन्नवृत्तित्वाभावः प्रतीयते सत्तानिरूपितसाध्यतासंबंधावच्छिन्नवृत्तित्वं च स्वरूपसंबं
धमादाय प्रमेयत्वादौ प्रसिद्धमिति नोक्तदोष इति भावः। तुल्यमिति। जातौ न सत्तेत्यपि लक्षणया
ऽयमेव। योग्यत्वे च जातिनिरूपितसाध्यतासंबंधावच्छिन्नवृत्तित्वाभावः प्रतीयत इति भावः। कचित्तु।

सत्तापदं सत्तासमवायपरं सप्तम्यर्थश्चानुयोगित्वं तथा च सत्तात्वानुयोगित्वाभाववान् सत्तासमवाय इति बोधस्सुगमः।
समवेतेति पद[illegible]धारिणतया बोध्य इत्यन्ये। शंकते। तथापीति। निषेधः। मूले तलासिद्योतिपृषः। कथ
मिति। नानार्थयोरभेदेनैव व्युत्पत्तेरिति भावः। निपातेति। निपातातिरिक्तस्थल एव नामार्थयोरिति व्युत्प
त्तिरिति भावः। ननु नामार्थमात्रस्य। ननु नामार्थसामान्यस्य। प्रतीयतीयतेनास्वरसः सूचितः। स च व्युत्प
त्तिसंकोचे गौरवं। एवं जातौ न सत्तेत्यत्र जातिवृत्तिः सत्ताभाव इत्येतावतैवोपपत्तौ लक्षणादि[illegible]स्वनेति,
नहि जातिर्न सत्तावतीति प्रत्ययलक्षणायां तत्रादन्यत्रापि तत्प्रवेशे प्रमाणमस्ति। भावनान्वयप्रकारे
प्रतियोगिवृत्तिस्वरया बोधकत्वेन प्रवचनेऽस्य नियमस्याप्युपपत्तिरिति न किंचिदेतत्। किं नियाम
कमिति। नञोऽभावमात्रवाचकत्वेन घटो नायमित्यत्र संताभावः। मूले लेन घट इत्यत्र चान्योन्याभा
वः प्रतीयेतेत्यर्थः। सामान्यास्तु तुल्यत्वादिति भावः। शंकते। अधिकरणेति। ननु अत्यन्
ताभावनिषेधककराद्यभावधित्वं प्रति अनुयोगिवाचकपदसमभिव्याहृतपंचमीपदज्ञा
नत्वेन अन्योन्याभावविषयकशाब्दबोधे अनुयोगिवाचकपदसमानविभक्तिकप्रतियोगिवा
चकपदजन्योपस्थितित्वेन च कारणत्वाभ्युपगमे किं दोषापत्तिः। सामग्र्याः फलैककल्प्यत्वादित्यर्थः।
नपचतीति। पाकानुकूलकृत्यभाववत्त्वेन इत्यत्रानुयोगिवाचकपदसमभिव्याहृतसप्तमी
पदज्ञानस्याभावेन नेतस्याः सामग्रीत्वमित्यर्थः। ननु वैयाकरणमते आख्यातस्य कर्तरि शक्ति
तया पाककर्तृभिन्नत्वमेव चैत्र इत्येव बोधात्तेदमत्संताभावोदाहरणं घट इत्यत आह। चैत्रस्ये
ति। चैत्रस्य भाववत्त्वमित्यर्थः। षष्ठ्याः सत्त्वप्रकारेण तुल्याधित्वं। एवं सति घादकसंबंधस्य

128

अभावप्रतियोगितावच्छेदकत्वे च निरूपकतासंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधस्वीकारे चैत्रीयेपि
धने नेदं चैत्रस्येति अतिप्रसंगात्। स्वामित्वस्य चैत्रवृत्तित्वेन धने आश्रयतासंबंधेनासत्वात्। यदि च तादृश
वत्ववैसनियामकसंबंधान्तरस्याप्यभावप्रतियोगितावच्छेदकत्वं स्वीकारे स्वामित्वमेव षष्ठ्यर्थस्तदापि निगम
नाधिरोहेण सत्यमप्यर्थो वक्तव्यः। अन्योन्याभावबोधे समानविभक्तिकत्वस्य नियामकत्वे। व्यभिचारमाशं
कते [illegible] धिति। क्रियाविशेषणस्थले कर्मविभक्तिः नपुंसकलिंगत्वं विशेषणविभक्तिः स्यस्मा धुषो
र्थिका। तथा च लघुभिन्नपाकानुकूलकृतिरित्यन्वयबोधेऽन्योन्याभावे विपक्षे विशेषणविशेष्यवाच
कपदयोः समानविभक्तिकत्वाभावेन व्यभिचार इत्यर्थः। ननु विनिर्मोकेति। नञसमभिव्याहारस्थले। त
त्रेति। यथा भूतलं घट इत्युक्तेऽभेदान्वयबोधे समानविभक्तिकपदत्वेन कारणतया भूतलं घटयोर
भेदेनान्वयबोधे आकांक्षा अतो नञसमभिव्याहारे भूतलं न घट इत्युक्ते भूतले घटान्योन्याभावबोधः।
अन्यत्रेति। संसर्गाभावबोधकत्वे नञसमभिव्याहारे प्रतियोग्यनुयोगिपदयोरभेदान्वये आकांक्षा
शून्यस्थलेइत्यर्थः। अन्येति। संसर्गाभावबोधकत्वमित्यर्थः। यथा पचतीत्युक्ते पाकानुकूलकृतिश्चै
त्रयोनाधनेदेआकांक्षैवं किं नाश्रयतयैवेति। न पचति चैत्रेण नाऽन्योन्याभावबोधः। किं तु संसर्गाभावस्य
ति। तथा च प्रतियोग्यनुयोगिनोरभेदान्वयबोधे यादृशसमभिव्याहारज्ञानं कारणं तयोरन्योन्याभा
वबोधे तादृशानुयोगिवाचकपदसमभिव्याहारज्ञानकारणं। एवम् संसर्गाभावबोधेऽभेदान्वये
आकांक्षाशून्यप्रतियोग्यनुयोगिवाचकपदसमभिव्याहृतनञ्पदज्ञानं कारणमित्यर्थः। तदेवो
पपादयति। आख्यातेति। नञसत्वे। नञ्पदासमभिव्याहारे। घटपटयोरिति। विशेषणविशेष्यवा

129

वकृपदयोः समानविभक्तिकत्वस्य विरुद्धविभक्तिराहित्यस्य वा अभेदान्वयबोधे आकांक्षात्वादिति भावः। तत्र। नघ
टः पट इत्यत्र। नाभेदेति। एतेन घट इत्यत्र भूतले नरो निर्घट इत्यन्वयबोधापत्तेः। आधारत्वस्य सप्तम्यर्थत्वान्नामे
दान्वयबोधकत्वमिति तत्र असत्ताभावप्रसक्त एवेति भावः। उक्तत्र्यो-रो न्याभानवबोधे निरूपण
विशेष्यवाचकपदयोः समानविभक्तिकत्वस्य तत्रत्वेऽपि न सुंदरमित्यत्र तु सविभक्तिकत्वानुसंधानेन
शाब्दबोधोपपादनेऽपि चैत्रो न पचतीत्यत्रास्यातस्य कर्तरि लक्षणायां चैत्रे पाककर्तृत्वाभेदान्वयान्न
स्तोकं पचतीत्यादौ पाके स्तोकस्याभेदप्रतिपादनात् तत्र समानविभक्तिकत्वाभावाद्व्यभिचारः। वि
रुद्धविभक्तिराहित्यस्य तत्रत्वे च प्रतियोगिपदोत्तरविभक्तिविरुद्धविभक्तिशून्यानुयोगिपदसमभ्या
हृतनञ्पदत्वेनानुयोगिपदोत्तरसुब्विभक्तिविरुद्धविभक्तिशून्यप्रतियोगिपदसमभिव्याहृतन
ञ्पदत्वेन वा हेतुत्वे न पचती[illegible]दौ प्रतियोगिपदोत्तरविभक्तेरप्रसिद्धेः। न स्तोकं पचतीत्यादाव
नुयोगिक्रियापदोत्तरसुब्विभक्तेरप्रतिहततया नानुगतरूपेण हेतुत्वं अतः नयोरन्यतरस्य हेतुत्वे
चाननुगमः। किंतु विशेष्यानुयोगिप्रतियोग्युपस्थापकनामपदयोः समभिव्याहारे समानविभक्ति
कत्वं तत्र। घटो न नील इत्यत्र घटपदार्थीभूत नीलपदार्थान्योन्याभावबोधे नीलपदसमानविभ
क्तिकघटपदसमभिव्याहृतनञ्पदत्वेन। चैत्रो न पचतीत्यादौ धर्मिपरास्यातसमभिव्याहृतन
ञ्पदत्वेन। न स्तोकं पचतीत्यादौ क्रियाविशेषण[illegible]समभिव्याहृतद्वितीयान्तस्तोकादिपदसमभिव्याहृत
नञ्पदत्वेन हेतुतेति बोध्यं। ननु पुरुषोत्तम इत्यत्र न तावत्कर्मधारयः। कर्मधारये विशेषणवाचक
पदस्य पूर्वभावनियमेन उत्तमपदस्य पूर्वनिपातापत्तेः। न चाविशेषणविशेष्यभावे कामचार इति

कम

४६

130

वाच्यं। जातिनिमित्तके गुणनिमित्तकं विशेषणमेवेति नियमात्। अत एवोत्पलनीलमिति न प्रयोगः। नापि
षष्ठीसमासः। न निर्धारण इत्यनेन निर्धारणे षष्ठीसमासनिषेधादित्यत आह। संसेपद इति। पु
रुषोत्तम इत्यत्र क्वचिद्विशेषणपरस्यादिसनेन परनिपातस्याप्यनुशासनसिद्धत्वात् कर्मधारयस्यैवोप
गमात्। अथ तथापि विशेषणं विशेष्येण बहुलमिति सूत्रे उभयोपादानबलात् विशेषणविशेष्यता
वच्छेदकयोः परस्परं व्यभिचारित्वे एव कर्मधारय इति प्राप्ते। एवं चात्र दुःखत्वाद्भिन्नत्वस्य घटादिसाधा
रण्येन पुरुषत्वावच्छिन्नोत्तमत्वरूपधर्मासंभवेन सार्वज्ञादिमत्त्वरूपोत्तमत्वस्य च पुरुषत्वे व्यभि
